विषयहरूमा सबैको गुण मान्य छ । प्रकृतमा सुकृतिदत्त सूरिले स्वीकार गरे
आफ्नै कवितामा राखेका गुणहरू काव्यगुणरसिक तत्त्वबुभुत्सुजनसमक्ष प्रस्तु
गरिँदै छ । कार्तवीर्यलाई राज्य सुम्पेर कृतवीर्य तपोवनतिर जाँदा कवि
(प्रसादगुणयुक्त) निम्न श्लोक प्रस्तुत गरेका छन्—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उटजविपुलसौधः शान्तिराज्ञी विहारी शमदमसचिवाढ्यः कामकोपादिशत्रून् ।
द्रुततरमभिभूय प्राप्तयोगाग्रभूमिर्व्यहरदतुलसौख्ये भूमिजानिः पुराणः ।।
(कार्तवीर्योदय ८।९६)

यस पद्यमा कविले उटजलाई सौध (धनिक निवास) तथा शान्तिलाई पटरानी, शम, दम आदिलाई सचिव, कामक्रोधादि शत्रुलाई जितेर योगको तुर्यभूमिमा राजाले विहार गर्नु नै प्रसाद गुणको उदाहरण मानेका छन् । महाकाव्यहरूमा प्रायः प्रसाद गुण नै प्रधान रूपले स्वीकार गरेको देखिन्छ । परन्तु कार्तवीर्योदयकारले जुन ठाउँमा जस्तो आवश्यकता पर्‍यो त्यहाँ त्यही गुण, त्यही रीति अवलम्बन गरेको देखिन्छ ।

उपर्युक्त प्रसाद गुण स्वयं कविका मूलको उदाहरण हो । प्रसाद गुणको विशेषता नै झट्टै अर्थको प्रतीति हुनु हो । शीघ्र अर्थको प्रतीति नभएमा प्रसाद गुण मानिंदैन । प्रस्तुत उदाहरणमा प्रसाद गुणको झलक राम्रो भएको देखिन्छ ।

माधुर्य गुण

अथ कनकतनूजोत्पश्य मायान्तनूजे
गुरुपदमनुयास्यन्मौनमाधाय वेषम् ।
मितहितवचनेनाश्वासयन्पुत्रपौत्रान्
तपसि विहितकामो मन्दिरात्संप्रतस्थे ।।
(कार्तवीर्योदय ८।९७)

माधुर्य गुणको अर्थ नै मीठो हुनु हो । जुन पद्य वा कवितामा कोमल पदावलीको प्रयोग भएको हुन्छ तथा समान ध्वनिहरूको प्रयोग अर्थात् अनुप्रास अलङ्कारको बाहुल्य छ; जुन कवितामा लामो समास र मूर्धन्य वर्ण ट, ढ आदिका र सन्ध्यक्षरको प्रायः अभाव हुन्छ, त्यही नै रचना माधुर्य गुणले युक्त मानिन्छ । सुकृतिका काव्यमा माधुर्य गुणले भरिभराउ अनुप्रासललित पदावलीको कुनै कमी छैन । प्रसाद र माधुर्य गुणको प्रधानता यस काव्यको विशेषता हो । हर्षको नैषधलाई कैयौंले प्रसाद गुणयुक्त काव्य हो भनेर लेखेका छन् ।

तर महावैयाकरण र साहित्यका विद्वान् हुँ भन्नेहरूलाई पनि अर्थांशमा घोरिनै पर्छ । सुकृतिका सबै पद्य त्यस्ता छैनन् । प्रतिद्वन्द्विताका कारण र प्रखर पाण्डित्यका कारणले गर्दा भाषामा क्लिष्टपना आउनु अर्कै कुरा हो ।

ओज गुण

माधुर्य गुणमा निषिद्ध ध्वनि अर्थात् ट, ठ, ड, आदिको प्रयोग, सन्ध्यक्षरको

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

प्रचुर प्रयोग तथा लामा-लामा समास ओज गुणका लक्षण हुन् । यस प्रका कविता शैलीलाई आलङ्कारिकहरूले 'गौडी रीति' भन्ने संज्ञा दिएका छन् । ओज गुण तथा गौडी रीतिको प्रयोग विशेषतः वीररसप्रधान काव्यहरूमा गर्दछ । परन्तु प्रसङ्गवश अन्यत्र पनि प्रयोग गर्न सकिन्छ । सुक्तिदत्त सू ओज गुणको प्रस्तुत उदाहरणलाई लिन सकिन्छ -

> कर्णाभ्यर्णविकृष्टसृष्टगरलज्वालाज्वलत्कुण्डलि-
> व्यात्ता भीषणतुण्डतुल्यविनमत्प्रोद्दण्डकोदण्डतः ।
> क्षिप्रक्षिप्रविपक्षपक्षविलसत्क्षोणीन्दुलक्षात्रसत
> वाक्ष्यालक्ष्यविलक्षलक्षनिकरः क्षेमं दधौ क्ष्मापतिः ।।

(कार्तवीर्योदय ८।१

गुणसाङ्कर्य

माधुर्य, प्रसाद, ओज तीनै गुणहरूमा प्रयोग गरिने वर्णहरूको समि पाइने रचनालाई गुणसाङ्कर्य संज्ञा दिएका छन् काव्यकारले । गुणसाङ्कर्य काव्य र महाकाव्य स्तोत्र आदिमा पाइन्छ । गुणसाङ्कर्यबाट एक दुइ बाँचेका छन् कि ! त्यसैले गुण, रीति र आलङ्कारिक दृष्टिले मात्र आचार्यहरूको पद्यरचनालाई हेर्दिन किनभने उनीहरू साङ्कर्यमा परेकै हुन्छ वेदान्तदेशिक स्वामी, रूप गोस्वामी, जीव गोस्वामी, सनातन गोस्वामी र दीक्षित जस्तालाई छोडेर अरू सबै साङ्कर्यको भागी भएकै देखिन्छन् । यहाँ कि ठूला-ठूला कविहरूमा पनि 'साङ्कर्य' पाइन्छ । सुक्तिदत्तले पनि आ रचनामा स्वयंले उदाहरण प्रस्तुत गरेका छन् -

> गते ताते कश्चिद्दिवसगणमुद्विग्नहृदय-
> स्ततो राज्याशक्तिः क्षपितपितृविश्लेषशुक् (?)
> स चक्रे स्वे चक्रे नवनवजनानन्दमनिशम्
> तदात्वे चायत्यामपि सकलयोगैर्नरपतिः ।।

(कार्तवीर्योदय ८।१

छन्द प्रयोग

महाकवि सुक्तिदत्त सूरिले अरू काव्यगत विधाहरू जस्तै छन्दह मूल काव्यमा सूत्रमा मोतीको दाम्ला उनजस्तै उनेर राखेका छन् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्रग्धराको दुग्धधारा

विशालगृहपङ्क्तिकोपवनमालिनी
कृत्रिमाभिनव्यनगशालिनी शिखरिणी कक्षे स्थिताः ।
वसन्ततिलकावली सदृशसुन्दरी,
संवृता कथं रुचिरपद्मका भवतु देव सैषा पुरी ॥
(कार्तवीर्योदय १।३१)

स्रग्धराको छटा

एनं श्रीनाथशर्वाद्वियमतिमतुलाखर्वगर्वारिवर्गा-
ग्राहव्यूहा[1] द्गजेन्द्राज्ज[2] रठकमठकाद्वै जयन्तीतरङ्गात् ।
कोदण्डामन्थदण्डात्सुतसुतरलतरवार्थ्याहवक्षीरवाद्धेः (?)
सेवैंते चन्द्रलक्ष्मौ निरवधिजलधिस्रग्धरायान्धरायाम् ॥

शिखरिणीमालाको प्रयोग

मधुभ्राम्यद्भृङ्गीमधुररवसंवादितदिशि
विहन्तुञ्चेद्ग्रीष्मे हिमिशिखरिणी हा सुवदने ?
वृणु द्विट्पद्मालीशिशिरमहसं सुन्दरहसन्
त्वमेनं भूपालं समुचितमनङ्गप्रतिकृतिम् ॥

शार्दूलविक्रीडित छन्दको प्रयोग

प्रालेयाचलपादकाननदरीरध्यस्य निर्यज्झरी-
राश्लिष्य क्षितिपालमेनमुदितं शार्दूलविक्रीडितम् ।
श्रालीनां व्यजनानि लेपि विमुखी ग्रीष्मे प्रवालोत्तरे
तल्पे निर्विश कामकौतुककलानन्दं कलेशानने ॥

पृथ्वी छन्दको प्रयोग

इदन्नृपगुणोत्कराकलनकाल एवादरात्
समीपसमितार्जुनेदृशमुपादधे भूपजा ।
निजान्तिकसमागतस्त्रितमय्यान्यदास्था कृता
तिरस्कृतिकला भवेज्जगति कापि पृथ्वी नृणाम् ॥

---

१. 'व्यूढ' इति पाठः ।
२. 'ज' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मालिनी जातिको प्रयोगछटा

कनकजननभूवं प्राप्य सा क्षेममूर्तिन्नरपतिमभिलिषे नेतरं राजपुत्री ।
विकशितसहकारं माधवे मासि लब्धा तदितरतरुजाले मालिनी भूत्समुत्का।
(कार्तवीर्योदय १२।१५३-

यसरी नै द्वादश सर्गको अन्ततिरमा मन्दाक्रान्ता, स्रग्धरा, शिख शार्दूलविक्रीडित, पृथ्वी तथा मालिनीको छटा घटाच्छन्न भएर बसेको छ। सर्गमा 'मन्दाक्रान्तातरुणहरिणी तीरवानीरभूमौ' (१३।२१) आदिमा छ छटा आफ्नो अमर महाकाव्यमा प्रयोग गरेका छन् ।

अनुष्टुप् छन्दको प्रयोग केवल १५ सर्गमा गरेका छन्, तर त्यहाँ खोलेर २६८ श्लोकसम्म कलम नरोकिकन दगुराएको देखिन्छ । शब्दहरूको हे भए पनि पदलालित्य र रसमाधुर्यमा अन्तर आएको छैन । कविले ९ स पनि श्लोकहरूका मध्यमा अरू छन्द गाभेका छन् ।

अरू काव्यमा नपाइने विशेषता

कार्तवीर्योदय महाकाव्यलाई एउटै आँखाले हेरेर हुँदैन । यसका विशेषताहरू यस्ता छन् जो नैषध, शिशुपालवध, किरातार्जुनीय, हरिवि राघवपाण्डवीय, कृष्णार्जुनीय, रघुवंश आदि प्रसिद्ध ठूला मानिएका काव्य पनि पाइँदैनन् । फुटकर रूपमा कसैले लेखेका छन् भने बेग्लै कुरा हो । तर सम्म नपाइएको शैलीमा अकारादि वर्णक्रम क्ष, त्र, ज्ञसम्मका ९९ श्लोक कविले सप्तम सर्गमा दिएका छन् । त्यसो गर्दा पनि प्रसङ्ग र कथावस्तुमा पर्न दिइएको छैन । काव्यगत सौन्दर्यमा पनि कमी ल्याएको छैन । यस प्रका महाकाव्य अहिलेसम्म यही मात्र हो भन्दा अत्युक्ति नहोला । यस दृष्टिले सु दत्तको यो महाकाव्यको सातौं सर्गसँग तुलना गर्न सकिने महाकाव्य देखिँदैन । यो कार्तवीर्योदयको अमर विशेषता हो । महाकाव्यमा हुनुपर्ने त गुण र प्रयोग यस काव्यको सातौं सर्गमा पूर्ण रूपले भएको छ । यस प्रका चमत्कारपूर्ण शब्दालङ्कार यसै सर्गमा छ । आठौं सर्गमा कविले ८४ अल प्रयोग गरेका छन् । अर्काको उधारो लिने कवि र महाकविहरू पनि धेरै तर अलङ्कार र ओज, माधुर्य, प्रसाद गुण आदि पूर्वाचार्यहरूकै मान्दै पनि उद्धरण स्वतन्त्र रूपमा कविका आफ्नै छन् । यी विशेषताहरू अरू महाक हरूमा पाइँदैनन् । यसरी अन्यका महाकाव्यलाई सुकृतिदत्त सूरिको महाक सँग तुलना गर्नु पनि अनधिकार चेष्टा मात्र हुनेछ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कार्तवीर्योदयको रीति

कविले यस महाकाव्यमा विशेषतया सबैभन्दा सजिलो वैदर्भी रीति नै अपनाएको देखिन्छ कतै–कतै 'समासबहुला गौडी' भनेर गौडी रीतिको दिग्दर्शन पनि गरिएको छ। परन्तु वैदर्भी रीति नै मुख्य रीति भएको छ। कतै–कतै पद-हरूमा पाञ्चालीले पनि ठाउँ पाएको छ। रीतिका सम्बन्धमा आलङ्कारिकहरूले उपमा अलङ्कार र वैदर्भी रीतिको परिपाक अवस्था दर्शाउने कालिदास हुन् भनेर औंल्याएका छन्। भारविलाई अर्थगौरव सुम्पेका छन्। दण्डीलाई पदलालित्यका सम्राट् भनेका छन्। यसै गरी 'माघे सन्ति त्रयो गुणाः' पनि भनेका छन्। फेरि 'नवसर्गगते माघे नवशब्दो न विद्यते', अर्थात् माघको शिशुपालवध काव्यको ८–९ सर्ग पढिसक्दा कुनै नयाँ शब्द रहदैनन् पनि भन्छन्।

फेरि कुनै विद्वान् पड्केर गर्जिए — 'उदिते नैषधे काव्ये क्व माघः क्व च भारविः'। अर्कालि पनि 'काव्य' भन्ने शब्दलाई छोडेर 'भानौ' वा कसैले त 'सूर्य' आदि पद जोडेर हरिसुत श्रीहर्षको नैषधलाई नै सर्वश्रेष्ठ काव्य ठह्र्याए। रस, छन्द, अलङ्कार रीति, अभिधावृत्ति, लक्षणा, व्यञ्जना आदिको सफल प्रयोगले यो सर्वगुणसम्पन्न महाकाव्य हो भनेर धेरैले भनेका छन्। महाकवि सुकृतिदत्त सूरिले श्रीहर्षलाई पनि ललकारेको देखिन्छ। कैयौं पद्यहरूमा देवगुरु बृहस्पति पनि गुरुकृपाले अनुगमन गर्नेछन् भन्ने महाकविको गर्वोक्ति सुन्न नसक्नेहरूले कार्त-वीर्योदय महाकाव्यमा रीतिको अभाव देख्नेछन्। कैयौं मानिएका आलङ्कारिक-हरूले प्रेसकापी देखेर नै कविको लोकोत्तर वैदुष्यको चमत्कार मात्रै हो भनेका छन्।

आलङ्कारिकहरूले वैदर्भीको दश गुण मानेका छन्। जस्तै —

श्लेषः प्रसादः समता माधुर्यं सुकुमारता।
अर्थव्यक्तिरुदारत्वमोजकान्तिसमाधयः॥
इति वैदर्भमार्गस्य प्राणा दशगुणाः स्मृताः।

यसलाई भरत, दण्डी, आदिले स्वीकारेका छन्। तर वामन भने दश शब्द-गुण र दश अर्थगुण मान्दछन्। मम्मट, आनन्दवर्धन आदिले ओजमाधुर्य र प्रसाद गुणभित्रै अरू गुणलाई अन्तर्भाव गरेर मानेका छन्। सुकृतिले मानेका कुरा काव्यभित्र स्पष्टै छ। नमूनाका रूपमा वैदर्भीलाई हेरौं —

अनेन यूना तव कम्बुकण्ठि त्वयैव शोभास्य धराधिपस्य।
तडिद्विलासेन विना न मेघो मेघं विना भाति तथा तडिन्न॥

(कार्तवीर्योदय १२।१०५)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वैदर्भी रीतिको अर्को छटा

वैदर्भी रीति रीतिहरूमा सर्वोत्तम रीति हो । त्यसैले सबै कवि र महाक हरूले वैदर्भी रीतिलाई छोडेका छैनन् । बीभत्स, वीर, आदि रसको प्रकट गर्नुलाई गौडी रीतिको शब्दावली उपयुक्त मानिए पनि समस्त काव्य गौडी रीतिलाई राख्न सकिन्छ । धेरै तिक्खर हुनाले गुण पनि दोषजस्तै हु पाञ्चाली मात्रै पनि सर्वत्र हृदयग्राही हुँदैन । 'लाटी' लाई सबैले स्वीकार ग छैनन् । त्यसैले प्रस्तुत महाकाव्यमा वैदर्भी, गौडी तथा पाञ्चाली तीनै रीतिह प्रयोग देखिन्छ ।

वैदर्भी रीतिको एउटा सुन्दर उदाहरण प्रस्तुत छ—

इत्थं सखीवाक्यविलोभिताऽपि सा तत्र भूपे लुलुभे न विज्ञा ।
शौरिप्रभा केनचिदर्थिताऽपि नजातु देवान्तरमभ्युपैति ॥

(कार्तवीर्योदय १२।१

बीभत्स रसमा गौडी रीति

क्रन्दत्फेरुरटत्कफेरुनिपतद्गृध्रं द्रवत्कौणपम्
नृत्यद्भूतगणं हसद्यमभटं कृत्वारिपूर्णाबलम् ।
अस्यार्तजितभानुबाडवबृहद्भानुः प्रतापोत्करः
त्रैलोक्यं तिमिरोज्झितं कलयितुश्चाकल्पमाकल्पते ॥

(कार्तवीर्योदय १२।१

सामान्यतया 'समासबहुला गौडी' भन्ने चलन छ । तर केवल दीर्घ स मात्रै होइन अपितु टवर्ग, रकार आदि कठिन वर्णविन्यासका साथ समासब हुँदा गौडी आफ्ना रूपमा पूर्ण हुन्छ । त्यो यहाँ स्पष्टै छ ।

अनुप्रास र उत्प्रेक्षाको छविमा पाञ्चाली रीतिको छटा

जलजञ्जलवासजन्मना तपसा तत्पदताङ्गतं तनुः ।
यदिदं श्रितचारुहंसकं कविवाक्यैर्मधुरैश्च संस्तुतम् ॥

(कार्तवीर्योदय ८।

यस पद्यमा कविद्वारा पाञ्चाली रीतिको प्रदर्शन अनायास हुन गए अनुप्रास र उत्प्रेक्षा अलङ्कारको सुन्दर छटा प्रस्तुत भएको छ । पाञ्चालीको

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रदर्शन गर्दा अनुप्रासको मनोहर छटा प्रस्तुत भएको छ । साथै लुप्त–उपमा पनि अनायास स्फुट भएको छ । जस्तै—

मदमत्तमरालमानिनी मनसा मन्दगमाभिमानकम् ।
विजहाति विदर्भसुभ्रुवो गतिमालोक्य विलासलालिताम् ॥

(कार्तवीर्योदय ६।६६)

कोमलपदावलीललिता–अनुप्रासबहुला–क्वचित्समासरहिता नै पाञ्चालीको विशेष गुण हो । शुद्ध पाञ्चालीको प्रयोग भएको काव्य जयदेवको 'गीतगोविन्द' प्रसिद्ध छ । परन्तु उपर्युक्त पद्यलाई मनन गर्दा पाञ्चालीमा पनि सुकृतिदत्तको कलम पछाडि छैन भन्ने लागेको छ । ६ सर्ग र १५ सर्गका धेरै जसा पद्यहरू वैदर्भी र पाञ्चालीका छटाले भरिएका देखिन्छन्, तर तीनै रीतिको प्रयोग भएको छ । तथापि आधिक्य कुनचाहिँको छ त्यो अलङ्काररीतिरसास्वादनचतुरजन-समक्ष छोडिएको छ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कार्तवीर्योदय महाकाव्यको संक्षिप्त कथावस्तु

प्रथम सर्ग

महाकवि सुकृतिदत्त पन्त मूलतः तान्त्रिक उपासक थिए । उनका कुलदे लक्ष्मीनारायण तथा इष्टदेवता तारा थिए । ताराका यिनी अनन्य उपासक थि त्यसैले विघ्न शमनको लागि महाकाव्यको मङ्गल श्लोक (शिखरिणी छन्द) आफ्ना इष्टदेव तारालाई स्मरण गर्दछन् । दुइ श्लोकमा ताराको स्तुति गरेप कार्तवीर्य (अर्जुन) को महिमा गान गर्छन्— जसको नाम आज पनि सम भूमण्डलमा विद्यमान छ, त्यस कार्तवीर्यको महिमाको गुणगान गर्दा मेरो बुद्धि वाणी दुवै पवित्र हुनेछन् र मैले लेखेको काव्यकथाले पूर्वज र भविष्यका परम्परालाई पवित्र पारोस् ।

गुणग्राही सत्कवि विद्वज्जन तथा माहिष्मती नगरीको प्रशंसाका साथै रे नदीको हृदयस्पर्शी मनोहर वर्णन छ । यसै प्रसङ्गमा पर्यायमा नर्मदा[1] को प मनोहर वर्णन विलक्षण शब्दावलीमा छ । कार्तवीर्यको राजधानीको वर्णन ग इन्द्रको 'अमरावती' सँग तुलना गर्दै यो दोस्रो अमरावती हो भन्ने कुराको मनो हारी वर्णन काव्यमा पाइन्छ । द्विजबालाहरूले न्याय, व्याकरण, स्मृति आदि अध्ययन गर्ने; अध्यापकगणद्वारा न्यायका पक्ष, विपक्ष आदिमा व्याकरण आख्या कृत्, तद्धित आदिमा साङ्ख्यका प्रकृति पुरुष वेदान्त योग विषय आदि शास्त्रार्थ एवं चर्चा गरिने; नयाँ वसन्त ऋतु सधैं भान हुने; महर्घ हीरा, मोती रत्न आदिले सुशोभित हुने माहिष्मती पुरी छ भन्ने वर्णन महाकाव्यमा कवि

---

१. कैयौं विद्वान्हरूको मनाइअनुसार रेवा र नर्मदा पर्यायवाची संज्ञा हुन् कैयौंले शोणभद्रलाई रेवा भनेर मानिएको हो पनि भन्दछन् । परन्तु ती दु पर्यायवाची न हुन् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गरेका छन् । जसमा दिग्गज विद्वान्हरू विराजमान छन् । जुन नगरीमा श्रीहर्ष-जस्ता खण्डनखण्डखाद्यका पङ्क्तिहरूको खण्डन गर्ने विद्वान् पनि थिए । अथवा कालिदास र भारविजस्ता सुन्दर कविता रच्ने सुकविहरूले भरिएको, कृष्ण र अर्जुनको गीतारूपी युक्तिले सुशोभित भएको त्यो पुरी थियो । कतै उपवन नाना प्रकारका वृक्षलताहरूले सुशोभित भएको छ । जसमा सुन्दर देवाङ्गनातुल्य युवतिहरू विहार गर्छन् । जुन नगरीमा प्रतिगृहहरूमा सधैं द्वारपाल सुसज्जित छन् । सबैलाई क्षेम दिने माहिष्मती नगरीको जय होस् भनी प्रथम सर्गको संक्षिप्त कथा वस्तुको वर्णन गरिएको छ । प्रथम[१] सर्ग जम्मा ४५ श्लोकको छ । यसरी माहिष्मती वर्णनको कथावस्तु प्रथम सर्गमा रहेको छ ।

द्वितीय सर्ग

त्यस माहिष्मती नगरीमा समस्त जनताको हित गर्ने समस्त गुणले युक्त अत्यन्त पराक्रमशाली कृतवीर्य राजाले राज गर्दथे यस सर्गमा राजा कृतवीर्यको विद्या, दान, धर्म, यज्ञ आदिको अत्यन्त मनोहारी तथा हृदयग्राही वर्णन गरेका छन् कविले । महाराजा कृतवीर्यको राजधानी माहिष्मती नै भए पनि उनी तपो-बल र शौर्यले सम्पूर्ण विश्वमा उदीयमान थिए । त्यसैले कृतवीर्यदेखि हार्ने राजा र महाराजाहरूले सुन, चाँदी, हीरा, मोती आदि दिएर बिदा गर्थे । माहिष्मतीका प्रजावर्गले उनको जयजयकार गर्थे । यस्ता सर्वगुणसम्पन्न महाराज कृतवीर्यले सम्पूर्ण सांसारिक बन्धनलाई छोडी मुनिवेश धारण गरेर समस्त विश्वको पूजनीय क्षेमधामस्थित गुरु दत्तात्रेयको आश्रममा पदार्पण गरे । यस सर्गमा अनेक छन्द

१. यस सर्गमा शिखरिणी, उपजाति, इन्द्रवज्रा, उपेन्द्रवज्रा, वसन्त-तिलका, रथोद्धता, शिशुलीला, मालिनी, शार्दूलविक्रीडित र तीन अप्रचलित छन्द गरी जम्मा १३ छन्दको प्रयोग महाकविले गरेका छन् । गुणग्राही विज्ञ पाठक तथा अलङ्कारशिरोमणि विद्वान्हरूले यस महाकाव्यलाई पढ्दा कट्टै 'अशुद्ध' को हिलोले नछ्याप्नुहोला । किनभने महाकविजीका छन्दःप्रबन्ध, अलङ्कारचूडामणि, रसमाला आदि ग्रन्थहरू प्राप्त हुन सकेनन् । मेरो विचारमा छन्दःसम्बन्धी विचार महाकविले आफ्नो स्वतन्त्र रचना 'छन्दःप्रबन्ध' मा गरे-को हुनुपर्छ र आफ्नो स्वतन्त्र मत राखेको हुन सक्छ । त्यसैले महाकविभित्र धेरै ठाउँमा 'पिङ्गलच्छन्दःसूत्र' 'वृत्तरत्नाकर' 'वृत्तमाला' 'छन्दःकौमुदी' आदिमा पाइने छन्दहरूको नियम मिलेको देखिएन । त्यसैले मैले घोर परिश्रम गरेर पनि काट्ने प्रयास गरिनँ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रयोग गर्नुको साथ उत्कृष्ट काव्यात्मक शैलीमा वर्णन भएको छ। यो मह
सुकृतिदत्तको वैलक्षण्य हो। यसरी द्वितीय सर्गमा ५८ श्लोकमा[1] सर्ग
भएको छ।

तृतीय सर्ग

महाराज कृतवीर्य सपत्नीक गुरु दत्तको क्षेमधाममा पुगेपछि उनले
दत्तात्रेयको राजोचित सम्मान र शिष्टाचारपूर्वक प्रमाण गरे। त्यसपछि एक
मा लगेर राजोचित शिष्टाचारका साथ गुरु दत्तात्रेयले पनि राज्यको कुशल
सोधे।

सौभाग्यले मुनीश्वर ! दर्शन प्राप्त भयो। यो सौभाग्य यहाँकै आशीर्व
पाएको हो। यस्ता सम्मानोचित वचनले मुनीश्वर दत्तात्रेयलाई उत्तर दिए
मुनीश्वर दत्तात्रेयले पूर्ण आशीर्वाद दिए। पुत्रवान् हुने आशीर्वाद लिएर महा
कृतवीर्य सपत्नीक आफ्नो राजधानी माहिष्मती फर्के। माहिष्मतीमा प्रजाले
उत्सवका साथ महाराजा र महारानी दुवैको स्वागत गरे। दुवैले प्रजाको कु
क्षेम सोधे। फेरि उसै प्रकार राज्य गर्न लागे। ६२ श्लोकमा[2] यो सर्ग
भएको छ।

चतुर्थ सर्ग

दत्त मुनिले दिएको आशीर्वाद र उपदेशहरूको चिन्तन र मनन गर्द
आश्रमबाट रानीसमेत फर्केपछि संसाररूपी समुद्र पारकर्ता भगवान् चक्रध
पूजा गरे। स्वयं भगवान् चक्रधर अर्थात् विष्णुले नै उनको मूल सन्ततिको र
का लागि जन्म लिए। त्यस बालकको नाम श्वेत=अर्जुन राखे। यि
सम्पूर्ण ब्रह्माण्डमा अघटित घटना घटाउनेछन् – 'अघटितघटना पटीयसी मा
भनियो। विदर्भ देशमा 'कनकप्रभा' नामले श्वेत=अर्जुनकी सहधर्मचरीको रू
अवतरित हुने भन्ने पूर्व सूचनाअनुसार त्यस वचनको पनि पालना भयो। य
सम्पूर्ण लोककल्याणका लागि महाराज कृतवीर्यका पुत्रका रूपमा स्वयं भग

---

१. द्वितीय सर्गमा केवल वियोगिनीमा महाकविले काव्यगत हृदय खोले
छन्। उपसंहार मात्र शार्दूलविक्रीडितमा गरेका छन्।

२. तृतीय सर्गमा स्वागता र मालिनीका धारा बगेका छन्। अन्त
शार्दूलको चालमा सर्गको समाप्ति भएको छ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विष्णुले अवतार लिए । कुरुवंशीहरूको वेदविहित नियम विधानअनुसार सम्पूर्ण जातकर्मादि विधिपूर्वक गरेर निगमविधिवक्ता महर्षि दत्त आफ्नो आश्रम क्षेमधामतिर लागे । यसरी यो सर्ग ७२ श्लोकमा[1] पूरा भएको छ ।

पञ्चम सर्ग

अब नरेन्द्र कृतवीर्यका पुत्र कार्तवीर्य महर्षि दत्तबाट संस्कार पाएर आफ्नै राजसंस्कारले चम्कन लागे । नरेन्द्र आफ्ना राजकुमार कार्तवीर्यको संस्कार सुसम्पन्न भएको देखेर प्रसन्न भए । छैटौं दिन षष्ठीकर्म गरेर एघारौं दिन 'अर्जुन' नामकरण गरे । आफ्नै सदुपदेशका फलस्वरूप दशौं दिन व्यतीत भएपछि नरेन्द्र कृतवीर्यले पवित्र संस्कार गरे । वर्षाकालिक मेघले पृथ्वीमा वर्षा गरेर अन्तरिक्षमा गएजस्तै दत्त मुनि पनि आफ्नो क्षेमधामतिर गए । यता बालक कार्तवीर्य राजभवनमा भुईंमा बामे सर्न थाले । अनेक प्रकारका लीलाद्वारा माता–पितालाई प्रसन्न गर्न थाले । पाँच वर्षको भएपछि राजकुमार कार्तवीर्यलाई अक्षरारम्भ गर्न फेरि मुनि दत्त आए (बाह्रौं वर्षमा वैदिक विधिले उपनयन संस्कार सम्पन्न भएको छ) । त्यसपछि ऋक्, यजु, साम, अथर्व चारै वेद तथा अङ्ग–उपाङ्ग आदि समस्त शास्त्र पढेर पारङ्गत भई अद्‌भुत वैदुष्यले कार्तवीर्य पृथ्वीतलमा चम्किए । यसरी कार्तवीर्यको जन्म र विद्याप्राप्तिको वर्णन पञ्चम सर्गमा महाकविले अत्यन्त मनोहर किसिमले गरेका छन् । ८२ श्लोकमा सर्ग[2] पूरा हुन्छ ।

छैटौं सर्ग

छैटौं सर्गमा कार्तवीर्यले अद्‌भुत तप गरेको वर्णन छ । आफ्ना पिता कृतवीर्यभन्दा पनि ठूलो तथा घोर साधना गरेको देखेर इन्द्र डराए । कार्तवीर्यको तपस्या भङ्ग गर्ने प्रयासमा इन्द्र लागे । तर कार्तवीर्य आफ्ना तपस्यामा जमी रहे । महाकविले यस सर्गमा पनि द्रुतविलम्बित छन्दको माध्यमले अलौकिक वर्णन गरेका छन् । यस सर्गको वर्णनीयता श्रीहर्षको नैषधसँग तुलनीय छ । यो

---

१. चतुर्थ सर्गमा वसन्ततिलका, मालिनी र शार्दूलविक्रीडित छन्दमा काव्यगत कथावस्तुलाई कुँदिएको छ ।

२ पञ्चम सर्गमा इन्द्रवज्रा, कामचारिणी तथा शार्दूलका साथै कतै-कतै नमिल्ने छन्द पनि छन् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सर्ग[1] ६२ श्लोकमा समाप्त भएको छ ।

सातौं सर्ग

सातौं सर्ग कार्तवीर्योदय महाकाव्यको हृदय हो । यस सर्गमा अ
आदिदेखि ज्ञसम्मको वर्णाक्षरक्रम क्रमबद्ध रूपमा प्रस्तुत भएको छ ।
वर्णहरूलाई श्लोकको आदि अक्षर बनाइएको छ । विचित्र वर्णनका सा
अर्थालङ्कारको चमत्कारपूर्ण अलौकिक वर्णन गरिएको छ । आजसम्म उप
काव्यहरूमा यस प्रकारको अर्थालङ्कारिक वर्णन देखिएको छैन । यो सुकृ
सूरिको ठूलो काव्यात्मक विशेषता हो । यस सर्गमा निष्केवलग्रह, निष्केवलता
अनुनासिक, निर्दन्त्य, निरूष्म, एकजातीय, द्विव्यञ्जन आदि र पादगोमू
अर्द्ध गोमूत्रिका, श्लोकगोमूत्रिका, सर्वतोभद्रिका, धनुर्बन्ध, त्रिशूलबन्ध आदि
महाकाव्यगत अङ्ग–प्रत्यङ्गको पूर्णता छ; यसर्थ यो काव्य दर्शनीय भएको
यसरी उक्त विषयवस्तुको सम्पूर्ण वर्णनका साथै कार्तवीर्य तपोवनबाट आ
राजधानी क्षेमपुरी माहिष्मतीमा फर्केको उल्लेख पनि यस सर्गमा भएको
यो शब्द वैचित्र्यले भरिएको सर्ग छ । यस सर्गमा[2] ६६ श्लोक छन् ।

आठौं सर्ग

अष्टम सर्गको कथावस्तु पनि आलङ्कारिक छ । महाराज कृतवीर्य
भएका हुनाले सम्पूर्ण राज्यभार आफ्ना योग्य पुत्र कार्तवीर्य (अर्जुन) का हा
सुम्पिदिए । राज्यका कार्यभारबाट मुक्त भएर महाराज कृतवीर्य फेरि तप
तपोवनतिर लागे । यता अर्जुनले आफ्नो पैतृक परम्पराबाट प्राप्त राज्यको
गुना विस्तार गरी शासन गर्न थाले । समस्त प्रजावर्गलाई पुत्रीकृत बना
कार्तवीर्य भुवनमण्डलविख्यात भए । यस वर्णनमा महाकविले सम्पूर्ण आलङ्का
ताकत लगाएर देखाएका छन् । यस सर्गमा उपमा, पूर्णोपमा, श्रौति, आ

---

१. यस सर्गमा द्रुतविलम्बित, स्रग्धरा तथा शार्दूलविक्रीडित छन्द प्र
भएका छन् । द्रुतविलम्बित छन्दको धाराप्रवाहमा पनि कथावस्तु जस्त
तस्तै छ ।

२. यो सर्ग आलङ्कारिक दृष्टिले काव्यको मुटु हुन पुगेको छ । यसमा इ
वज्रा, उपेन्द्रवज्रा, मिश्रित उपजाति, अनुष्टुप्, वंशस्थ, स्रग्विणी, स्रग्ध
शार्दूल र केही अपरिचित छन्द पनि कत कतै प्रयोग भएको छ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आदि ८२ अलङ्कार प्रयोग भएका छन् । साथै क्यच्, क्विप्, णमुल्, लुप्त, प्रयोग पनि गरेका छन् । सर्गको अन्तमा प्रसाद, माधुर्य, ओज गुण प्रयोग भएका छन् । गुणसाङ्कर्य पनि मननयोग्य छ । यसरी अर्थालङ्कारको चमत्कारमय वर्णन महाकविले मार्मिक ढङ्गले गरेका छन् । महाराज कृतवीर्यले छोरा कार्तवीर्यलाई राज्यभार दिएर तपोवन गएको मनोहर वर्णन यस सर्गको मूल छवि हो । यहाँ अभूतपूर्व कवित्व प्रदर्शन भएको छ । यस सर्गमा १०१ श्लोकमा सर्ग[1] पूरा भएको छ ।

नवम सर्ग

नवम सर्गमा महाकविले कार्तवीर्य र कनकप्रभाका स्वयंवरका उपक्रममा उनको सौन्दर्य, गुणराशि तथा अङ्गप्रत्यङ्गको अभूतपूर्व वर्णन गरेका छन् । कनकप्रभाको मधुरस्मित, भ्रूकटाक्ष आदि तथा सखीजनोपहसित, ऋतु, वन, पर्वत, आदिको वर्णन यस सर्ग[2]को विशेषता भएको छ । कविको शब्दावली अत्यन्त मनोहर छ । ११३ श्लोकमा कनकप्रभाको वर्णन समाप्त भएको छ । नायिकारसिक जनहरूका लागि यसै सर्गबाट मात्र काव्य प्रारम्भ भएको मानिन्छ । यस सर्गभन्दा पूर्वका सर्गहरू विद्वत्ता र गहनताले परिपूर्ण भएका हुनाले महाकाव्यगत मर्म बुझ्नेहरूले मात्र मधुर रसास्वादन लिन पाउँछन् । 'षष्ठी प्रथमा' पण्डितका बसको छैन । परन्तु यो भन्न खोजेको पनि होइन कि नवम सर्ग एकदमै फ्यातुलो छ । नायिकागत आलम्बन, उद्दीपन, सञ्चारी, व्यभिचारी भाव तथा विप्रलम्भ शृङ्गार मर्मज्ञहरूलाई मात्र विशेष रसदायक छ । महाकवि सुकृतिदत्त सूरिको अद्भुत वर्णन शैलीले अवश्य प्रभाव पार्छ ।

दशम सर्ग

यस सर्गमा कनकप्रभालाई साक्षात् जनार्दनको चक्रावतार अर्जुनकी योग्य महिषी देखाउनुका साथै विदर्भगमनको वेला मार्गमा पर्ने ऋतु, खोला,

---

१. यसमा पनि अनुष्टुप्, वसन्ततिलका, मालिनी, स्रग्धरा, शार्दूल र अरू छन्द पनि मिश्रित भएको देखिन्छ । यो सर्ग पनि (काव्यको दृष्टिले) छन्द र विषयवस्तुको दृष्टिले अभूतपूर्व देखिन्छ ।

२. नवम सर्गमा अनुष्टुप्, वियोगिनी, मालिनी, उपजाति, स्रग्धरा, शार्दूल छन्दका साथै माफ्न्-माफ्मा अरू छन्द पनि चुनेका छन् ।

CC-0. Nepal Sanskrit Academy - Kathmandu Collection

नाला, वन, पर्वत, मन्त्री, सेवक, सुतारे आदिको वर्णन मार्मिक ढङ्गले प
छ। कुण्डिनेश भोजपुत्री राजकुमारी कनकप्रभासँग निकट भविष्यमा स्व
प्रायः निश्चय भइसकेको हुनाले वन्दीजनले जयजयकार गर्दै हिंडे। यस्तो मङ्ग
वेलामा यात्रा गर्दा मदोन्मत्त सेनामा भएका गजसमूहको ध्वनिले पनि म
जनाउँदै थियो। यस प्रकारका मङ्गलमय वेलामा क्षेमाङ्कबाट विदर्भका
महाराज कार्तवीर्यले प्रस्थान गरे। यसरी यस काव्यमा महाकाव्यगत गुण
हृदयहारी वर्णन भएको छ। ११८ श्लोकमा दशम सर्ग[1]को वर्णन पूरा हुन्छ।

एकादश सर्ग

जन्मेदेखि लिएर महाराजा कृतवीर्यका पुत्र कार्तवीर्य–अर्जुनले अहिले
अमङ्गल देखेका छैनन्। उनको सर्वत्र जयघोष भइराखेको छ। महार
कार्तवीर्यको (शयन, उत्थान, स्नान आदि) सम्पूर्ण क्रियाकलाप शास्त्रीय
राजकीय ठाँटबाँटको भइराखेको छ। महाराज कार्तवीर्यको शयन उत्था
प्रभातबेलाको मनोहरमूर्तिको वर्णन चित्रकार सुकृतिदत्त सूरि जस्ताका तूलिका
नै सम्भव थियो। यस सर्गमा प्रभातवर्णन र स्वयंवरस्थलगमनवर्णन वस्तु
कविहृदयले गरेको छ। प्रत्येक श्लोक मननीय र तुलनीय छन्। १२० श्लोक
यो सर्ग[2] समाप्त भएको छ।

द्वादश सर्ग

यस सर्गमा विदर्भाधिपति महाराज कार्तवीर्यको राजकीय वैभवयुक्त स्वयं
वरको वर्णन भएको छ। महाराजा कार्तवीर्यको स्वयंवरमा कुरुवंशीय रा
मथुराधीश, वाराणसीका भूपति, अवन्तीनाथ, पाटलीपुत्रका भूपति आदि
उल्लेख महाकविको मधुर लेखनीले उतारेको छ। यस वर्णनमा पुष्पपुरको सुना
ताको उल्लेख तथा शिप्रा (क्षिप्रा) नदीको उल्लेखका साथै मध्य उज्जैन
भूगोलको पनि उल्लेख भएको देखिन्छ। यसै सर्गमा प्रसङ्गवश आनन्दका

---

१. यस सर्गमा पनि छन्दको धेरै जटिलता देखिन्छ। वसन्ततिलका, इन्द्र
वज्रा, उपेन्द्रवज्राको भेद उपजाति, कतै स्वागता र कामचारिणी, कतै मालिनी
र शार्दूलबाहेक कैयौं अरू छन्द पनि मिश्रित छन्।

२. यस सर्गमा पनि अनुष्टुप्, मालिनी, द्रुतविलम्बित, वियोगिनी
शार्दूलविक्रीडितका साथ अरू छन्द पनि मुछिएका छन्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विश्वेशनगरी, वाराणसी, काशी, मुक्तिक्षेत्र आदिको उल्लेख तथा 'काशी' शब्दको व्युत्पत्तिलभ्य अर्थ दार्शनिक विचारको छ । जहाँ धरित्रीपुरुहूत पुत्री र नवयौवन परिपूर्ण जुंगाको कोमलरेखा रेखित सर्वगुण सम्पन्न तथा वीर शासक कार्तवीर्यको उपमा दिने शब्द नै छैन । यसरी महाराज कार्तवीर्यको अभूतपूर्व स्वयंवरवर्णनमा यो सर्ग समाप्त भएको देखिन्छ । १५७ श्लोकमा यो सर्ग[1] पूरा भएको छ ।

त्रयोदश सर्ग

यस सर्गमा कविले कार्तवीर्यको वर्णन गरेका छन् । पूरा सर्गमा कार्तवीर्यको महत्त्वाकांक्षा उनको ऐश्वर्य तथा सौन्दर्यको वर्णन कविको काव्यात्मक विशेषता भएको छ । भावी पटरानी कनकप्रभा र उनका सखीजन विलासवतीवर्णनले काव्यरसिकहरूको मन अवश्य हर्नेछ । तपोवनबाट अर्थात् दत्ताश्रमबाट सर्वशास्त्रपारङ्गत तथा सर्वगुणसम्पन्न भएर आएका योग्य पुत्रलाई राज्यभार सुम्पेर कृतवीर्य वन गएपछि सुन्दर पत्नी प्राप्त गरेर कार्तवीर्यले प्रजालाई प्रसन्न पारेर राज्य गरे, प्रजाले कार्तवीर्यको जयजय मनाए, कार्तवीर्य पनि सुखी भएर भूलोकको इन्द्र बने आदि वर्णन यस सर्गको विषयवस्तु हो । ५४ श्लोकमा यो सर्ग[2] पूरा भएको छ ।

चतुर्दश सर्ग

यस सर्गमा नारायणचक्रावतार महाराज कार्तवीर्यको स्वयंवर कुण्डिन नगराधीश महाराज भोजकी पुत्री राजकुमारी कनकप्रभाका साथ भएको उल्लेख कविले साक्षात् देखेजस्तै गरेका छन् । कार्तवीर्य स्वयंवर गरेर कुण्डिन नगरबाट फर्केपछि विदर्भदेशको राजधानी माहिष्मतीमा आए । एक दिन महाराज कार्तवीर्य र महारानी कनकप्रभा रेवा नदीमा स्नान गर्न जाने खबर पाएर दशास्य रावण पनि सन्ध्या पूजाको व्याजले रेवानदीको तटमा आए । जहाँ राजारानी स्नान गर्दै थिए । सामान्य बहानामा कार्तवीर्यले रावणको पूजासामग्री सबै हरण

---

१. यसमा पृथ्वी, उपजाति, वसन्ततिलका, शार्दूल, मन्दाक्रान्ता, स्रग्धरा, शिखरिणी, मालिनी आदि र अरू नबुझिने छन्द पनि गाभिएका छन् ।

२. यसमा– अनुष्टुप्, उपजाति, शार्दूल, मन्दाक्रान्ता, मालिनी, छन्दको प्रयोग भएको छ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गरे । त्यसपछि दुवैको घमासान युद्ध भयो । रावण हाऱ्यो । कार्तवीर्यले लाई आफ्नो वशमा पारी माहिष्मती नगरीमा लगेर थुने । यसरी यस कार्तवीर्यको स्वयंवर र रावणको घमण्ड भङ्ग गरेको रमणीय कविताबली हृदयस्पर्शी वर्णन भएको छ । रावणको दर्प भङ्ग भएपछि आफ्ना बाजे पु रावणलाई छुटाएर लगे । यसरी १२३ श्लोक[१]मा यो सर्ग पूरा भएको छ ।

पञ्चदश सर्ग

यो सर्ग महाकाव्यकार सुकृतिदत्त सूरिको भौगोलिक अध्ययनको कस रूपमा आएको छ । नर्मदा, रेवा नदीमा जलविहार गर्दा महाबली रावण दलन गरेपछि भोजकुमारी कनकप्रभाका साथ पृथ्वीतल सप्तद्वीप उपक्रम यसै बेला प्रावृट् वर्णन मनोहर रूपमा गरेका छन् । फेरि लगत्तै शर प्रारम्भ भयो । दुवै ऋतुहरूको हृदयग्राही वर्णन यस सर्गको मुटु हो । त्य प्लाक्षद्वीपको उपद्वीप तथा तीर्थहरूको दर्शन गर्दै हरिभद्र आदिमा स्वै विहार गरे । यसरी नै शाल्मलीद्वीप, कुशद्वीप, जम्बुद्वीप, आदि सप्तद्वीपको गरे । ती द्वीपहरूसँग सम्बन्ध राख्ने समुद्रहरूको विहार गरेर राजा तथा दुवै आनन्दित भए । जम्बुद्वीप आदिमा पर्ने केतुमाल, मानसरोवर कैलास, धान, गन्धमादन आदि पर्वतहरूको दर्शन गर्दै भरत[२]द्वारा पालित भारत आइपुगे । यसरी अलकनन्दा नदीमा स्नान गरेर वाराणसीका विश्वनाथको गरे । प्रयागराजमा गङ्गायमुनामा स्नान गरेपछि माहिष्मतीबाट राजा सवारी लिन मन्त्रिगण तथा सभ्य नागरिक आए । माहिष्मतीमा पुगेपछि राज कार्तवीर्य र महारानी कनकप्रभाको जयजयकार मनाइयो । यस सप्तद्वीप वर्णन गर्दा भूगोलको वर्णन स्वाभाविक हुन गएको छ । प्रावट् ऋतुहरूको मनोहारी वर्णन यसको विशेषता हो । २७० श्लोकमा पञ्चदश टुङ्गिएको छ ।

---

१. चौधौं-सर्गमा उपजाति, वियोगिनी, पुष्पिताग्रा, शार्दूल र मिश्रित छन्दको प्रयोग भएको छ ।

२. भरणात् पोषणात् चैव मनुर्भरत उच्यते । यस इतिहासको मनुले शासन गरेको देशलाई 'भारत' भनेको हो ।

३. यस सर्गमा पूरै अनुष्टुप् छन्द छ । अन्त्यमा वसन्ततिलका र विक्रीडित छन्दद्वारा सर्गको उपसंहार भएको छ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

षोडश सर्ग

वस्तुतः यो सर्ग कैयौं वर्षपछि थपेजस्तो लाग्छ । किनभने महाकविले १५ सर्गको पुष्पिकामा आफ्ना इष्टदेव भगवती पराम्बा तारिणीलाई काव्य सर्मपित गरिसकेका छन् । परन्तु पछि कार्तवीर्य पनि केवल सम्राट् मात्र थिएनन्, विद्वान्, कवि, कलाकार र दार्शनिक पनि थिए । यता महाकवि पनि समस्त शास्त्र पारङ्गत भएर वृद्ध भइसकेका थिए । दुवैलाई जीवनको अन्त्यतिर वैराग्यले मोक्षको इच्छा हुनु स्वाभाविक थियो र स्वाभाविकै हो पनि । षोडश सर्गमा महाराज कार्तवीर्यले पनि मोक्षको इच्छा गर्दा मुक्तिको बारेमा निकै खोज गरेका छन् । महाराज कार्तवीर्यले महारानी कनकप्रभासहित मनु आदिको नियमअनुसार वर्णाश्रमधर्मको पालन गर्दा भोगवाहिनी प्रवृत्तिदेखि भक्तिवाहिनी प्रवृत्तितिर लागे । अनेक यज्ञकुशल विद्वान्हरूलाई बोलाएर दर्शपौर्णमास, अश्वमेध, वाजपेय, विश्वजित् आदि यज्ञादि गरी प्रशस्त दान दक्षिणा दिए । सय करोड कर लिने शासकले एक करोड दानै दिएर समाप्त गर्थे । यसरी कवीश्वर कार्तवीर्यले फेरि समस्त तीर्थहरूको भ्रमण र स्नानबाट पुण्यार्जन गर्न थाले । कार्तवीर्य देवऋण, ऋषिऋण पितृऋण तीनै ऋणबाट मुक्त भएर दर्शनशास्त्रको चिन्तन गर्न लाग्छन् । जगत्को कार्यकारणभाव, जीवात्मा र परमात्माको ऐक्य विचार, शक्ति र शक्तिमान्को विचार, जीवगत प्रकृति तथा माया र ब्रह्मविचार आदि पर्याप्त रूपमा महाराज कार्तवीर्यले विचार गरेका छन् । यस प्रसङ्गमा वैशेषिक र नैयायिकहरूका पीलुपाकवाद र पिठरपाक वैनाशिक तथा विवर्तवाद आदिका चर्चा हुन पुगेका छन् । मीमांसक, साङ्ख्य आदिको मुक्तिलाई अस्वीकार गरेर चिदानन्दमयस्वरूप प्राप्ति नै मुक्ति हो भन्ने कुरा कविले कार्तवीर्यका मुखबाट स्वीकार गरेका छन् । यसरी मोक्ष प्राप्तिका लागि महारानीसहित महाराज कार्तवीर्य क्षेमाङ्क माहिष्मती नगरीदेखि मोक्षनगरीतिर प्रस्थान गरे । यहाँ आलङ्कारिकहरूको भनाइअनुसार 'शान्तोऽपि केचित्' अर्थात् कतिपयले शान्त रसलाई पनि स्वीकार गरेका छन् । महाकवि सुकृतिदत्त पन्तले कार्तवीर्यको मुक्तिलाई शान्तरसमा पर्यवसान गरेको कुरा स्पष्ट छ । यसरी १२५ श्लोकमा सर्गको[1] समाप्ति भएको छ ।

---

१. यस सर्गमा पृथ्वी, वसन्ततिलका, उपेन्द्रवज्रा, उपजाति, वंशस्थ, वियोगिनी, मालिनी, शार्दूल, स्रग्धरा र मात्रामा अरू पनि एक दुइ छन्द परेका छन् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सप्तदश सर्ग

सत्रौं सर्गमा महाकविले आफ्नै वंशपरम्पराको वर्णन गरेका छन् । विद्या कलमवनमा विहार गर्ने विद्वान् राजहंस कूर्माचल निवासी श्रीवसु पन्तका वं रमापति सुधीन्द्र भए । स्वयं वसु पन्त धेरै ठूला विद्वान् थिए । उनका वं रमापति पन्त पनि उत्तिकै ठूला विद्वान् थिए । रमापति पन्त सर्वप्रथम स्वर्ग कालीगण्डकीको तीरमा आए र पर्वते राजाका राजगुरु भए । रमापतिले ल नारायण मन्दिरको स्थापना गरे । रमापतिका हरिराम तथा शिवराम आदि भए । यी पुत्रहरू पनि उद्भट विद्वान् थिए । राजगुरु नै भए । शिवरा यशस्वी पुत्र भवदत्त र रुद्रदत्त थिए । भवदत्त सर्वशास्त्र पारङ्गत थिए । दत्तका धर्म, अर्थ, काम, मोक्षजस्ता पुरुषार्थचतुष्टयका रूपमा चार भाइ भए । क्रमशः जेठा व्यासदत्त, माहिला श्रीदत्त, साँहिला ज्वालादत्त, का सुक्तिदत्त, यिनले आफूलाई सबैभन्दा जघन्य भनेका छन् । यसैबाट थाहा हुन्छ दाजुहरू सुक्तिभन्दा ठूला विद्वान् थिए । तर काव्य सुक्तिको मात्रै देखापर्‍ यस काव्य (कार्तवीर्योदय) मा भङ्गश्लेष, अनुप्रास, अलङ्कार, तथा धीरो नायक आदिको सम्मिश्रणले यसलाई महाकाव्य गुणले युक्त पारिएको छ भ महाकविले स्वयं लेखेका छन् । यस काव्यमा उसैको अधिकार वा उसैको लिन सक्नेछ । जसले महर्षि पतञ्जलिको महाभाष्य, उदयनाचार्य आदि किरणावली, भरतनाट्य, महाभारत आदि समस्त शास्त्रहरूको अध्ययन गरे छ । यसरी शास्त्ररसानभिज्ञहरूलाई तर्जन दिंदै यी मेरा कविता व्युत्पन्नहरू लागि द्राक्षा (अंगुर) जस्तै गुलियो अनुभव हुनेछ र अव्युत्पन्नहरूका लागि वि जस्तै हुनेछ भन्छन् ।

अन्तिममा आफ्ना कवितालाई छोरी बनाएर सम्झाउँछन् हे कवि मजस्तो सरल कविताका अनुरागको पात्र को होला त ? तिमीले चिन्ता नलेऊ । किनभने सुक्तिको तपोबलले त्यस्ता अनुरागभाजन पनि जन्मि छन् । भएन भने यो मेरो सेवा गर्ने जेठा छोरा बृहस्पतिले नै तिम्रो उद्धार गर्ने त्यो नभए कान्छो छोरा पद्मनाभले अवश्य तिम्रो उद्धार गर्नेछ । मेरो स्वर्ग पछि तिमीहरू तीनमध्ये तिमो (काव्य) कान्छो भएको हुनाले तिमीलाई भाइले अंश दिएर उद्धार गर्नेछन् । तर जहाँ अनेक गुण हुन्छन्, त्यही दोष हुन्छ । विज्ञजनहरूले दोष देखेर निन्दा गरून् कि गुण देखेर प्रशंसा गरून् उहाँहरूकै माथि छोडिन्छ । हे तारे ! जस्तो भए पनि यो महाकाव्यरूपी तिम्रै चरणकमलमा अर्पण गर्दछु । यसरी अर्पण गरेपछि (वि. सं. १९२८ तारिणीकृपाले यो काव्य चिरञ्जीवी होस् । मजस्तै परिश्रम गर्नेहरूलाई आ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

देओस् भनेर काव्य समाप्त गरेका छन् । ३७ श्लोकमा कविले सप्तदश सर्ग[1] पूरा गरेका छन् ।

□

१. यस सर्गमा पनि वसन्ततिलका, शार्दूल, मन्दाक्रान्ता, शिखरिणी, स्रग्धरा, पुष्पिताग्रा, वियोगिनी, पृथ्वी यी आठ छन्दबाहेक अरू छन्दको पनि अतिक्रमण भएको छ । महाकविले छन्दमा विशेष पाण्डित्य देखाएको देखिन्छ । किनभने प्रथम सर्गदेखि लिएर अन्तिम १७ सर्गसम्ममा प्रयोग गरिएका छन्दहरू मध्ये कुनै कुनै सर्गलाई छोडेर प्रायः सबै सर्गमा केही नयाँ नियमको छन्द प्रयोग गरेजस्तो लाग्छ । त्यसैले धेरै ठाउँमा छाँटकाँट गर्ने प्रयास नगरेको हो । किनभने कविको ग्रन्थ प्राप्त नभएसम्म यो विषय शोधखोजको गर्भमा रहनेछ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कार्तवीर्योदय महाकाव्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कार्तवीर्योदयमहाकाव्ये

प्रथमः सर्गः

कृपापारावारोल्लसदमदकल्लोलसुभगा-
 श्चतुर्वर्गस्तोमार्पणपणकृतां[1] भोः कृतिकलाः ।
हरब्रह्मादीनां प्रतिदिनमलङ्कांक्षिततराः
 कटाक्षास्तारिण्या मम विदधतां विघ्नशमनम्[2] ॥१॥

इन्दीवरच्छन्दकसुन्दराङ्ग[3]
 दोर्भिश्चतुर्भिरभिराजितमस्तभीति ।
ताराभिधानममलं हृदये ममास्तु[4]
 त्रैलोक्यतापशमने प्रथितं[5] महस्तत्[6] ॥२॥

---

१. ख–मातृकायां प्रारम्भे श्रीसरस्वत्यै नमः । कार्तवीर्योदयन्नाम महाकाव्यं प्रारभ्यत इति । ख. मा. 'कृती' इति पाठः ।

२. रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणी । इति ।

३. ख. मा. 'इन्दीवरेन्द्रदलसुन्दरसुकराङ्ग' इति पाठः ।

४. ख. मा. 'चकास्तु' इति पाठः ।

५. क. मा. 'प्रसितं' इति पाठः ।

६. पद्येस्मिन् प्रथमचरणे-एकादशाक्षराणि सन्ति । ततस्त्रिष्वपि पादेषु चतुर्दशाक्षराणि न महाकविवैपरीत्येन जातम् । परमत्र लिपिकरानवधानतया स्खलितमिति प्रतिभाति । आलङ्कारिकसमयानभिमतमेव वक्तुमुचितम् । परन्तु महाकवेस्स्वतन्त्रग्रन्थे 'छन्दप्रसादे' प्रचलितच्छन्दसां समालोचनापूर्वकस्वाभ्युपगतच्छन्दसान्नियमास्सन्तीति प्रतिभाति । यतो हि बहुत्र प्रचलितनियमानुसारेण छन्दसां मात्रावर्णसामञ्जस्यं न तिष्ठति । 'छन्दप्रसादे' करामलकीभूते समीचीनतयेदमित्थन्तया निर्णेतुं शक्यते । तथापि–उपजातिजातिभेदेन समाधातुं शक्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यन्नामवाम[1]गुणदामसुरामकीर्तिः
अद्यापि भूमिवलयं विमलीकरोति ।
तस्यार्जुनस्य चरितं महितं यथा[2]धीः
सङ्कीर्तयामि निजबुद्धिविशोधनाय ॥३॥

यच्चिन्तनं हरति चेतसि जातमात्रं
दुर्ध्यानमाशुवितनोत्यपि[3] चित्तशुद्धिम् ।
संशोधयन्निह गिरं निज[4]कीर्तनीम्मे
स्वे[5]च्छामयो हि[6]स हरिः कृतवीर्य्यजन्मा ॥४॥

यस्यावदातगुणराशिनिवासहेतोः
ब्रह्माण्डवृन्दमपि सङ्कटमेव[7] गेहम् ।
किम्मा[8]त्यसौ कृतिकृतेऽत्र निपानमध्ये
क्षीरोदधिप्रमथनाचलवत्सुसूक्ष्मे ॥५॥

किञ्चित्तथा पदमुपाहरिकीर्तने कः
सामस्त्यतो गुणगणं विवरीतुमीशः ।
आसंविदो यदि गृणन्ति समेऽपि धीरा-
बद्धो मया परिकरोऽत्र यदीयरीत्या[9] ॥६॥

---

१. ख. मा. 'धाम' इति पाठः ।
२. क. मा. 'यथाधि पाठः
३. क. मा. दुच्त्रीनमा भुवि तरत्यपि' इति पाठः ।
४. क– मातृकायां नास्ति ।
५. क– मातृकायां नास्ति ।
६. क- मातृकायां नास्ति ।
७. ख. मा. 'संकरमेव' इति पाठः ।
८. ख. मा. 'प्राप्त्यसौ' इति पाठः ।
९. वसन्ततिलकावृत्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भगीरथेनेव मया प्रणीता
दिवो भुवं विष्णुपदप्रसङ्गा ।
भ्राजत्कथानिर्झरिणी विशुद्धौ
समास्तु पूर्वैस्सह चापरेषाम्[1] ॥७॥

सन्तस्सदैव कटुवन्तनिवृत्तचित्ता
वित्ता गुणैस्सुनिपुणै रतिबुद्धिमन्तः ।
ते पक्षगा मम भवन्तु भवन्तु येषां
कारुण्यतो व्रजति सर्वकलाकलापः ॥८॥

अस्ति प्रशस्तैर्विभवैस्समस्तैः
समस्तभूमण्डलमण्डनं सा ।
वस्वोकसाराधिकशारशारा
माहिष्मती नाम पुरी सुरीतिः[2] ॥९॥

यत्र स्थितानां तरुणीगणानां
मणिप्रवालादियुताऽऽपणानाम् ।
विलोकना[3] तथ्यमवैति नाम
तद्रत्नगर्भेति वसुन्धरायाः ॥१०॥

शिरःस्पृशं जह्नुसुतां समीक्ष्य
सर्वञ्च शर्वं प्रतिभा[4] वशेन ।

१. इन्द्रवज्रोपेन्द्रवज्रयोः सम्मिश्रणादुपजातिजातिः ।

२. माहिष्मती नाम विदर्भदेशस्य राजनाधीति । माहिष्मती पुरी सुरीतीति परिकर्मितवचनविन्यासेनेदम्मदीयं काव्यमपि वैदर्भीरीतिप्रामुख्यं भजत इति व्यञ्जितम् । विष्णुपुराणानुसारेण महिष्मान्नामकेन नृपेण संस्थापिता नगरी माहिष्मतीति नाम्ना ख्याता । तस्यां भूयांसो नृपतयो बभूवुः । तेषु कार्तवीर्यः परां प्रसिद्धिङ्गतः ।

३. क. मा. 'ला' इति ।

४. क. मा. 'भ' इति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उत्सङ्ग आधाय मुदा वहन्ती
रेवानदी यत्परिखेव भाति ।।११।।

विलोलकल्लोलसमुत्थितेन
प्रफुल्लपद्मामलगन्धभाजा ।
समीरणेन व्यजनञ्चरन्ती
रेवास्ति[1] सेवाप्रवणैव यस्याः ।।१२।।

नृत्यत्तरङ्गाग्रभुजां विसार्य
व्याकोशपद्मालिनिनादगीता ।
उल्लोलतीरध्वनि[2]चारुवाद्या
तौर्य्यत्रिकं यत्र तनोति रेवा ।।१३।।

सुशीतलामूर्मि[3]भुजां प्रसार्य्य
सभाजयन्ती कलहंसवाक्यैः ।

---

१. रेवा तु नर्मदा सोमोद्भवा मेकलकन्यका (अमरकोशः) अनेन
प्रमाणेन रेवानर्मदयोरभेदः ।

२. अत्र रेवायाश्चारुध्वनिस्तौर्य्यत्रिकं वाद्यविशेषं ध्वनयन् ध्वनिका
व्यञ्जयतीति । अत एव 'भङ्गश्लेषप्रचुरमुदयत्' इत्यादिवाक्यं सार्थकीभ
तथा च पञ्चविधव्युत्पत्त्यापि–अवगमयितुं शक्यते । 'ध्वनतीति यः स ध्व
अनया व्याक्रियया व्यञ्जकशब्दपरो ध्वनिः । 'ध्वनति ध्वनयतीति वा
ध्वनिः' अनया व्युत्पत्त्या व्यञ्जकार्थोऽपि ध्वनिरित्यभ्युपयन्ति संख्यावन्तस्त
'ध्वन्यते यः स ध्वनिः' अनया च व्युत्पत्त्या रसालङ्कारवस्तुविशेषोऽपि
रिति समाचक्षते । ध्वन्यत अनेनेति ध्वनिरिति व्युत्पत्त्या शब्दार्थव्या
ध्वनिः । 'ध्वन्यतेऽस्मिन्' इति व्याक्रियायामाह्लादजनकालङ्काररसादिवस्तु
एव ध्वनिपदेनाभ्युपगच्छन्ति शब्दार्थालङ्कारवादिनः । अत एव ध्वनिस्फो
भेदः । अतः शाब्दिकशिरोमणिना भर्तृहरिणा 'स स्फोटः शब्दजश्शब्दो ध्व
र्युच्यते बुधैः' इत्युक्तम् । अत एव 'काव्यस्यात्मा ध्वनिः' इति ध्वनिकार–आ
वर्धनाचार्य्यैस्समर्थयामास (ध्वन्यालोक १।१) तस्मात्काव्यरसायनरसिकसुकवि
सूरेरपि ध्वनिव्यञ्जकत्वमिष्टमिति । न खलु रेवानदीनदितध्वनिचारुत्वं सम्भ

३. क. ख. 'मूर्मि' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्फुटोत्पलाक्षी परमादरेण
सखीव यं श्लिष्यति सोमपुत्री[1] ॥१४॥

यत्तुङ्गसौधशिखराणि कुरङ्गनेत्रा-
श्रारुह्य नाभिकुचदृष्टिरुचं स्वकीयाम् ।
श्रावर्त्तचक्रयुगलोर्मिषु शोभितासु[2]
पश्यन्ति मेकलभुवः सरितो विदूरे ॥१५॥

यत्र स्थितानामखिलप्रजानां
स्नानेक्षणस्पर्शनपानकार्य्यैः ।
उन्मूलयन्ती च मलं समूलं
सा नर्म्मदा शर्म ददात्यनेकम् ॥१६॥

जजाप[3] दीपानिलये स्थिताः स्वे
गतास्तटे सोमकरोद्भवायाः ।
भूतिप्रदिग्धाः शिवचिन्तकास्ते
क्षमालया रम्यकरा रमन्ते ॥१७॥

सन्त्येव भूमिवलये शतशोऽपि नद्यः
पुण्योऽपि भूरिकमला द्विजसेविताश्च ।
धन्यापगेयमियमेव पुरी च धन्या
नान्या यदत्र शिवलब्धिरयत्नसाध्या ॥१८॥

मञ्जुगुञ्जदलिपुञ्जनिकुञ्जे
नार्मदे मदननर्मदे सदा तु ।

---

१. सोमपुत्री = रेवानदीत्यर्थः ।
२. क. मातृकायां 'शोभमानासु' इति पाठः ।
३. ख. मातृकायां 'जगाम' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सौरभाक्तसुरभौ[1] विहरन्ति
स्फारहारदयितैरिह नार्यः[2] ॥१९॥

तपस्विजनतानता बहुमतागता मेकला-[3]
नता मलजलैः कलैः श्रुतिफलैः कवीशोदितैः ।
यदत्र विहरत्यलञ्जगति शर्मदा नर्मदा
कदापि न मदागमः कलिकृतस्तदत्रोचितः ॥२०॥

कथा भागीरथ्या जगति बहुपथ्यापि न तथा
सतां रथ्यामध्ये विलसति कलिन्दाचलभुवः ।
भवेद्वार्ता का वा हरदयित[4]रेवास्तुतिपदैः
त्रिलोके संव्याप्तेऽर्जुनपुरि[5] सदेयं विजयते ॥२१॥

त्र्यक्ष[6]वन्तमभितोवराधरं[7]
यादवाग्रमुचुकुन्दनिर्म्मिता ।
भूरिजिष्णुगुरुसौम्यसेविता
सा पुरी विजयतेऽमरावतीम् ॥२२॥

शिष्टैर्विशिष्टैर्यशसा गरिष्ठैः
प्रेष्ठैस्सुराणामतिमिष्टचेष्टैः ।
इष्टैर्मनुष्यैरभिवेष्टिताऽसौ
श्रेष्ठा कथं स्यान्नविशेषकाष्ठा ॥२३॥

---

१. ख. मा. 'सुरसौ' इति पाठः ।
२. इयं रथोद्धताजातिः । 'रात् नरौनरलगौ रथोद्धता' इति लक्षणम् ।
३. ख. मा. 'मेकलात्तता' इति पाठः ।
४. ख. मा. 'दपित' इति पाठः ।
५. ख. मा. 'पुरी' इति पाठः ।
६. ख. मा. 'ऋक्षवन्त' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

७. ख. मा. 'अधराधरं' इति पाठः ।

पठन्ति यत्र द्विजवर्यबालाः
   शाला अधिष्ठाय गुरोर्विशालाः ।
ऐकान्तिकत्वे[1] कृतहस्ततालास्
   त्रिपुण्ड्रभाला धृतशास्त्रजालाः ॥२४॥

आन्वीक्षिकी[2] पण्डितमन्दिरेषु
   व्याप्तिप्रसङ्गेन वितायमानैः ।
वादैस्ससाध्यैरपि वाद्यसाध्यैः
   सहेतुपाशैरपि हेतुमद्भिः ॥२५॥

त्रिधा सपक्षैश्च तथा विपक्षैः
   सपूर्वपक्षैस्सह मुख्यपक्षैः ।
या चन्द्रशालासु वितायमाना
   पुरी सदाभ्यस्यति किन्नु तर्कम् ॥२६॥

युग्मकम्[3] ॥

आख्यातकृत्तद्धितप्रत्ययार्थ-
   मुपात्तपूर्वप्रकृतिः प्रयत्नात् ।
कथं सदृश्यं बहुधातुरस्या
   शब्दस्मृतिर्विस्मृतिमेतु तत्र ॥२७॥

चित्रन्तु शब्दस्मृतिभाग्जनोऽपि
   वृद्धचा गुणन्न प्रतिषेधतीह ।
ह्रस्वोऽपि संबुद्धिवशाद्गुणाद्यः
   संबुद्धिनाशे न करोति यत्नम् ॥२८॥

---

१. ख. मा. 'एकान्तिकत्वे' इति पाठः ।

२. प्रत्यक्षागमाभ्यामनु पश्चादीक्षणमन्वीक्षा, अनुमानमित्यर्थः । तया–अन्वीक्षया–अनुमानेन प्रवर्तत इत्यान्वीक्षिकी न्यायविद्या ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

३. पद्यद्वयात्मकेऽर्थसङ्घटने 'युग्मक' मित्यालङ्कारिकपरिभाषितम् ।

आवृत्यनावृत्ति विधाविधाना-
विधायि[1] पूर्वोत्तरतन्त्रविज्ञैः ।
वितायमानश्रुतिमर्म्मधर्म्म-
सुशर्म्महर्म्या क्वचनादि[2] या पूः ॥२९॥

संख्यावतां सांख्यविचारभाजां
प्रधानमादाय समस्तकार्यम् ।
आत्मावगाहिप्रमितिञ्च वृत्तिः
परेतिवादो द्विविधोऽपि यत्र ॥३०॥

योगे वियोगे विपुलार्थराशेः
अहीनवाचः पुरुषा रमन्ते ।
यत्र स्थिताः किन्तु न चित्तवृत्तिः
प्रपञ्चताद्या न विकल्पवादाः ॥३१॥

विशालगृहपङ्क्तिकोपवनमालिनीकृत्रिमा-
भिनव्यनगशालिनी शिखरिणीह कक्षे[3] स्थिताः ।
वसन्ततिलकावली सदृशसुन्दरी संवृता,
कथं रुचिरपद्मका[4] भवतु नैव सैषा पुरी[5] ॥३२॥

यदापणमहांगणे गणितरत्नमुक्तागण-
क्रयोत्सुकनखो[6] जनो विरमति क्षणं न क्वचित् ।

---

१. ख. मा. 'भि' इति पाठः ।
२. क. मा. 'क्वयनादि' इति पाठः ।
३. ख. मा. 'ऋक्षे स्थिताः' इति पाठः ।
४. ख. मा. 'पद्मका' इति पाठः ।
५. पृथ्वी जातिः ।
६. ख. मा. 'नराखो' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समीरशिशिराधि[1]राजितसुधीरकीरध्वनिः
मनो हरति शृण्वतामतिकलश्च यस्यां पुरि ॥३३॥

श्रीहर्षकाव्यमिव सुन्दरसर्गबन्ध-
मानन्दयुक्तमनलङ्कृतमेवनेषत् ।
रम्योज्ज्वलं कलिकथा कलितं यदीयं
जाने[2] जनञ्जनितहीरभवप्रकाशम् ॥३४॥

भूखण्डमण्डनमिदं विमतञ्जयिष्णु:[3]
कीरोक्तिभिर्विशदखण्डरसं महार्थम्[4] ।
ब्रह्मोत्तरं किमपि निर्वचनासहिष्णुः[5]
श्रीहर्षखण्डनमिवातिधिनोति[6] धीरान् ॥३५॥

मन्दमन्दचलिताग्निमित्रका
चित्त[7]तोषककुमारवृत्तका ।
सर्वतो लघुसुवंशराजिता
कालिदासकवितेव सा पुरी ॥३६॥

फाल्गुना[8]प्रकृतपुण्यकर्मणां
ज्ञापितार्जुनयशो विजृम्भिता ।

---

१. ख. मा. 'शिशिरजिस्थिर' इति पाठः ।
२. क. मा. 'जाने जानम्' इति पाठः ।
३. क. मा· 'स्तु' इति पाठः ।
४. क. मा 'महार्थे' इति पाठः ।
५. क. मा. 'श्नु' इति पाठः ।
६. ख. मा. 'बितेति' इति पाठः
७. क. मा. 'मित्र' इति पाठः ।
CC-0. Nepal Sanskrit Academy, Kathmandu Collection
८. क. मा. 'फाल्गुनाग्न्य' इति पाठः ।

उच्छलद्गुणकथाभिराजिता[1]
भारवीयकविता समापिता[2] ॥३७॥

तपसा[3] विदुषाधिगम्यरूपं
पवनव्याधिबलोक्तिभिश्च युक्तम् ।
धृतधर्मसभाभिचारुचर्य्यं
नगरं माघयुगस्यतत्सदृशम् ॥३८॥

चित्रभानुभवभाविभासिता
हृद्यगद्यसुपथा विराजिता ।
साभिनन्दपरिपूरिता पुरी
शूद्रकक्षितिपवर्णना सदृक् ॥३९॥

क्वचिच्छतानीककृतोक्तिसङ्कुला
क्वचित्पुनः पुण्यजनोक्तिशोभिता ।
सर्वत्र सोमोक्तियुता पुरी सा
बृहत्कथा स्यान्न कथं पृथिव्याम् ॥४०॥

कर्णान्तविभ्रान्तनितान्तकान्त-
कृष्णार्जुनात्युक्तिसु शोभमाना ।
सा धार्तराष्ट्रक्षयसूचिनी च
सद्भारती भारतमेव भाति ॥४१॥

पाञ्चालिकाकेशविकर्षिधार्त-
राष्ट्रातिरुष्यद्गुरुताग्रसंसत् ।

---

१. ख. मा. 'राश्रिता' इति पाठः ।
२. कखमातृकयोः 'सा' इति पाठः ।
३. क. मा. 'तपसम विदुषाधि' इति पाठः ।

CC-0. Nepal Samskrit Academy, Kathmandu Collection

गाङ्गेयभासा विशदा पुरी सा
न भारतीवित कथमभ्युपैतु ॥४२॥
सुपर्वगेहावलिभिर्विराजितं
वृषातिकीर्त्या विशदं विशालम् ।
पुरं गुरूक्त्याश्रितधर्म्मराजं
त्रिविष्टपं तत् किमु भारतं तत् ॥४३॥
रामाभिख्याप्रतिपदलसत्पद्मकासद्मनान्त-
भ्रान्तश्रान्तप्रियवचनकृल्लक्ष्मणासारसाद्या ।
कान्तारागस्थलकथनपरा सर्गकाण्डातिचार्वी
वल्मीकाग्रप्रभवसुधियस्सा कृतेस्साम्यमाप्ता ॥४४॥
उपवनतरुमालाचारुबालाविहारः
प्रसभहृतसुशालावासिमर्त्यान्तराला ।
प्रतिगृहचिरकालावस्थितद्वारपाला
जयति वरपुरी सा क्षेमदात्रीजनानाम्[2] ॥४५॥
श्रीमत्कूर्मधराधरेन्द्रवसतिप्रख्यातपन्तान्वये
जातः श्रीभवदत्तपण्डितवरः श्रीभार्गवी तत्प्रिया ।
लेभाते सुकृतिं सुतं निजमतेः संशुद्धये तत्कृते
काव्येऽस्मिन् कृतवीर्यसूनुचरिते सर्गोऽयमादिर्गतः ॥४६॥

इति श्रीसुकृतिदत्तविरचिते महाकाव्ये
क्षेमाङ्के माहिष्मतीवर्णनं नाम
प्रथमः सर्गः[3] ॥

---

१. क. मा. 'शर्म्मं इति पाठः ।

२. क. मा. 'स्त्रीजनानाम्' इति पाठः ।

३. इति श्रीकिरातक्षत्रियकुलसम्भूतस्य मेच्यञ्चलपाँचथरलालिखर्क-वरडाडाग्रामवास्तव्यदोवालीछाचामलिङराईकुलोद्भूतस्य डा. स्वामिप्रपन्नाचार्यस्य कार्तवीर्योदयसम्पादने प्रथमसर्गस्य टिप्पणीपाठभेदादिकं समाप्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कार्तवीर्योदयमहाकाव्ये

द्वितीयः सर्गः

अथ तत्र समस्तवस्तुभि-
मंहितायाञ्जनताहितास्पदः ।
कृतवीर्य इति प्रथाङ्गतो
बहुवीर्यो धरणीश्वरोऽभवत् ॥१॥

मनुना[1]ऽतनुनाऽविता पुरा
सुनयेनास[2] मही सुहर्षिता ।
कृतवीर्यमवाप्य तन्तथाऽ-
नुनयेनास नृपन्न चास्ति तत् ॥२॥

जनताननता न भूपते-
रहिता नो रहिता न संपदा ।
वहिता सहिता[3] न च श्रिया
नरमाना चरमारमारतम्[4] ॥३॥

समयो विनयोदयोदयः
स्मरता यः स्मरतां रुचागतः ।

---

१. ख. मा. 'मनुजा' इति पाठः ।
२. 'आस' इति क्रियापदम् ।
३. क. मा. 'रहिता' इति पाठः ।
४. क. मा. 'चमारतम्' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शिवदोऽशिवदो वदः श्रुतेः
प्रभवद्भावविभा[1]वतो नृणाम् ।।४।।

नगजा नगजा न चाभवत्
तुरगा नातुरगाश्च भूपतेः ।
शकटा निकटास्तथोत्कटाः
पदगाश्चा[2]पदगामिनस्सदा ।।५।।

क्षितिलेखसखो[3]मखैरलं
स हि लेखानखिलान[4]तर्पयत् ।
स्मृतिमात्रसमागतास्सुरा
निजभागं प्रतिपेदिरेऽध्वरे ।।६।।

प्रतिवेलनिपीतसोमजा-
मरुचिन्तस्य नृपस्य संस्तरे ।
कथमप्यमरेशगां रवेः
तनयौ संशमयाम्बभूवतुः ।।७।।

प्रशमय्य नरेन्द्रयज्ञजा-
ममरेशारुचिमश्विनावुभौ ।
भिषजा[5]वपि सोमभागकं
जगृहाते किल पारितोषिकम् ।।८।।

---

१. ख. मा. 'विभावनो' इति पाठः ।

२. क. मा. 'पदगाश्चापदगामिनः' इति पाठः ।

३. क्षितेः पृथिव्या लेखाः देवाः इति क्षितिलेखा भूदेवता ब्राह्मणास्तेषां सखा यः स क्षितिलेखसखः भूपः इत्यर्थः । 'राजाहःसखीभ्यष्टच्' इति टचि रूपम् ।

४. ख. मा. 'नतर्प्पयत्' इति पाठः ।

५. ख. मा. 'भिषजा' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रहभूमिसुरास्सुरा अपि
कुशलामाग्रहसंयुतास्तथा ।
वसुवृष्टिकरेण लालिताः ।
सदृशास्तेऽमृतभोजिनोऽभवन् ।।९।।

बहु[1]वर्षगणातिपातिभिः
कृतवीर्याध्वरकौतुकैस्सुराः ।
निजदारकलाकुतूहलं
चिरलग्नं हृदि ते विसस्मरुः ।।१०।।

विबुधाः शिवशक्रमुख्यका
निजनारीः प्रथमं समर्थिताः ।
इह विघ्नविघातदम्भतः
बहुवर्षाणि समासयन्सुखम् ।।११।।

कृतवीर्य्यनृपाध्वरोद्भवैः
अतिपुष्टा पृथुधूमराशिभिः ।
मुदिरालिरवर्षयज्जलं
जगताञ्जीवनभावनं सदा ।।१२।।

विबुधा न सुधाभिलाषिणः
वसुधा नाकजयिष्णु[2]सद्गुणाः ।
न बुधाश्च सुधागमस्पृहाः
कृतवीर्य्ये सद[3]कर्मसोत्सवे ।।१३।।

---

१. ख. मा. 'बहुवर्यंगणतिपातिभि;' इति पाठः ।
२. क. मा. 'नाकमपि लसद्गुणाः' इति पाठः ।
३. ख. मा. 'सवकर्म' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हयमेधमुखैर्मखैरसा-
वतिदक्षो बहुदक्षिणान्वितैः ।
सुरभूसुरपङ्क्तिकामवत्
समनैषीच्छरदां शतन्नृपः ॥१४॥

चरमेऽवभृथा[1]सुतो नृपोऽ
ध्वरराशेः कनकैरवर्षयत् ।
कनकात्मजमेत्य दीक्षितं
बहु लेभे कनकन्नकस्तदा ॥१५॥

अवसाय सदो[2]त्सवन्निजं
परिधायाभरणाम्बरादिकम् ।
प्रतिबन्धुरसिन्धुरस्थितः
शुशुभे पूर्वगिरौ यथांशुमान् ॥१६॥

स कृती प्रकृतीः शुभाकृतिः
प्रशमय्याविकृतीः सदुक्तिभिः ।
चतुरङ्गबलान्वितो बली
हरितो जेतुमनाः प्रतस्थिवान् ॥१७॥

अतितुङ्गतुरङ्गभङ्गवान्
गजराजव्रजशैलसङ्कुलः ।
रथसार्थतिमिङ्गिलाकुलः
प्रचचालाम्बब[3]लार्णवस्ततः ॥१८॥

---

१. ख. मा. 'प्लुतो' इति पाठः ।
२. ख. मा. सवोत्सवम्' इति पाठः ।
३. क. मा. 'दलार्णव' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अयि भूपतयः पलाय्यताम्
अयमायाति[1] धरापुरन्दरः ।
इति सूचयदाचलच्छलं
पवनान्दोलितकेतनाम्बरैः ॥१९॥

रजसा मलिनाम्बरा मुखैः
विनिगूढैः परिधूसरालिकाः ।
अतिपाण्डुतनू[2]र्दिगङ्गनाः
समपश्यन्नृपसैनिकाऽऽनते ॥२०॥

रणभूमितनूत्थजान्नृणां
वरणायागतनाकनायिकाः ।
मुखमासयितुं पटोपमो
रजसां राशिरगाद्बलाद्वियत् ॥२१॥

चलिते नृपसैन्यसागरे
भरसम्भुग्नसहस्रशीर्षकः ।
कथमप्यहिराट्[3] बभार गां
पृथिवीधारणसत्प्रतिश्रवः ॥२२॥

करवालकरालदोर्द्वितीयः
स विजिग्ये धरणीशमण्डलम् ।
जयघोषसुघोषसत्फलं
बलमेतस्य नृपस्य चाभवत् ॥२३॥

उदिते कृतवीर्यभूभृतः
प्रतपत्सूर्यविकाशि तेजसि ।

---

१. क. मा. 'मदाति' इति पाठः ।
२. क. मा. 'तनूर्हि' इति पाठः ।
३. अहिराट् = शेषनागो गां पृथिवीं बभारेत्यर्थः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नहि पूरितराजमण्डलं
सहनक्षत्रगणैस्तिरोऽभवत् ॥२४॥
नवनीतविनीतमानसः
पदपद्मप्रणतेषु सोऽभवत् ।
अपि[1] लोहकपाटपट्टतः
जठरोराः समभूद्विपत्सु[2] च ॥२५॥
अतिदक्षविपक्षवक्षसां
स्थलमुद्भेद्य कृपाणभाविता ।
नृपकीर्तिलता दिवङ्गता
सुषुवे चन्द्रसुमम्भकोरकैः[3] ॥२६॥
परशोणितपिच्छिलान्तरं
भुजगीभोगविभीषणाकृतिम् ।
अतिसाहसिकी रमायुधा-
मसिधारापथमेत्य तं ययौ ॥२७॥
नृपकीर्तिसुसम्भलीकथा
हृतचेता अभिसारिका रमा ।
रणरेणुसुदुर्दिने पदं
करवालेऽपि निधाय तङ्गता ॥२८॥
चलिते कृतवीर्यचामरे
व्यचरन्नान्यनृपस्य चामरम् ।
इति किं परिधूतचामरः
प्रबभूवास्य पुरो न चामरः ॥२९॥

---

१. ख. मा. 'अति' इति पाठः ।
२. ख मा. 'विषत्सु च' इति पाठः ।
CC-0. Nepal Sanskrit Academy, Kathmandu Collection
३. चन्द्रसुमम् भकोरकैः=नक्षत्ररूपिकोरकैः ।

सरिदीश्वरघस्मरज्वल-
ज्ज्वलनज्वालसख[1] प्रतापकः ।
धरणीवलयं लयार्कवत्-
परिजज्वाल नृपालबाहुजः ॥३०॥

नृपतेः प्रतपन् प्रतापजैः
घृणिभिर्मौषसु वर्णसन्निभैः ।
अपि भूवलये विपक्षभू-
पतिवक्त्राणि विवर्णतां ययुः ॥३१॥

क्वचिदेव कदाचिदेव वा
तपति क्ष्मावलये दिवाकरः ।
कृतवीर्य्यपराक्रमोऽखिलं
तपति क्ष्मावनिमण्डलं सदा ॥३२॥

निजवीर्य्यविदीपितं मही
वलयं कीर्तिसुधाभिवर्षणात् ।
शमयं शमनोपमोद्विषां
सहसैन्यैः प्रचचार भूपतिः ॥३३॥

अपि वंशभवो गुणान्वितः
धृतकोटीयुगलोऽपि तृष्णया ।
मृगयां धनुरस्य लक्षकः
क्वचिदेवाप बहुप्रदान्नृपान् ॥३४॥

अपि वंशभवो गुणोक्षितः[2]
धृतकोटीयुगलं गुणान्वितम् ।

---

१. ख. मा. 'न ज्वालसख' इति पाठः ।
२. ख. मा. 'गुणान्वितः' इति पाठः ।

CC-0, Nepal Sanskrit Academy, Kathmandu Collection

प्रविहाय धनुर्गतिः[1] शरः
नृपतेर्लक्षमवाप कृच्छ्रतः ॥३५॥

असिरेव विकोशकोऽभवन्-
न बलं तस्य गुणोक्तितः शरः ।
न तु मित्र[2]मसार्थमासत
द्विषतां वृन्दमुदीरितन्न तु[3] ॥३६॥

धरणीवलये स भूपतिः
परिखीभूतसमुद्रमुद्रिते ।
अ[4]व्ययुनक्तरि पुञ्जयश्रिया
न धनैः कीर्तिधना[5]त्प्रकीर्तितः ॥३७॥

नृपतिव्रजमौलिमण्डली-
मणिमृष्टाङ्घ्रिनखांशुमण्डलः ।
स जिगाय[6] महीमकृच्छ्रतः
न हि कष्टाद्विजयो यशस्विनाम् ॥३८॥

परिवीजित[7]चामरद्वयः
परिचर्य्याभिमुखावनीश्वरैः ।
न्यवृतत्ससमुद्ररोधसो
जयलक्ष्म्या धरणीपुरन्दरः ॥३९।

---

१. ख. मा. 'गतः' इति पाठः ।
२. ख. मा. 'मित्र' इति पाठ. ।
३. ख. मा. 'न च' इति पाठः ।
४. क. मा. 'अ' पाठो नास्ति ।
५. ख. मा. 'धनाग्रकीर्तनः' इति पाठः ।
६. क. मा. 'स जिणाय' इति पाठः ।
७. क. मा. '[illegible]' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रतिगेहविसारिमङ्गलां[1]
पुरमाविश्य समुत्सुकाः प्रजाः ।
प्रतिपद्विधुवच्च नोदयन्
निजशीतामलगोप्रचारणैः ॥४०॥

समरे विजितान्निजानुगान्
स नृपान्भूरि हिरण्यवर्षणैः ।
विससर्ज यथा स्वकं पुरीः
प्रतियान्तु परितोष्य भूभुजः ॥४१॥

विगते क्षितिपालमण्डले
नृपतेर्मानसमानसेऽद्भुतम् ।
दशदिग्विजयस्य कौतुकं
जनगीतं कतिचिद्दि[2]नान्यलम् ॥४२॥

अथ तस्य समस्तसम्पदां
सदनस्याप्यनपत्यता कृतः ।
हृदये समधीयतातुलो
वय[3]साधिश्चरमेण दुर्जयः ॥४३॥

अपिमेरुविशालमुज्वलं
कनकं सप्तसमुद्रमुद्रिता ।
धरणीरतिजिष्णुसुन्दरी
न रतिन्तस्य नृपस्य चक्रिरे ॥४४॥

चरमर्णविशोधनेच्छया
परितापानलसम्प्रदीपिता ।

---

१. ख. मा. 'मण्डलाम्' इति पाठः :
२. क. मा. 'द्वि' इति पाठः ।
CC-0. Nepal Sanskrit Academy, Kathmandu Collection
३. ख. मा. 'वग्र' इति पाठः ।

नृपतेर्मुखपङ्कजाद् बभौ
पृथुनिःश्वाससततिर्दिवानिशम् ॥४५॥

रमणीविषभृन्मणि[1]समा
धरणीव ह्यरणीसमस्थितिः ।
अपि कोशमकोशखड्गवन्
नृपतेस्तस्य मनो व्यषादयत् ॥४६॥

कलभङ्कुटपा[2]कलो यथा
वननागानवखातपातवत् ।
नृपतिं प्रतिघस्त्रमक्षिणो-
न्निरपत्यत्वभवाधिरुत्कटः ॥४७॥

असुना[3] पिसुनापकारिणा
महिषी तस्य नृपस्य साभवत् ।
विलसद्वसुतापितापिनी
धरणीशोकसरण्यभूत्किल ॥४८॥

क्षणदापि न हि क्षणन्ददौ
सकलश्चास्य दिनश्चतुर्दिनम् ।
निरपत्यतयातिदुःखिते
हृदि चापोह्य न[4] बन्धनम्बभौ ॥४९॥

इति तेन महीभृता धरा
सुतचिन्ताकुलचेतसा तदा ।

---

१. क. मा. 'णी' इति पाठः ।
२. ख. मा. 'कुटपाठलो' इति पाठः ।
३. ख. मा. 'असुतापि सुतापकारिणी' इति पाठः ।
४. क. मा. 'नवद्धनम्' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निहिता सचिवे हिते मते
प्रकृतीनाश्चिरमात्मना धृता ॥५०॥

अवतारित[1]भूभरो नृपोऽ-
नुपदेऽमात्यवरे सुते[2]सुना ।
हृदये न दया तपोनिधे-
रथ दत्तस्य तपोवनं ययौ ॥५१॥

परिवृद्धतपोविभूतिभिः
गतवैरैर्जनिभृद्भिरन्वितम् ।
ऋतुभिर्निखिलैर्यथायथं
कृतपुष्पप्रसवोत्करं परम् ॥५२॥

घनपादपपादवासिभिः
तृणमूलाम्लवारिवृत्तिभिः ।
परनादसुखैर्भयोज्झितैः
मृगपोतैर्मुनिभिर्यथावृतम् ॥५३॥

विलसत्कमलैस्सचारिभिः
कविवाक्यैर्मधुरैर्निनादितैः ।
नृपगेहसमैस्सरोवरैः
सुरसाभोगमनोहरैर्वृतम् ॥५४॥

बहुधान्यभृतालयैर्लसत्
सुवयोभिस्तरुभिस्सुशाखकैः ।
अपि राजकरैस्सुशीतलैः
परिवृद्धैर्गृहिभिर्यथावृतम् ॥५५॥

---

१. ख. मा. 'न' इति पाठः ।
२. ख. मा. '[illegible]' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अपि शालयुतं विशालमेवं
वटरुचा[1]वटसङ्कुलङ्क्वचित् ।
विपलाशगणं पलाशयुतं
मदनाढ्यं मदनान्वितोज्झितम् ।।५६।।

षड्भिरादिक्रिया[2]कुलकम्

समु[3]पेत्य वनं तपोऽवन-
ञ्जनिभृत्यावनमेष भूपतिः ।
मनसा प्रबभार सम्मदम्
मुनिचर्य्योऽचिरतो[4] रमापतेः ।।५७।।

धृतमुनिजनवेषो छिन्नमर्त्याविशेषः
मनसि कृतसुलेखश्चारुता यं विरेखः ।
नरपतिरभिपेदे दत्तनाम्नो महर्षेः
अखिलभुवनवन्द्यं क्षेमधामाश्रमं सः[5] ।।५८।।

आसीत्कूर्मधराधरेन्द्रवसतिप्रखपातपन्तान्वये
जातः श्रीभवदत्तपण्डितवरः श्रीभार्गवी तत्प्रिया ।

---

१. ख. मा. 'वटयुक् चावट' इति पाठः ।

२. षट् संख्याकानां श्लोकानां सम्मेलनाद् अर्थसङ्घटनं भवतीति । तदेवालङ्कारिकपरिभाषया 'षड्भिरादिक्रियाकुलकम्' इत्युच्यते ।

३. आदावन्ते समस्तेऽपि सर्गे वियोगिनी । लक्षणञ्च — 'विषमे ससजा गुरुः समे सभरालोऽथ गुरुर्वियोगिनी' इति निगदितम् ।

४. ख. मा. 'चरतो' इति पाठः ।

५. मालिनीजातिः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लेभाते सुकृतिं सुतं निजमतेः संशुद्धये तत्कृते
काव्येऽस्मिन् कृतवीर्यसूनुचरिते सर्गो द्वितीयोऽगमत्।

इति श्रीसुकृतिदत्तविरचिते महाकाव्ये
क्षेमाङ्के दत्ताश्रमगमनन्नाम
द्वितीयः सर्गः[1] ।।

---

१. इति श्रीकिरातक्षत्रियकुलसम्भूतस्य मेच्यश्चलपाँचथरला... वरडाडाग्रामवास्तव्यदोवालीछाचामलिङराईकुलोद्भूतस्य डा. स्वामिप्रपन्ना... कार्तवीर्योदयमहाकाव्यसम्पादने द्वितीयसर्गस्य टिप्पणीपाठभेदादिकं समाप्तम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कार्तवीर्योदयमहाकाव्ये

तृतीयः सर्गः

पूर्वजन्मभिरथाचरितस्या-
दत्त[1]पुण्यनिवहस्य फलं सः ।
सर्वलोकविषयान्तरवर्त्ति-
स्नेहवारिधितरङ्गसदृक्षम् ॥१॥

भाजनं सुजनतासम[2]दृष्टयो-
र्हेतुभूतमखिलेप्सित[3]सिद्धेः ।
काङ्क्षितं सुरमुनीन्द्रकदम्बैः
वाञ्छितो दवसितं करुणायाः ॥२॥

त्रिभिर्विशेषकम्

जन्मप्रभृति चानुसूयया
लालितं हृदयहारि जन्मिनाम् ।
तस्य दर्शनमुपेयिवान्नृपः
दण्डवत्प्रणिपपात पादयोः ॥३॥

अत्रिजातशिशिरामलपाद-
स्पर्शसौख्यमनुभूय महीन्द्रः ।

१. ख. मा. 'अदभ्र' इति पाठः ।
२. क. मा. 'समदृक्षो' इति पाठः ।
३. क. मा. '[illegible]' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सोऽतिवेलमुदितो निजदेहे
ना ममौ जलधिवच्च तदानीम् ॥४॥

अत्रिभूः सुविनयां बुध[1]मेनं
शीतलामलकरप्रसरेण ।
उन्निनाय निजदर्शनकाले
नैकध्रकमलालयभूतम् ॥५॥

तस्य चौरसपदं प्रयियासुः
श्रीपतिर्मुनिवपुस्तदुरोऽसौ ।
कीदृगित्यभिविलोकयिते वा-
शिलक्षदाशु निजवत्सतलेन ॥६॥

तं मुनिस्सुनिभृतं यथोचितं
संसभाज्य विपथि श्रमं शनैः ।
कौशमासनमधिष्ठितं मुदा
व्याजहार वचनं मनोहरम् ॥७॥

याज्य किं कुशलमस्ति च राज्ये
सप्तसप्तिसमितामलदीप्ते ।
अङ्गसप्तकयुते यत आसीत्
भूतलस्य निखिलस्य पराभाः[2] ॥८॥

वैन्यसच्चरितसैन्यवियोगाद्
दैन्यमाप धरणी बहुकालम् ।
प्राप्य सम्प्रति भवन्तमहीना
हीनबाहुमभिनन्दति कश्चित् ॥९॥

---

१. क. मा. 'विध' इति पाठः ।
CC-0. Nepal Sanskrit Academy, Kathmandu Collection
२. ख. मा. 'परामा.' इति पाठः ।

इष्टकालकमलाभिवर्षिणा
गोत्रपक्षसुखकारिणा त्वया ।
वासवेन च सुनन्दिता मही
दोग्धि किं तव हितं सदा[1]मितम् ॥१०॥

अस्ति किं धरणिपालमण्डलं
त्वत्प्रसादनसमुत्सुकान्तरम् ।
मानसं विगतपङ्कसङ्करं
नाधिवाधितसुखं तवास्ति किम् ॥११॥

दुष्टसत्त्वपरिबाधनतोऽनु-
स्वेच्छयानुपरया विधयानु ।
आश्रमम्मम भवान्सुसमीतो
मुक्त[2]शङ्कमभिधत्स्व नृपाल ॥१२॥

इत्थमुक्तवति संसृतिमुक्ते
मुक्तिमिच्छुरवराति[3] एव ।
ऊचिवान्विनयवर्द्धितरङ्ग-
प्रश्रयवाचमवनीपुरुहूतः ॥१३॥

सर्वशः कुशलमस्ति मदीयं
यस्य चेत्थमनिशं गुरुपादाः ।
संस्मरन्ति भविकं कथमस्य
स्यान्न[4]नमतिभव्यमिह द्राक् ॥१४॥

---

१. क. मा. 'सदायितम्' इति पाठः ।
२. ख. मा. 'मुक्ति' इति पाठः ।
३. ख. मा 'खरणंत एप:' इति पाठः ।
४. क. मा. '[illegible] द्राक्' इति पाठः ।

CC-0 Nepal Sanskrit Academy, Kathmandu Collection

वार्द्धयोऽपि[1] च तरङ्गभुजाग्रैः
शासनं मम शिरस्सु दधन्ते ।
का कथा क्षितिभुजां भवदङ्घ्रि-
धूलिधूसरशिरोरुहजातेः ॥१५॥

कौशिकोऽपि शतमन्युरजैषीद्
भास्वतो बलिमुखानपि शत्रून् ।
भास्वतो बलिमुखोऽपि सुदृष्ट्या[2]
कौशिकीयपदमाप तवैव ॥१६॥

कश्यपस्य तनयः किमु चित्रं
यत्सुरान्नहि विमुञ्चति शश्वत् ।
अन्वभावि भवतावरजत्वं
यत्तदा सुजनविस्मयकारि ॥१७॥

सा त्रिवर्गपरिपूर्तिकरेऽस्मिन्
दृष्टिराप्लुतकृपाभवदीया[3] ।
अत्रिवर्गपरिपूर्तिकरेऽस्मिन्
युज्यतान्नहि कथामपि शश्वत् ॥१८॥

युग्मकम्

किन्नु चोलपरिदर्शितशोभा
वेदिमध्यलसितायतकाञ्ची ।
वक्रितप्रसृतकुन्तलपाशा
सामवादमधुरा सुकरा च ॥१९॥

---

१. ख. मा. 'बाहुंथोपि च' इति पाठः, क. मा. 'वार्द्धयोऽपि' इति
२. ख. मा. 'सुदृष्टा' इति पाठः ।
CC-0. Nepal Sanskrit Academy, Kathmandu Collection
३. क. मा. 'भवदीया' इति पाठः ।

श्रीललाटगतमालवदीप्ता[1]
कामरूपलसिताङ्गविचित्रा ।
नैव हर्षयति मां महिषी य-
मृधु[2]भागतनया धरणी च ॥२०॥

पश्चिमर्णदृढबन्धनबद्ध[3]
चूतपोतमिव सिक्तमदभ्रम् ।
अप्रबाललतया फलहीनं
मां विलोकय कृपालव[4]दृष्ट्या ॥२१॥

मन्दमन्दपरिचालितबाल-
हस्तशस्तपवनस्तपनो मे ।
मन्दमन्दपरिचालितबाल-
हस्तशस्तसुखयोगमनाप्तुः ॥२२॥

युग्मकम्

अप्रकाशितशुभद्विजाधिपं
स्वैरगीतमधुरारवाकुलम् ।
भ्राजिताणुविभाविभासिन-
क्षत्रजातसुषमासमु[5]ज्झितम् ॥२३॥

भूरिभूतकमलोदयान्वितं
वासराननमिवात्मजाननम् ।

---

१. क. मा. 'दिप्ता' इति पाठः ।
२. क. मा. 'यमृद्ध' इति पाठः ।
३. ख. मा. 'बहुचुत' इति पाठः ।
४. क. मा. 'य' इति पाठः ।
५ क. मा. 'समुदितम्' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्वत्कृपारविविभाविभासितं
द्रष्टुमिच्छति मनो ममानिशम् ।।२४।।

पूर्वगर्त्तपरिपातशङ्कितो:
बद्धमुक्तवनसंस्थ[1]नागवत् ।
संरमेप्यवरमेऽवनीतले
नातिमुक्तविलसत्प्रबालके ।।२५।।

तारहारवरभारविहारः
स्फारसारमभिसारिरमाकम् ।
अप्युदारमनुदारमुरो मे
निष्फलं तनयलालनहीनम् ।।२६।।

तत्प्रसीद भगवन्नृणबन्धान्
पैतृकान्सपदि मोचय तावत् ।
किन्नु दुर्लभमिहास्ति नराणां
त्वत्प्रसाददृशमाप्नुवताञ्च ।।२७।।

इत्थमुक्तवति भू[2]मिमहेन्द्रे[3]
प्रेमवारिधितरङ्गसदृक्षा ।
दृक्पपात विमलात्रिसुतस्य
प्राक्पपात तदनूक्तिसुयुक्तिः ।।२८।।

हारचारिमसुहारिरदोत्थ-
ज्योत्स्नयातिविशदा मुनिवाणी ।
साधिकर्णमुखदा मृदुवर्णैः
प्रोच्चचार जलदध्वनिमन्द्रा ।।२९।।

---

१. क. मा. 'स्थ्य' इति पाठः ।
२. क. मा. 'ति' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रूयतां क्षितिपते[1]ऽवधानतो
देवगुह्यमिदमस्ति गोप्यताम् ।
त्वद्गृहेऽवतरति श्रियः पतिः
तत्सुभक्तिभरभावभावितः ॥३०॥

श्रीहरेर्जयरवं विमुञ्चते
यस्य चैकक्कवपुः परङ्कुरे ।
पूर्वदेवपतिसुन्दरीजना-
कल्पचित्रकविलोपकल्पकम् ॥३१॥

तैजसं वपुरिदं रमापते-
श्चक्ररूपमवतीर्य्य ते गृहे ।
सर्वचक्रमविता न चिरेण
वासराननमिवाश्रितपद्मम् ॥३२॥

युग्मकम्

सन्ततानुसृतदानवारिकं
त्वत्कुलङ्कज[2]पतेः कुलं यथा ।
सन्ततानुदितदानवारिणा
मुक्तबन्धनमलं विकाशताम् ॥३३॥

त्वज्जघन्य ऋणमोचनभाव-
माश्रिते न गुरुणा भुवनानाम् ।
द्वीपसप्तकवती विधुनेव
भ्राजतां मृदुकरेण महीयम् ॥३४॥

---

१. ख. मा. 'यते' इति पाठः ।
२. ख. मा. 'यतेः' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुत्रतामुपगतेऽखिलबन्धौ
सिन्धुराजतनया हृदयेशे ।
त्वद्यशोऽतिविमलं सुवितानं
छादयत्वखिललोककदम्बम् ॥३५॥

किञ्च सिञ्च बहिरन्तरपीह[1]
श्रीपतेश्चरणलालनजातम् ।
चेतसि प्रतिदिनं सुखजातं
भाग्यलभ्यममृतं सुदुरापम् ॥३६॥

किन्न सन्ति शतशः क्षितिपाला
नीतिरीतिमतियुक्तिविशालाः ।
अच्युतार्पितपदस्य[2] तवामी[3]
लेशतोऽपि कलयन्ति न साम्यम् ॥३७॥

वर्णयामि तव किं बत भाग्यं
यस्य ते गमति[4] कोमलपादः ।
तात तात इति भाषितयुक्त
आगमिष्यति[5] हरिः शिशुवेषः ॥३८॥

श्रीहरेरभिधया घटिताख्यं[6]
धारयन्[7] हरिणपोतमवाप[8] ।

---

१. क. मा. 'रन्तरणोह' इति पाठः ।
२. क. मा. 'यदस्य' इति पाठः ।
३. ख. मा. 'नच मी' इति पाठः ।
४. ख. मा. 'गमिति' इति पाठः ।
५. क. मा. 'आक्रमिष्यति' इति पाठः ।
६ ख. मा. 'रव्यां' इति पाठः ।
७. क. मा. 'सन्धारयन्' इति पाठः ।
८. क. मा 'अवायः' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शम्भुशीर्षवसतिं द्विजराज-
स्त्वत्कुलप्रथमजो नृपवर्यः ॥३९॥

त्वद्[1]गृहेऽवतरितुं रमापतिः
कञ्चिदेव समयं प्रतीक्षते ।
धान्यबीजमिव सङ्गतं मृदा
वृष्टिकालमभिनव्यजन्मने ॥४०॥

वर्षमेकमुपधावमुरारि-
तीव्रभक्तिसचिवस्सहदारः ।
सेत्स्यते तव मनोरथ एष
त्वत्प्रमाणपथगा यदि च स्म ॥४१॥

सन्तु चोढवलयोऽखिला नृपाः
सन्तु चोढवलयोऽखिला गृहाः ।
सन्तु चोढवलयोऽखिला गृहा
अस्तु दर्भवलयः करस्तव ॥४२॥

भक्तिरेव भगवत्पदसंस्था
सर्वमर्थनिवहं परिसूते[2] ।
यत्र तद्द्विपदसंश्रयशक्तिः
पूर्वतन्त्रनिपुणा इदमाहुः ॥४३॥

भाक्तमर्थमपहाय सुहृद्यं[3]
शोभते न कुशलं पदमीषत् ।
गौणभक्तिरपि मानवमर्गिन
सन्तनोति किमु सा सुनिरूढा ॥४४॥

---

१. ख. मा. 'त्वद्गृहे' इति पाठः ।
२. ख. मा. 'परिस्कृते' इति पाठः ।
३. ख. मा. 'सुद्यम्' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वार्थसङ्ग्रहविसर्जनभेदान्
न्याय्यमेव खलु भक्तियुगं तत् ।
तत्तृतीय[1]प्रथमात्मविचारे
चक्षुरान्नुवति सोऽयमिहाध्व ॥४५॥

न प्रयोजनमृते सुनिरूढां
तां च भक्तिरधुनास्ति नराणाम् ।
युज्यते[2] द्विविधभक्तिरपीहा-
लङ्कृतत्विषि हि वामनवक्रे[3] ॥४६॥

भक्तिमार्ग इति नैकविधोऽस्ति
व्यञ्जयत्यभिधयापि दुरापम्[4] ।
योऽर्थसार्थमुपपत्तिसमीतो
गाङ्गतोऽपि तटतोऽतिशुचिश्च ॥४७॥

योगशक्तिरपि भक्तिसहाय्या
तत्र भक्तिरभिशक्तिविहीना ।
तन्[5]मात्रनिपुणा इति चोचुः
तत्र तन्त्रमतमार्गविरोधः ॥४८॥

द्वीपनाकुनलिनोदरजातैः
पूर्वजातविबुधैः प्रगृहीते ।

---

१. ख. मा. 'तृनीय' इति पाठः ।

२. ख. मा. 'पूज्यते' इति पाठः ।

३. 'सादृश्याल्लक्षणा वक्रोक्तिः' काव्यालङ्कारसूत्रे । सादृश्यमूला लक्षणा वामनमते वक्रोक्तिरलङ्कारः ।

४. क. मा. 'भञ्जयत्यमिव पापिदुरापम्' इति पाठः ।

५. क. मा. 'शन्नमात्र' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भक्तिमार्ग इह मा विमूखभू-
रन्यथार्थनिवहो निखिले स्यात् ।।४९।।

भ[1]क्तिरेव हरयेऽपि[2] रोचते
न श्रियो गणयते सविभ्रमम् ।
तोयपूर्णघनमध्यसंलस-
च्चञ्चलातिचपलोदयप्रभम् ।।५०।।

तन्महीन्द्रपृथुभक्तिभावितः
श्रीपतेश्चरणपङ्कजद्वयम् ।
बाह्ययान्तरगणो[3]ऽप्यखण्डितं
पाञ्चरात्रकथितार्चयार्चय ।।५१।।

गच्छ साधय समीहितकार्य्यं
साधयामि भवदीप्सितमाशु ।
आत्मनाप्युभयथा श्रुतिवाक्याद्
विष्णुनारमविरामविहीनम् ।।५२।।

एष तेऽर्चनविधिं सरहस्यं
वश्यचित्तमुपास्यमनुञ्च ।
सर्वविष्टपसमस्यसमस्य
तस्य पश्य कथयामि समस्य ।।५३।।

---

१. द्रुतस्य भगवद्धर्माद्धारावाहिकताङ्गता ।
सर्वेशे मनसो वृत्तिर्भक्तिरित्यभिधीयते ।।
(भ. स. ३)

२. क. मा. 'हरयेति' इति पाठः ।

३. ख. मा. [illegible] इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सो[1]मसोदरमनीश्वराम्बुदे
एवमुक्तिममृतं प्रवर्षति ।
भूपतिर्बहुकलापशोभितः
तापमुज्झति पुरा प्रनृत्यति ।।५४।।

आससाद विनयेन भूपतिः
सोऽन्तिकं मुनिकुलेशितुस्ततः ।
अग्रही[2]च्च विधिवत्तदोदितं[3]
मन्त्रमर्चनविधिं मुरद्विषः ।।५५।।

सा[4]तिचीर्णतपसोऽथ भास्वतो
माधवार्पितविसारितेजसः ।
निर्गतोपदिशि कर्मणोर्विभा-
व्यद्युतन्नृपहृदम्बुजं मुनेः ।।५६।।

सानिरस्य नृपचित्ततमिस्रं
सन्ततान सविशेषमनी[5]षाम् ।
यत्र सर्वकरणीयपदार्था
भूपतेर्विलिखितास्समभूवन् ।।५७।।

उन्मिमील नृपतेर्मुनिविद्या
योगतोऽस्य नयनं करणीये ।

---

१. ख. मा. एवमुक्तिममृतं प्रववर्ष सोमसोदरमुनीश्वराम्बुदे ।
तापमुरुति पुरा प्रनृत्यति भूपतिर्बहुकलापशोभितः ।।५४।।
२. क. मा. 'अग्रही' इति पाठः ।
३. क. मा. 'रितं' इति पाठः ।
४. ख. मा. 'समि' इति पाठः ।
५. ख. मा. 'सविशेषमनीषाम्' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सौरदीप्तिभरमेत्य विशालं
  भास्करोपलविभेव तदानीम् [1] ।।५८।।

दत्तेन दत्तेन मुनीश्वरेण
  विद्याशिषासौ परिपूर्णकामः ।
विज्ञाप्य विज्ञाप्यमम्ं मुनीन्द्रं
  स्वकं पुरन्तु यियेष राजा ।।५९।।

अथ मुनिरपि भूपं साशिषा वर्धयित्वा
  त्रिभुवनगुरुणा त्वं पुत्रवान्संभवेति ।
कतिपयलवयुक्तं दारसारानुयातं
  व्यसजत सुरराजं गोष्पतिर्वेष्टसिद्ध्यै ।।६०।।

कतिपयदिनराज्यामार्गमेव व्यतीत्य
  क्षितिपतिरतितोषात्स्वां पुरीं सम्प्रपद्य ।
मृदुनयनवचोभिः क्षेमजातं प्रजानाम्
  अमृतरससदृक्षैस्तञ्चकाराचिरेण [2] ।।६१।।

---

१. ५८ श्लोकपर्यन्तं स्वागता जातिः । तल्लक्षणञ्च– 'स्वागता रनभगैर्गुरुणा च' । यद्यपि मध्ये क्वचिद्यतिभङ्गः क्वचिच्छाब्दिकप्रतिज्ञाभङ्गोऽपि दरीदृश्यते ।

२. इतः परं ख मातृकापि विच्छिन्नास्ति । एषा तृतीयसर्गात्मिका मातृका प्रियपण्डितप्रवरभरतराजपन्तसौजन्येन हस्तीकृता । शुद्धाशुद्धिविषये द्वे मातृके समाने स्तः । वाराणसेयसरस्वतीभवनस्था मातृकापि सर्गत्रयात्मिकैव वर्तते । समुपलभ्यमाने त्रिसर्गात्मके काव्ये पं. जनार्दनपाण्डेयस्य लघीयसी टीका तथा भूमिकापि विद्यते । परञ्च पाण्डेयस्य बहुत्रैकपक्षीयविचार असमीचीन एव प्रतिभाति । असमीचीनत्वञ्च ग्रन्थप्रकाशनानन्तरञ्चागमिष्यति । इतः परं कार्तवीर्योदयमहाकाव्यस्य मातृका मया न लब्धा । यद्यपि बहुभिर्विद्वद्भिर्बहुत्र मातृकाविषये चर्चाः कृताः । द्वाविंशतिपञ्चविंशतित आरभ्य पञ्चषष्टिसर्गात्मकं कार्तवीर्योदयमहाकाव्यमिति मयाकर्णितमासीत् । परन्तु केनापि विदुषा काव्यमनवलोक्यैव मुखरितमिति [illegible] । [illegible] मूलकाव्यं सप्तदश-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीमत्कूर्मधराधरेन्द्रवसतिप्रख्यातपन्तान्वये
जातः श्रीभवदत्तपण्डितवरः श्रीभार्गवी तत्प्रिया।
लेभाते सुकृतिं सुतं निजमते संशुद्धये तत्कृते
काव्येऽस्मिन्कृतवीर्यसूनुचरिते सर्गस्तृतीयो गतः ॥६१

इति श्रीसुकृतिदत्तविरचिते महाकाव्ये क्षेमाङ्के
तृतीयः सर्गः[1] ॥

सर्गात्मकमेव काव्यम् । सप्तदशसर्गे कवेर्वंशपरिचयमात्रमुपलभ्यते । एवं
काष्ठमण्डपराजकीयाभिलेखालयतः सप्तदशसर्गात्मकं काव्यं 'डङ्गोल' स्य सौजन्येन
मया पञ्चाशदुत्तरसप्तशतं रूप्यकाणि दत्वा प्राप्तम् ।

१. इति श्रीकिरातक्षत्रियकुलोत्पन्नस्य मेच्यञ्चलपाँचथरलालीखर्क
वरडाडाग्रामवास्तव्यदोवालीदाचामलिङराईकुलोद्भूतस्य डा. स्वामिप्रपन्नाचार्यस्य
कार्तवीर्योदयसम्पादने तृतीयसर्गस्य टिप्पणीपाठभेदादिकं समाप्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कार्तवीर्योदयमहाकाव्ये

चतुर्थः सर्गः

दत्तप्रदत्तमुपदेशमथाधिगम्य
माहिष्मतीपतिरसौ महिषीसमेतः ।
चक्रे सचक्रधरपूजनमप्युदारं
सारं जनैर्भवपयोनिधिपारकारम् ॥१॥

अर्काक्षमाल्यवरपङ्करपद्मभामा
भूमिपते अजयतो हरिमन्त्रराजम् ।
क्षीरोदजा मृदुकरामृदितम्मुरारेः
गङ्गाप्रवाहपरिवीतमिवाङ्घ्रिपद्मम् ॥२॥

निर्णिक्तदेशवसतिर्विरतिर्जनौघे
पथ्यं मितं सदसनं वचनञ्च तादृक् ।
श्रद्धाश्रुतिस्मृतिवचस्सु मनो विशुद्धिः
शौचं द्विधा रुरुचिरे नृपनायकाय ॥३॥

योगासनं समधिरुह्य समीकृताङ्गं
प्राणा[1]न्नियम्य हृदि चिन्तितविष्णुमूर्तिः ।
नासाग्रदृष्टिरभिनिर्जितकामलोभ-
क्रोधादिको नरपतिर्नियतो बभूव ॥४॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१. क. मा. 'णम्' इति पाठः ।

पञ्चभिः कुलकम्[1]

योगीन्द्रचित्त[2]कृतरागवशेन[3] किं वा
श्रीहस्तकोकनदसङ्गवशेन किं वा।
उद्यत्[4] रवीन्द्रपरिवेषवशेन किं वा
दैत्येन्द्रवक्ष्यगलदस्रवशेन किं वा ॥५॥

रक्तं समस्तभुवनस्य जनस्य चोर्ध्वं
मस्मात्प्रवृत्तिरिति सूचयितुं विशालाम् ।
विश्राणमात्मविससूनविलूननाला-
तन्तूपमानसमितां लसदूर्ध्वरेखाम् ॥६॥

संसारिणां कापथगामिचेतोः
माद्यन्मतङ्गजबलं दलितुं दधानम् ।
रेखासृणिं सुमसृणामघवृन्दगोत्र-
प्रध्वंसनाय च पविञ्जिजभक्तिभाजाम् ॥७॥

संसारतापपरितप्तजनस्य शैत्य-
सम्पादकं वसु दधल्लसदातपत्रम् ।
चक्रञ्च दक्षिणभुजस्य समीर्षयेव
लक्ष्मीनिकेतनसुकेतनमादधानम् ॥८॥

अङ्गुष्ठमूलपरिनिर्मितगाङ्गभङ्ग-
च्या[5] सङ्कल्पितपताकमभीष्ट[6] सिध्यै ।

---

१. अत्र पञ्चपद्यात्मकैर्वाक्यार्थावगमने 'पञ्चभिः कुलकम्' इत्युक्तम् ।
२. क. मा. 'त्र' इति पाठः ।
३. क मा. 'से' इति पाठः ।
४. क. मा. 'उद्यत्र' इति पाठः ।
५. क. मा. 'न्या' इति पाठः ।
६. क. मा. 'अभिष्ट' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लक्ष्मीपतेश्चरणपङ्कजमत्युदारं
ध्यायन्परामुदमवाप महीमहेन्द्रः ॥९॥

ध्यात्वा चिरम्मनसि कल्पितपापचिन्त्या
संपूज्य बाह्यपदनिर्मितयार्थयामि ।
आरब्धपूजनमसौ धरणीबिडौजा
अष्टश्रवोमुखसुरेश्वरपूजितस्य ॥१०॥

आपादमस्तकमनुत्तमदीप्तिदीप्तां
ध्यात्वा चिरं हृदयपङ्कजकर्णिकायाम् ।
प्राणाध्वजाञ्जलिसुमेषु निधाय[1] राजा
मूर्तिं हरेर्न्यधितरत्नमये सुपीठे ॥११॥

न्यस्यासु जीवविषयीणि च तत्र तत्र
भद्रासनोपरिगतं प्रविधाय पाद्यम् ।
अर्घ्यं प्रदाय म[2]धुपर्कमथार्पयित्वा
पञ्चामृतस्न[3]पनमारचयाम्बभूव ॥१२॥

वाङ्मात्रलभ्यनिखिलार्थपरम्परा[4]ऽसौ
वेदाङ्गमीतिसविधाभिरुपाचचार ।
देवम्प्रणम्य च ततस्तवनं व्यधत्त
वागवृत्त्यगोचरगुणस्य यथा मनीषम् ॥१३॥

वैकुण्ठलोककृतचारुविहारलक्ष्मी-
लीलाविलासवसते भुवनाधिनाथ ।

---

१. क. मा. नास्ति ।
२. दधिमधुघृतसम्मिश्रितमातिथेयमित्यर्थः ।
३. क. मा. 'स्तपन' इति पाठः ।
४. क. मा. 'रो' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नागान्तकप्रवहणप्रथिताभिमान-
श्रीमन्मुकुन्दमपिधेहि कृपाकटाक्षम् ॥१४॥

लक्ष्मीपयोधरधराधरमौलिचुम्बि-
धाराधरप्रभतनोऽशमितामरारेः ।
त्रैलोक्यरूपरचनास्थपतेर्निजार्ति-
ध्वंसान्नभूरिसुतनोः परिपाहि विष्णो ॥१५॥

देवारिचक्रशलभू[1]षणचक्रवह्नि-
ज्वालाजटालभुजदण्डकृतावनेश ।
पादाम्बुजार्पणपवित्रिततार्क्ष्यपृष्टा-
नायाससृष्टभुवनक्षणकष्टजातम् ॥१६॥

भूमीतलोच्छृतिविधौ न च सूकरत्वं
किं वा मनस्सुकरमासनवामनत्वम् ।
स्वर्गादनेकमठताशठतामृतार्थे
वेदोद्धृ[2]तौ कपटपाटवमीनरूपम् ॥१७॥

प्रह्लादभक्तिभरवश्यतयाप्यवश्यं
कस्याप्यवश्यमुपास्यविधिंविहस्य ।
कृत्वा मनुष्यमृगराजवपुः प्रपूर्वं
तं पूर्वदेवनिवहे हतवान्पुरा त्वम् ॥१८॥

प्रोच्चण्डगर्जितवितर्जितशीर्णजीर्ण-
धाराधरस्नपितपिङ्गसटाछटाकः ।
भव्याय नो भवतु दिव्यहरिः परीतः
नेत्रप्रभाजिततडित्प्रभरोमराज्या ॥१९॥

---

१. क. मा. 'भो' इति पाठः ।
२. क. मा. 'कृतौ' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

को नाम ना तव गुणानपि दिव्यमूर्ति-
यथार्थ्यतोऽनुभवितुं क्षमते च यत्र ।
मुग्धाङ्गनेव ननेति मुहुर्वदन्ती
किञ्चिच्छ्रुतिः कथय ते श्रितगौणवृत्तिः ॥२०॥

नेत्रं त्वदीय मम भासयते पदन्तेऽ
नन्तस्वपदस्वपरमदोऽपि नभासयितृ ।
भित्वा तदेव तु समेति च तत्र भक्तः
संसारदुःखजलशेवधिवाडवाग्नौ ॥२१॥

तेजोमयेन वपुषेशसहस्रदोषा-
वाच्छादितेन भुवने बहुलोहितेन ।
उन्नद्धचारुगुणबद्धवृषाहिताश्च[1]
मर्यादकेन रमयाखिलजीवजातम् ॥२२॥

इत्थम्प्रपूज्य विधिवत्स्तवनम्विधाय
तस्यान्वहं स्थितवतो धरणीश्वरस्य ।
षष्ट्युत्तरत्रिशतश्च[2] – ममीतो व्यतीतः
कालः कलिन्दतनया समदेहकान्तिम् ॥२३॥

अन्येद्युरर्चनविधेः पुरतो नरेन्द्र
आवाहनं हृदि विचिन्त्य हरेः करोति ।
यावद्ददर्श नवनीरधराभिरामां
तावद्रमापतितनूमुचितां सदैव ॥२४॥

तद्दर्शनोच्छ्वसितचित्रविसारिवृत्ति-
स्तोमाकुलक्षितिभुजा स्वभुजा गृहीतः ।

---

१. क. मा. 'ग्न' इति पाठः ।

२. क. मा. 'प' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुष्पाञ्जलिर्बलिरकारि बलिं छलेन
  सम्बदन्हतः कलिमलापहपादपद्मे ।।२५।।

चेतो समुदितप्रचुरानुकम्पा
  चन्द्रप्रभास्य हृदये सहसा नमन्ती
दन्तप्रभातिविशदस्मितशोभमान-
  वाणीच्छलेन वदनाद्बहिराजमानः[१] ।।२६।।

भवतेश्च वक्रमुदितम्मम चक्ररूपं
  नक्रान्तपादजगशक्रकृतोपकारम् ।
त्वत्सन्तति व्रततिमूलतया गृहे ते
  संरक्षणाय जगतोऽवतरिष्यतीति ।।२७।।

नित्यानुरक्तजगतोऽतिविरक्तमार्गे
  दत्तोपदेशनिपुणस्य च रक्ततास्य ।
प्रेष्टा भविष्यति परं यशसां कदम्बैः
  श्वेताह्वयं विदधतोऽर्जुननामतापि ।।२८।।

ब्रह्माण्डकोटिघटनां घटयत्यजस्रं
  सृष्ट्यादिकालकृतलोचनसञ्ज्ञया मे ।
या सा विदर्भविषये कनकप्रभाख्यां
  मायावतीर्य्य सहधर्मचरी भवित्री ।।२९।।

सम्पद्गुणे न च गुणे पुलस्त्यपौत्रम्
  मध्येसदः परिभविष्यति ते तनूजः ।
भूतञ्च भाविनमहो कमलापवर्गात्
  पश्चात्करिष्यति वृषाणमुदग्रवीर्य्यः ।।३०।।

---

१. क. मा. 'म' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यावत्प्रकाशयति भूमितलं विवस्वान्
यावच्च मेघनिकरः परिषिञ्चतीदम् ।
तावन्महीतलमहीनभुजप्रतापा-
देकातपत्रमविता भविता चिराय ।।३१।।

मध्ये समिन्निवसतोऽस्य सहस्रसंख्यैः
को वा करैर्नरपतिर्न वशम्प्रयाता ।
आनेष्यते विनयमार्गमसौ गुणेन
स्वायत्ततां विरचयन्सदशास्यमज्ञम् ।।३२।।

इत्यूचि[1]वान्विनयनम्रशिरोधरन्तम्
आलिङ्ग्य गाढमदसीयमनो विवेश ।
लक्ष्मीपतिः क्षितिपतिः प्रतिपन्नकामः
न्यस्तां धुरं क्षितितलस्य पुनः[2] प्रपेदे ।।३३।।

सप्तभिः कुलकम्

निर्याति वासरमणेश्चमिते दधार
गर्भञ्जगन्निलयगर्भकलाप्रविष्टम् ।
भर्त्रा हितञ्जलजगर्भमनोज्ञरूपा
राज्ञी समस्तशुभलक्षणलक्षिते हि ।।३४।।

आकृष्य सर्वंजगतो निरमायि किं वा
धात्रा सुरूपमिति संशयकारिणी सा ।
प्रागेव चास कमलापतिमादधत्या
गर्भेण किन्नु कथये सुषुमा मनुष्याः ।।३५।।

१. क. मा. 'विचान्' इति पाठः ।
२. क. मा. 'पुनः' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आपाण्डु[1]गण्डपरिमण्डितमाननाब्ज-
मत्यल्पमण्डनमखण्डयदाशु तस्याः ।
आखण्डलीयहरितः परितः स्फुरन्तः
शुभ्रांशुभाङ्कविबुधान्तरमण्डयमानाम् ॥३६॥

आनीलतुङ्गपरिपूर्णपयोधरा सा
मन्दप्रनृत्तरुचिरोज्ज्वलचञ्चलाक्षी ।
नक्षत्रनायकतिरोहितिकारिणी च
प्रावृड् यथा नरपते महिषी रराज ॥३७॥

आर्द्रक्षमा विपुलकीर्तिरपांशुला सा
सम्पादिनी कतिपयैर्दिवसैः फलस्य
प्रावृड् यथा कृषिकरस्य नरेश्वरस्य
चेतोऽभ्यनन्दयदपल्लविताऽन्तराशा ॥३८॥

क्षामावपुः सिततरं वदनाम्बुजातं
स्निग्धं विलोचनयुगम्मृदुसञ्चरिष्णुः ।
आभूषणं कतिपयं वसनं सुसूक्ष्मं
सा बिभ्रती नरपतेर्मुदमाततान ॥३९॥

सा गुर्विणी गुरुतरं लघुवाप्यवाञ्छ-
द्यद्यत्पदं त्रिभुवनोदरसंस्थितं तत् ।
लोकत्रयाधिपतयः कनकात्मजात-
प्राज्यप्रभावनमिता उपजह्रुराभ ॥४०॥

आध्यात्मिकादिनिखिलस्य जनस्य नूनं
दुःखत्रयङ्गणनया रहितं भविष्णुः ।

---

१. क. सा. 'आपाण्ड' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संसूचयत्तदुदरं त्रिबलीविरिक्तं
शुक्लेन्दुमण्डलमिव क्रमतो विवृद्धम् ॥४१॥

सौन्दर्यसागरतदीयशरीरमध्य-
भ्राजज्जलभ्रमलसद्भ्रमकारि निम्नम् ।
तस्या निजान्तरगचक्रविबोधनाय
सख्यै समुन्नतमभूद्दरनाभिचक्रम् ॥४२॥

आलोगणोऽतिनिपुणो नृपतिप्रदिष्टः
तस्या मनस्युदितमात्रमभीष्टवस्तु ।
चेष्टाबलादनुमितं विहितं कराग्रैः
आदाय पर्यचरदन्वहमिष्टभूतः ॥४३॥

सेवानुरक्तजनतातिनतासमस्तं
सङ्कल्पमात्रपरिलब्धमिहार्थजातम् ।
राज्ञः प्रसादविमलोऽपि च दृष्टिपातः
तद्दोहदोद्भवमघं समयाम्बभूवुः ॥४४॥

सा शारदीव रजनीलसिताम्बरान्ता
तारावलीवलितचन्द्रविकाशिताशा ।
उत्तीर्णशौचगुरुता कृशयापि तन्वा
पर्याप्तभाद्रविधिका ववृधे क्रमेण ॥४५॥

संवेशमागतवती महिषी कदाचित्
पूर्वाबलादुदितमञ्जवनीविकाशम् ।
सिन्दूरपूरपरिपूरितमात्मदर्शं
हस्ते यथा धृतवती रजनीसमाप्तौ ॥४६॥

अन्येद्युरीक्षितवती सुखनिद्रिता सा
जम्भारिकुम्भिपरिरम्भि[illegible] ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संवीज्यमानममरेशविलासिनीभि-
रात्मानमम्बरतले सितचामरौघैः ।।४७।।

सप्तर्षिहस्तगतरुक्मघटीमुखेभ्यो
निर्यातगाङ्गपयसा परिसिच्यमानम् ।
उद्यत्करप्रकरपूर्णनिशाकरस्य
छायानुकारिमुसितातपहारिशीर्षम् ।।४८।।

युग्मकम्

स्वप्नानिमान्नरपतिर्महिषीमुखाब्जा-
दाकर्ण्य कर्णतटसीमचलाचलाक्षीम् ।
आलोक्य तां प्रणयमन्थरदृष्टिपातै-
रानन्दसिन्धुजठरे निममज्ज शीघ्रम् ।।४९।।

सीमन्त[1]पुंसवन[2]मुख्यविधानमार्यैः
गर्भस्य संस्कृतिकरं श्रुतिवत्यनासौ ।
दत्तादिभिर्द्विजगणैर्व्यदधाद्यभाव-
द्विश्राणयन्सुरभिकाञ्चनभूमिवस्त्रम् ।।५०।।

सा गर्भसंस्कृतिमवाप्य नरेन्द्रपत्नी
पूर्वाद्भुतामभूतकामपि दीप्तिराजिम् ।

---

१. सीमन्तोन्नयनं नाम षोडशसंस्कारेषु कश्चन–एकसंस्कारः । तथा च पारस्करगृह्यसूत्रे स्पष्टं प्रतिपादितम्— अथ सीमन्तोन्नयनं पुंसवनवत्, प्रथमगर्भे मासे षष्ठे अष्टमे वा (पा. गृ. सू. का. १ क. ५) ।

२. अयञ्च संस्कारः षोडशसंस्कारेषु अत्यावश्यकसंस्कारः । पुंसवनसंस्कारस्तावत् आर्यसंस्कृतेः जीवनस्य च प्रधानाङ्गः । अयं संस्कारः गर्भधारणानन्तरं द्वितीये वा तृतीये मासे सम्पद्यते । प्रसिद्धतया अयं संस्कारः पुत्रीकरणसंस्कारः इत्युच्यते । पारस्करगृह्यसूत्रे 'अथ पुंसवनम्, पुरा स्पन्दत इति मासे द्वितीये तृतीये वा' (पा. गृ. सू. का. १ क. ४) इत्यादिसूत्रैः प्रतिपादितम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

माणिक्यमध्यखचितात्तपनीययष्टिः
प्राच्योन्मृजामिव महोद्धवसन्निधाने ॥५१॥

काले समस्तजनजीवनपूर्णगर्भा
स्तोकालिभिर्विलसितेक्षणमीक्ष्यमाणा ।
दोषाकरोमिततरा हृदयञ्जहार
सा प्रावृषेण्यरजनीव नरेश्वरश्च[1] ॥५२॥

अथ सितभवस्त्रैः सिद्धसिद्धार्थसार्थैः
चलदलदलमुख्यैः पल्लवैः पूर्णकुम्भैः ।
प्रसवसमनुकूलाताङ्गनारिष्टपृष्टे
नरपतिरतिहर्षादैक्षतारिष्टगेहे ॥५३॥

दिनकृतिशुचिकोणाच्छौचपत्रं गृहीत्वा
गतवति शिववाहं शेखरेश्वरस्य ? ।
मृगयति मृगपङ्कं[1] मङ्गले मङ्गलार्थं
स्थितवति परमोच्चं कर्कमारुह्य जीवे ॥५४॥

वृषरुचिरकरेऽधो[2] भार्गवे शत्रुगेहे
शनिशिखिपरियाते कायगे सौम्यरूपे ।
दरदलदरविन्द्यमन्दमोदाभिनन्द-
द्भ्रमरमधुररावोद्गीतिकां कारयत्सु ॥५५॥

अपगतकलुषाणां दिग्वधूनां मुखेषु... [3] ॥५६॥

---

१. द्वापञ्चाशत्श्लोकपर्यन्तं 'वसन्ततिलका' जातिः ।
तल्लक्षणञ्च–उक्ता वसन्ततिलका तभजाजगौ गः ।

२. क. मा. 'पृकं' इति पाठः ।

३. क. मा. 'थो' इति पाठः ।

४. लिपिकरदोषान्मूलमेव विच्छिन्नं प्रतिभाति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सरसि सरसफुल्लां भोजराजो नदीनां[1]
प्रवहति सलिलेचक्षे वीतिहोत्रेग्निहोत्रे ।
ज्वलति लसदवामज्वालकेऽनल्पकल्प-
द्रुमकुसुमतल्लीमाल्य[2]वल्लीवितानैः ॥५७॥

अमरपुरपुरन्ध्रीश[3]स्तहस्तैर्निरस्तै-
र्नरपतिवरसौधे छाद्यमाने समन्तात् ।
रुचिरकुचतटीभिः कार्श्यराजत्कटीभिः
विमलतरपटीभिर्दिव्यनाट्ये नटीभिः ॥५८॥

अधिपुरमनुगेहञ्चानुहट्टाट्टघट्ट-
रचितरुचितभावैस्साधनैस्साध्यमाने ;
अहह जहति हाहेकाहलध्वानसाहं
द्युतलयुगलगाहं मानसाहस्रमुच्चैः ॥५९॥

अतरुणतरुणौ संख्यातिसंख्यामतीतैः
गुणगणमभिरामैर्मानभिर्दूनमुक्तैः (?)
अधिशयितविमानैस्सङ्कुले मुक्तमानैः
शतधृतिशतयज्ञप्रष्टदेवैर्द्युपृष्ठे ॥६०॥

शतपथपथपान्थैस्सामधामप्रदीपै-
र्यजुरवहितचित्तैर्वित्तशास्त्रैस्सुवित्तैः ।
द्विजवटुभिरहीना रावमुच्चार्यमाणे
शुभवचसि समन्ताद्ब्रह्मकाले समीते ॥६१॥

समभवदभवार्थं भक्तिभाजां प्रजाना-
ममृतविशदकीर्त्या सेचनार्थं त्रिलोक्याः ।

१. क. मा. 'नदीनाम्' इति पाठः ।
२. क. मा. 'माल्प' इति पाठः ।
३. क. मा. 'श्र' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अरुणकमलकान्त्या भासयन्दिग्वितानं
हरिरवनिमहेन्द्राच्चारुकीर्त्याम्बहिष्याम् ॥६२॥

नवभिः कुलकम्[1]

तनयवदनचन्द्रं वीक्ष्य भूभर्तुरासी-
त्तरलतरतुरङ्गानन्दवार्द्धिप्रवृद्धः ।
तदनुबहुवितीर्णस्वातिवृष्ट्या सुवृत्ताः
कति कति नहि मुक्ता जज्ञिरे [illegible] ॥६३॥

प्रथमऋणविमोकं भूसुराणां स चक्रे
चमरऋणविमुक्तो भूमिजानिस्तदानीम् ।
स्फुरति नहि विचारो जातिसाम्ये पदानाम्
उपकृतिकुशलानां पूर्वपश्चात्प्रयुक्तः ॥६४॥

तनयजननपर्वा साज्यलक्ष्म्यं सुलोला
चिरनरपरिभुक्ताम्बिप्रसात्कृत्य राजा ।
सुनवनवमनस्याकल्पशोभां सुकीर्तिं
त्रिजगदतिमनोज्ञामात्मसात्सम्प्रचक्रे ॥६५॥

कनकगिरिगृहन्नो दास्यते किं विसज्य
इति चकितसुरनाथैरक्षणे स वियुक्तौ ।
नरपतिरघुनासौ पुष्पवन्तौ किमेतौ
तदवधि नहि मेरुं मुक्तवन्तौ भ्रमन्तौ ॥६६॥

किमधिकमिहवाच्यम्पुत्रजन्मोत्सवेऽसौ
वसुगणमपवृक्तो यं स्म तं भूरिभावात् ।
दिशि दिशि विनिखायाधाय यातेषु गोत्रा-
दधत वसुमतीति ख्यातिमर्थिव्रजेषु ॥६७॥

---

1. अत्र [illegible] 'नवभिः कुलकम्' इत्युच्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नृपतिविपुलदानं तन्निशम्याद्दुर्विनत-
वितनमौलिर्व्रीडया तत्र संस्थम् ।
सुमनिवहमहासीदन्यथागुल्फदघ्न्प (?)
कनकजनितगेहे पुष्पधूलिः कथं स्यात् ॥६८॥

अथ वितत[1]ततानद्धसन्नद्धकल्पः
मुखरसुषिरमुख्यः कांस्यतालोत्तरश्च ।
दिशि दिशि विजजृम्भे तूर्यचातूर्यधुर्यो-
महितमह उपेतो नर्तकी नर्तनेन ॥६९॥

अमर[2]मुनिविपञ्चीसञ्चितश्रीप्रपञ्चं
मधुरतररवेणापञ्चमं वञ्चयन्ती ।
न घनविजितरम्भाजम्भयत्रोर्विदम्भा
सदसि नटति रम्भा सर्वसम्भावना स्म ॥७०॥

क्वचिदपि हरिणी सा चित्रवृत्तिञ्जहार
क्वचिदपि गुणपेशी मञ्जुकेशी चकाशे ।
क्वचन वशिवशीत्का चोर्वशी नृत्यति स्म
नृपसुतजनिकाले त्वप्सरो नृत्यशाले ॥७१॥

अहिपरिवृढबाला दत्तताला भुजाभ्यां
विकसितनयनाभ्यान्ताम्प्रवृत्तिन्निशम्य ।
अपलपितनिजाङ्घ्रीन् सम्प्रसार्य्य क्षणेन
लयनिलयनिलीना नर्तनं सम्प्रचक्रुः ॥७२॥

---

१. ततवाद्यं लोहतन्तुनिर्मितदत्तात्रेयसरस्वतीनारदादीनां वीणादयः । वितत-वाद्यन्नाम मुरजादिकम् । आनद्धादिकं मृदङ्गादितालवाद्यम् । सन्नद्धकल्पः सज्जीभूतः इत्यर्थः ।

२. न मरन्ति ये त अमरास्तेषाम्मुनिर्देवर्षिर्नारदः । तस्य देवर्षेः नारदस्य विपञ्ची = वीणेत्यर्थः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निमिषतनयनाङ्गैरप्सरोभ्यो विशेषा-
नभिनयपरिबलात्कुण्डलैः कर्णपाशैः।
भुजग[1]पतिसुताभ्यो दर्शयन्त्योज्जुकास्ताः
सरसललितनाद्यन्दर्शयामासुरुच्चैः ॥७३॥

अथ निखिलजनानां क्षेमसम्पादनार्थं
नृपगृहमवतीर्णस्याब्जनाभस्य विद्वन्।
कुरु निगमविधानाज्जातकर्मादिसर्व-
मिति विधिविहिताज्ञो दत्त आमात्स तत्र[2] ॥७४॥

श्रीमत्कूर्मधराधरेन्द्रवसतिप्रख्यातपन्तान्वये
जातः श्रीभवदत्तपण्डितवरः श्रीभार्गवी तत्प्रिया।
लेभाते सुकृतिं सुतं निजमतेः संसुद्धये तत्कृते
काव्येऽस्मिन् कृतवीर्यसूनुचरिते सर्गस्तुरीयो गतः ॥७५॥

इति श्रीसुकृतिदत्तविरचिते महाकाव्ये क्षेमाङ्के
चतुर्थः सर्गः[3] ॥

१. क. मा. 'भ्रूम' इति पाठः।
२. मालिनीवृत्तम्।
३. इति श्रीकिरातक्षत्रियकुलोत्पन्नस्य मेच्यञ्चलपांचथरलालीखर्कं-वरडाङग्रामवास्तव्यदोवालीछाचामलिङराईकुलोद्भूतस्य डा. स्वामिप्रपन्नाचार्यस्य कार्तवीर्योदयसम्पादने चतुर्थसर्गस्य टिप्पणीपाठभेदादिकं समाप्तम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कार्तवीर्योदयमहाकाव्ये

पञ्चमः सर्गः

संस्कारमासाद्य नरेन्द्रसूनु-
र्मुनिप्रणीतन्नितरां दिदीपे ।
प्रागेव हीरो हरते मनांसि
किं लब्धशाणोत्कषणः सवर्ण्यः ॥१॥

तं संस्कृतं वीक्ष्य तुतोष राजा
कृतागमैर्नविवरेण तेन ।
सत्त्वञ्च सर्गादनुरञ्जनं वा
नायोगवाहञ्च तदुचितताऽवैत् ॥२॥

कृशोदरीराजवधूर्विरेजे
जातेन पुत्रेण विशालभासा ।
तीरस्थितेनोपवनेन गङ्गा-
शरत्कृशेवासुमनः प्रियेण ॥३॥

पितुर्जनन्याश्च कुलं विशालं
स पावयामास पवित्रकीर्तिः ।
अवारपारोभयकूलदेशं
भागीरथीजात इव प्रवाहः ॥४॥

षष्ठे दिने तस्य लिलेख षष्ठी
लक्षत्रिपातं ननु सार्वभौमम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तथायुषोऽव्याहतयोगसिद्धि
व्यलीकहीनं ह्यलिकेऽनलीकम् ॥५॥

दिने व्यतीते दशमेऽपि तस्य
स्मरन् गिरं लोकगुरोः पुरोक्ताम् ।
समर्ज्जनादर्ज्जुनकीर्तिराशेः
युक्तञ्चकाराज्र्जुन नाम पुण्यम् ॥६॥

निजोपदेशस्य फलं तनूजं
राज्ञोऽस्य संस्कृत्य मुनिर्जगाम ।
स्वमाश्रमं प्रावृषिकः पयोदो
महीमलङ्कृत्य यथान्तरीक्षम् ॥७॥

काव्यं यथाभ्यासवशेन शक्त्या
प्रावीण्यतः शास्त्रविलोकनोत्थात् ।
पितुः प्रयत्नाददनीययोगा-
त्तथा नियत्या ववृधेऽस्य देहम् ॥८॥

व्यञ्जनाश्रितविचित्ररसाद्यं
मिष्टभक्तिपरमोदनमच्छम् ।
सत्कवेर्वच इवातरलाभं
षष्ठमासि बुभुजे नृपसूनुः ॥९॥

ओद नञ्जनमनोऽतिमोदनं
व्यञ्जनं रसनवृत्तिरञ्जनम् ।
वाधिकन्निखिलभोजनादिकं
निमिषं स बुभुजे सदामिषम् ॥१०॥

---

१. इन्द्रवज्रा जातिः, तल्लक्षणञ्च— स्यादिन्द्रवज्रा यदि तौ जगौ गः ।
२. नरद[illegible] ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मौलिसम्मिलितपाणिपल्लवै-
रीडितोद्भुतसहस्रकारकः ।
चक्रयुग्मरतिदानपेशलः
बालसूर्य्य इव स[1] वृधच्छनैः ॥११॥

यावपङ्कपरिलिप्तसर्जक-
श्रीसमर्जकमरीचिवीचिभिः ।
शेषकल्पकमनल्पतल्पकं
डिम्भ एव सहसा समावृणोत् ॥१२॥

मौक्तिकान्तरसमीतविद्रुम-
स्फारहारसुषमातिशायिनी ।
चन्द्रकल्पमृदुतल्पशायिनोऽ-
नल्पभास्य वपुषो व्यभासत ॥१३॥

मुष्टियुग्ममनुबध्य सन्धयन्
मुक्तिभुक्तियुगलङ्करद्वये ।
गोलकीकृतमिहाहितं परं
व्यापृतिः सुमुखजा प्रतीक्ष्यते ॥१४॥

अन्तरेण न च तां तदध्यते
सूचनामिति ददौ जनाय सः ।
स्वेच्छया विधृतबाललीलया
कार्तवीयङ्गतो विभुः (?) ॥१५॥

युग्मकम्

आत्मनैव परिपूर्णकामनोऽ-
पूर्णकाम इव संरुदन् क्वचित् ।

---

१. क. मा. 'सो' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अर्पितातुलविभूतिराशिको-
लत्ववाञ्छित इव क्वचिद्वसन् ॥१६॥

भक्तचित्रगतपङ्कमार्जना-
प्राप्तिसंशयदलग्नपङ्ककम् ।
पादपद्ममतिकोमलं शनै-
श्चालयन् सहकृतोरुपर्वकम् ॥१७॥

जानुवाकचरणेन सञ्चलन्
षड्भिराहितभरं मुदीयसा ।
षड्विधेन हि बलेन मेदिनी-
चक्रचङ्क्रमणमादिशन्निव ॥१८॥

गाहमान उरसा रसातलं
सम्प्रसार्य्य चरणौ भुजौ पुरा ।
सप्ततोयनिधिकृतावधिक्षमा
सुन्दरीसमुपभोगसंविदे ॥१९॥

दीप्रचारुमणिकुट्टिमे क्वचिद्
वीक्ष्य वक्त्रप्रतिबिम्बमात्मनः ।
मुग्धभावकृतया जिहीर्षयाऽ-
सिद्धया जनमनोऽनुरञ्जयन् ॥२०॥

धात्रिकाकरतलीयतालिका
लालिका ललितलोलिताङ्कः ।
लीलया लसदलोललोचनं
प्रेक्षमाण उरुमानमानितः ॥२१॥

एवमेव शिशुभावभावितैः
CC-0. Nepal Sanskrit Academy, Kathmandu Collection
सत्कवीन्द्रवचसा विकाशितैः ।

पश्यतां हृदयनेत्रतर्पणै-
रत्यगात्सुसरितैः पुरस्समाम् ॥२२॥

सप्तभिः कुलकम्[१] ।

कुन्दकुड्मलविलासहासिना
किञ्चिदुत्थितिमता मताध्वना ।
पेलवद्विजगणेन शोभितं
सस्मितं वदनमावहन्बभौ ॥२३॥

ईषदुद्गतक्रियातिसितद्विजं
भूपसूनुवदनं व्यडम्बयत् ।
स्वल्पलक्ष्यतनु ऋक्षसेवित-
प्रोद्यदिन्दुरिदं मण्डलं श्रियम् ॥२४॥

हारचारिमहरस्मितान्तरं
कुन्दशुद्धदशनं तदाननम् ।
कौमुदीमुदितमङ्गमण्डलं
शारदं समहसत्पृथुश्रिया ॥२५॥

तस्य वक्त्रहिमरश्मिसन्निधौ
दन्तऋक्षतनिराबभौ मनाक् ।
युक्तमद्भुतमिदं पुरोहिणीं
सापटीन्निजरुचासितां व्यधात् ॥२६॥

अङ्कसङ्क्रमितपादपङ्कजा-
लग्नरेफहरिणीकृताम्बरम् ।
सा ननन्द स[२]मामृशञ्शनै-
श्चापकर्षणकिणाक्तपाणिना ॥२७॥

---

१. अत्र सप्तभिः श्लोकैर्वाक्यार्थावगमकत्वात् सप्तभिः कुलकमित्युक्तम् ।

२. क. सा 'सु' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अङ्कमेनमधिरोप्य भूपति-
स्पर्शसौख्यमनुभूतवान्स यत् ।
तत्प्रसादसुलभेऽपि दुर्लभं
भावियुक्तिसुपदेऽपि तत्किमु ॥२८॥

मध्यनिम्नचिबुकस्थिताङ्गुलि-
व्यापृतोन्नति समीक्ष्य चारुताम्¹ ।
तन्मुखं विकचचक्षुषा पिबन्-
स्तृप्तिमाप न कदापि भूपतिः ॥२९॥

लालयन्नुरसि सन्निधाय तं
दत्तसुतविधिनान्तमाधवम् ।
धारणावहितचित्तसङ्गि तत्
पूर्वलालनमुदोऽन्वभूत्पुनः ॥३०॥

रोचनारचितचारुचन्दनं
धाविकानयकृताभिवन्दनम् ।
वीक्ष्य मन्दिरविसृत्वरेन्दिरम्
तन्नृपः परिननन्द नन्दनम् ॥३१॥

मन्दमन्दमुपयन्तमन्तिके
भीतभीतमिव तर्जनामिषत् ।
लोहलं बहलबाललीलया
वीक्ष्य शिक्षतममुं पितातपत् ॥३२॥

तात किन्तव पिताप्रियोऽन्वहं
ब्रूहि सत्यमिति मातृनोदितः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection
१. क. मा. 'त' इति पाठः ।

प्रेक्षमाण उभयोर्मुखाम्बुजे
मुग्धभावमधुरोऽप्यनन्दयत् ॥३३॥

चारुकीर्तिरतिकीर्तिरास तद्
यज्जगत्त्रयगुरुः सशैशवम् ।
दर्शयन्मृदुपदाङ्कमारुहन्
तं ववन्ववचनैरतोषयत् ॥३४॥

कद्दं माङ्क्तितलेन पाणिना
शत्रुदुर्हमपितुर्मुखं स्पृशन् ।
यक्षकर्दमविधाननिर्मितं
तत्र सौख्यसुषमं समातनोत् ॥३५॥

पैत्रमङ्कमधिरुह्य लीलया
वाकुनपिरिरङ्ञ्छिरोंऽशुकम् ।
वेषवायजनकस्य कल्पनां
प्रत्यहं दृढतरामकल्पयत् ॥३६॥

क्वापि नीलमणिकुट्टिमोदरे
स्वेच्छया विहरतः पदद्वयम् ।
तस्य भानुतनया ह्रदान्तरो-
त्फुल्लकोकनदयुग्ममाहसत् ॥३७॥

क्वापि लोहितककुड्यसङ्गतः
भास्कराग्ररुचितस्करच्छविः ।
धात्रिकानयनगोचरो भवत्
तत्करग्रहणमाप कृच्छ्रतः ॥३८॥

स्फाटिकोपलचितान्तरालके
सौधभूधरतटे परिभ्रमन् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दुर्द्दिनेऽपि लसदर्कदीधिति-
श्चाकचक्य परितर्कमातनोत् ॥३९॥

दीप्रहीरकविभाविभासिता
भूषणोद्गतमरीचिवीचिभिः ।
एतदीयव[1]पुषः प्रभाच्छटा
क्षालितेव नितरां विदिद्युते ॥४०॥

नैकवर्णमणिकुट्टिमोदरे
सम्भ्रमभ्रमणतः सबलयन् हसन् ।
सद्य एव पुनरुत्थितः शनैः
कस्य नास हृदयङ्गमः शिशुः ॥४१॥

कुण्डलोल्लसितगण्डमण्डलं
नूतनरत्नतपनीयभूपरम् ।
तं पुरन्दरसुतोपमं परो-
वीक्ष्य वीक्ष्य पितरौ ननन्दतुः ॥४२॥

रिङ्गमाणमजिरे चिरेण तं
प्रस्फुरत्कुटिलकुन्तलावलिम् ।
दिव्यसिंहनखशालिमालया
मालयन्तन्नि[2]पेतुर्निरीक्ष्य तौ ॥४३॥

हूतिहूतिमतियातिदूरतः
स्वेच्छयाङ्कमुपयाति निर्वसन् ।
याचितोऽपि न भुनक्ति सादरं
निर्द्दरं हरति चादनीयकम् ॥४४॥

---

१. क. मा. 'षु' इति पाठः ।
२. क. मा. 'नूपेतुः' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मौनमाश्रयति याचितः पुनः
वक्ति च स्वयमयङ्कुलोदयम् ।
मञ्चमञ्चति विमुञ्चति क्षणाद्
भूतले ललति लीलया पुरा ॥४५॥

नृत्यति द्रवति रौति गायति
ध्यायति प्रलपतीच्छति क्षणम् ।
एवमेव शिशुभावभावना-
नर्घ्यवर्य्यचरितैरतोषयत् ॥४६॥

विशेषकम्[1]

तं तृतीयशरदि स्मृतागतः
संस्मृतागम उपेत्य तापसः ।
तत्कुलोचितविधानविन्मुदा-
लञ्चकार विपनेन साधुना ॥४७॥

अन्वितस्य सवयोभिरर्भकैः
वृत्तमद्रवपनोऽपनोदनः ।
भक्तदुःखनिवहस्य सञ्चरन्
वाहनेन ददृशे जनैर्घनैः ॥४८॥

अस्य नायत शिखण्डमण्डली
मण्डितं वदनमत्यखण्डयत् ।
प्रावृडन्त्यजलदालिमध्यगा-
खण्डमण्डलनिशाकरश्रियम् ॥४९॥

पञ्चमे मुनिरुपेत्य वत्सरे
शारदाहरिगणेशपूजनम् ।

---

१. त्रिभिश्श्लोकैर्वाक्यार्थविगम्यमाने 'विशेषकम्' उच्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संविधाय लिखितमजीग्रहद्
वर्णपङ्क्तिममुमगमाध्वना ॥५०॥

अक्षराणि स पठन्मनीषया-
वद्यकर्मगुणतद्गुणादिके ।
नार्थमधितमुकर्मतद्गुणैः
तद्गुणादिषु च चार्थमादधे ॥५१॥

शारदाम्बुजसदृक्षयन्मुखा-
वासतस्समभवद्विशारदा ।
सारदा त्रिभुवनेऽपि शारदा
सोऽपठीत्कखगघेति विस्मयः ॥५२॥

नेति नेति गदति श्रुतिः सदा
यद्यशोविवरणे विशङ्किता ।
सोऽपठीत्कखगघेति यत्पुनः
लोकशिक्षणमृते किमास तत् ॥५३॥

वासरैः कतिपयैः स्वराभिध-
स्वीयशक्तिपरिरम्भणोदयात् ।
व्याहृतान्परिविचाय लीलया
स्वाङ्कलोवहलनाम कारकान् ॥५४॥

मातृकाभिरभिलालितो मुदा
मातृकां समधिगम्य वाङ्मयम् ।
सन्तितीर्षुरतिदुस्तरार्णवं
सेतुमादितबुधाधिपावलिम् ॥५५॥

स गतः सकविना ससङ्ग्रहः
साम्प्रतमपुत्र इहमनु कौतुकम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दानवारिपरिमोदितः कविः
शम्भुशुक्रमपि नास्मरत्स्वकम् ॥५६॥

नव्यकाव्यमतिभव्यमाददे
कोशकोशमुदघाटयच्छनैः ।
नीतिरीतिमियतीन्नचाग्रहीन्-
नार्त्तिकैर्धववृते स वार्त्तिकैः ॥५७॥

का लिपिर्न लिलिपेऽमुनेक्षिता
भाषिनापि च किमथ भाषितम् ।
का कलास्य विकला बभूव वा
को गुणोऽनुगुणतामिहापि नैत् ॥५८॥

तं द्विषट् छरदमाश्रमागतः
विश्रमं त्रिभुवनोदरश्रियम् ।
आश्रमाधिगतवाङ्मयो मुनिः
वैदिकेन विधिनोपनीतवान् ॥५९॥

रौरवाजिनवृतः सगौरवो-
द्गौरवेण वचसा समग्रहीत् ।
वेदमातरमनारतोत्थिते
वल्लकीजलजवाद्यनिःस्वने ॥६०॥

वेदमातरमवाप्य मातरं
भिक्षितुं स्वटुरागमत्ततः ।
ते उभे अपि वसूच्चयं गुरोः
तोषणाय दिशतः स्म वर्णिने ॥६१॥

तं गुरू रुरुभवेन चर्मणा
वेष्टितं पुरुमनीषमादरात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

साङ्ग[1]वेदमुपशिक्षयन्पुरो-
पाठयत्कुलपरम्परागतम् ॥६२॥

एवमेव उपनीय बालकं
पालकं त्रिजगतो त्रिजोगतः ।
तेन साकमनुकूलचेतसा
प्रेषितेन पठनाय जन्मदा ॥६३॥

आश्रमञ्च समुपेत्य गौरवं
वन्यवृत्तिपरितुष्टमानसः ।
वर्णिनो व्रतमखण्डितं दधत्
स त्रयीमधिजगे गुरूदिताम् ॥६४॥

सा त्रयी हरतनूरिवानल-
स्थापनोपरिगसोमसङ्गता ।
उच्च[2]नीचपद[3]सङ्क्र[4]मा जटा-[5]
वल्लिवेल्लितघना[6] शिखा[7]न्विता ॥६५॥

---

१. मुखं व्याकरणं तस्य ज्योतिषं नेत्रमुच्यते ।
निरुक्तं श्रोत्रमुद्दिष्टं छन्दसां विचितिः पदे ।
शिक्षा घ्राणं तु वेदस्य हस्तौ कल्पान् प्रचक्षते । (षडङ्गनिर्देशे)
अनया दिशा कुलपरम्परागतक्रमानुसारेणाखण्डितं व्रतं दधत्स अर्जुनः गुरूदितां त्रयीं–ऋग्यजुस्सामलक्षणां संहितामधिजगे=गृहीतवानित्यर्थः ।
२. उदात्तानुदात्तस्वरितादिक्रमेण जटापि समधिगता ।
३. पदविच्छेदोऽसंहिता । प्रातिशाख्यसूत्रे कात्यायनः (ऋ. परिशिष्टे)
४. क्रमः स्मृतियोजनः । (प्रा. सू. ४।१८ ऋ. परिशिष्टे)
५. अनुलोमविलोमाभ्यां त्रिवारं हि पठेत् क्रमम् ।
विलोमे पदवत्सन्धिरनुलोमे यथाक्रमम् ॥
६. अन्तात् क्रमं पठेत् पूर्वमादिपर्यन्तमानयेत् ।
आदिक्रमं नयेदन्तं घनमाहुर्मनीषिणः ॥
७. पदोत्तरां जटामेव शिखामार्याः प्रचक्षते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रत्ययप्रकृतिभागभाविता-
वग्रहस्वरितसाधुसेविता ।
रावणोदितमदर्थनाशुगा-
तस्य चेतसि गुरोः श्रुताभवत् ॥६६॥

स त्रयीमपि पुनस्त्रयीं व्यधाद्
धारणग्रहणसंश्रवैर्यतः ।
तच्चतुष्टयगतामता त्रयी
रूढिरेवमिति योगतः कृता ॥६७॥

दत्तदितिसितसहस्रबाहुकः
दत्तदत्तसुसहस्रशाखिकाः ।
सामभूमिरुहसङ्गताः सुखं
सैकदैव जगृहे गुरोर्गृहे ॥६८॥

वाजिरूपहरिणोदितं यजुः
वाजिरूपहरिणाश्रितात्मना ।
वाजिरूपहरिणाश्रितं वनं
वाजिरूपहरिणामुना गतम् ॥६९॥

वेदकाननतले विकण्ठके
शुक्लकृष्णतनुतित्तिरीरितम् ।
अन्वगात्प्रथमजाश्रमे श्रितो
राजसूनुरतिशौनकोद्भुतम् ॥७०॥

तत्र भूपतिवटौ विदा पटौ
भ्राजमानरुचिपद्मकानने ।
ऋग्गणः समधिगम्य विद्युते
प्राह्णकालरविमण्डले यथा ॥७१॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मन्त्रसंयुतमुपाचरद् गणं
ब्राह्मणस्य विकृतौ व्यधत्त सः ।
प्राकृतानुनयमेव कोविदः
विन्ययुङ्क्त च तदर्हकर्म्मणि ॥७२॥

शिक्षयास्य मुखवासशिक्षया-
तात्मसाम्यमभिवीक्षितं क्वचित् ।
कल्पते स्म परिकल्पितोऽमुना
कल्पमल्पितविधिञ्च कल्पकः ॥७३॥

तस्य निर्वचनयोगतोभवत्
श्रौतदुर्गमपदार्थबोधिनी ।
व्याकृतिप्रकृतिकेऽङ्ङ्के क्वचित्
यास्कनामरचिते निरुक्तता ॥७४॥

छन्दसां विचितिमुच्चिचाय यत्
पूर्त्तयेऽमरगिरिक्षमोऽपि वा ।
ज्योतिषामयनमायतायतं
शारदाविलसितैर्विशारदः ॥७५॥

इन्द्ररुद्रमुखनिर्मितं हितं
शब्दशास्त्रमभितं स दृष्टवान् ।
यद्विदामिह नृणान्न दुर्ल्लभं
दैवतापदयुगं प्रकीर्तितम् ॥७६॥

आक्षिपत्स समधत्त च क्वचित्
नूनमैक्षत विवेचनाधिकम् ।
सूत्रवार्त्तिकतदर्थसङ्ग्रहे
लक्षणेक्ष[illegible] ॥७७॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

किं स नाम ननु नाम तत्क्रिया-
प्रक्रियामकृतकां क्रियासु नो ।
कारकं किमुपकारकञ्च नैत्
साधूना[1]मित्यधुनापरा भवेत् ।।७८।।

मानवं वचनमेषमानयन्
मानवं वचनलेशमानयत् ।
मानवन्नवनवन्त्यजन्दधे
योगिगीर्षु निजमानवं धनम् ।।७९।।

द्वीपपालकसुतातिसङ्गतः
व्यासमाप स पुराण ऋषिर्यत् ।
तत्र चित्रमृषिरेव पुराणः
व्याससङ्गमनुभूय तु चित्रम् ।।८०।।

तर्ककर्कशशातिशातना
शातिताखिलपदार्थसंशयः ।
अक्षिपादकणभक्षपक्षयोः
लक्ष्यलक्षणबुधो[2]पलक्षितः[3] ।।८१।।

संख्यामसंख्यास्सांख्यसंख्यावता
सयोगे रूढिं पुंप्रकृत्योर्वियोगे ।
पूर्वे तन्त्रे चोत्तरेऽभूदपूर्वः
गौणं वेदं खेदहीनो विवेद ।।८२।।

दृष्ट्वा वक्षसि सङ्गतां मुररिपोर्लक्ष्मीं सपत्नीश्चिरात्
श्रीवत्सञ्च तदन्वितं बहुदिनं निद्रादरिद्रा क्रुधा ।

---

१. क. मा. 'साधुनामिति धुना' इति पाठः ।
२. क. मा. 'धोत्प' इति पाठः ।
३. दशश्लोकादारभ्य एकाशीतिश्लोकपर्यन्तं कामचारिणीवृत्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अङ्गोपाङ्गसमङ्गसौष्ठववती वासार्थिनी भारती
लब्ध्वा तन्मुखपङ्कजातनिलयं क्षेमं ननर्त्ताद्भुतम् ॥८३॥

श्रीमत्कूर्मधराधरेन्द्रवसतिप्रख्यातपन्तान्वये
जातः श्रीभवदत्तपण्डितवरः श्रीभार्गवी तत्प्रिया।
तत्सूनोः सुकृतेः कृतौ कृतिजनैः कीर्त्यश्रमस्याश्रमात्
काव्येऽस्मिन् कृतवीर्य्यसूनुचरिते सर्गोऽगमत्पञ्चमः ॥८४॥

इति श्रीसुकृतिदत्तविरचिते कार्तवीर्योदयमहाकाव्ये
कार्तवीर्योदयविद्याप्राप्तिर्नाम पञ्चमः सर्गः[1] ॥

---

१. इति श्रीकिरातक्षत्रियकुलोत्पन्नस्य मेचपञ्चतपाँचथरलालीखर्कः वरडाङग्रामवास्तव्यदोवालीछाचामलिङराईकुलोद्भूतस्य डा. स्वामिप्रपन्नाचार्यस्य कार्तवीर्योदयसम्पादने पञ्चमसर्गस्य टिप्पणीपाठभेदादिकं समाप्तम्।

CC-0. Nepal Sanskrit Academy, Kathmandu. Collection

कार्तवीर्योदयमहाकाव्ये

षष्ठः सर्गः

अथ नरेन्द्रसुतः कृपया गुरो-
रखिलवाङ्मयवारिधिपारगः ।
पदमवाप्तुमनाप्तमिवाददे
तपसि वाञ्छितमुत्तमधीषणः[1] ॥१॥

दधति केन तपस्सुमनोजनाः
अशनसंवसनादिविवर्जिताः ।
अयमहो परिखीकृतसागर-
क्षि[2]तितलेशसुतस्तपसे स्थितः ॥२॥

परिचरन् गुरुमग्निमतन्द्रितं
मितहिताशनभुग्यतमानसः ।
कतिपयैर्द्दिवसैस्स तपस्विनाम्
अपि पुरोगणनीयतरोऽभवत् ॥३॥

त्रिसमयस्तपनामलमाबभौ
वपुरमुष्यमहीन्द्रतनूभवः ।
शुचिपुरस्सरमासनिषेवितम्
मिहिरमण्डलमाश्विनगं यथा ॥४॥

---

१. अष्टोत्तराशीतिश्लोकपर्यन्तं द्रुतविलम्बितवृत्तम् ।
२. क. मा. 'क्षि' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सरसि साधु निमज्य परञ्जपं
विदधतो मुखमस्य निरीक्षितम् ।
प्रमथितामृतसागरमध्यगं
तुहिनदीधितिमण्डलसन्निभम् ॥५॥

शुचिसरोन्नरधिष्ठितमाबभौ
मुखममुष्यतपस्यघमर्षणे ।
निजसहोदरमानसपङ्कजैः
मिलितदिवांघ्रिगतं शशिमण्डलम् ॥६॥

प्रतिदिनं स्नपिता विबभुर्जटा
मुकुटजूटपुटाः परिवेल्लिताः ।
शिरसि तस्य सवान्तरनिर्ज्वलत्
शुचिशिखा इव धूमकिरीटकाः ॥७॥

वपुषि तस्य विसारिमृगाजिनं
कशगुणाकलितङ्करम्बभौ ।
कनकशृङ्खलया सुसितङ्कथं
त्रिदशराजगजस्य तनौ यथा ॥८॥

विमलवारिभृतं करपङ्कजो-
परिगतं कलशः शुशुभेऽस्य सः ।
मुनिसुताश्शिशवः प्रसमीक्षयन्
वमणरम्बुभवोपरिगं सरः ॥९॥

गुरुविरोचनभास्करपूजनं
विदधतं पठतो निगमं सदा ।
त्रिसमये स्पृशतो विमलञ्जलं
कतिपयानि दिनान्यगुरस्य[1] च ॥१०॥

---

१. क. मा. गुरवस्य इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तदनुगौरवशासनमाप्य सत्
पदनिरन्तरचिन्तनरोधिनीम् ।
परिविहाय निरुध्य समां क्रिया-
मसुमसौ गणराज्ञमुपावसत् ।।११।।

अपि हितेन्द्रियवृत्तिरुदग्रधी-
रसुगणं परिरुध्य जपन्ध्रुवम् ।
मनसि वाङ्मनसा विषयं महः
किमपि वृत्तिबलेन समैक्षत ।।१२।।

अविषयः पुरुषो निरुपाधिकः
मलिनमानसवृत्तिगणस्य तत् ।
प्रतिविभावितत्तद्धृदिवृत्तिभिः
विनिहितः सयतो नियतैर्गुणैः ।।१३।।

यदपि मायिकवृत्तिरमुं परं
नहि शकापरिचेतुमथापि सा ।
समनुदर्श्य निजम्प्रतनं वपुः
तदतिरिक्ततथामुमबोधयत् ।।१४।।

यदपि तात्त्विक[1]नामवगाहते (?)
न खलु सात्त्विकवृत्तिरथापि सा ।
कनकधूलिरिवाशयशोधने
नृपसुतेन पुरो जगृहेऽमुना ।।१५।।

यदपि साहजिकी स्फुरणात्मनः
हृदयशब्दगता इह वृत्तयः ।

---

१. क. मा. 'कनाम' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दधति न प्रमितिं तदपि स्फुटा
मननकर्म्मणि तत्कृतकृत्यता ॥१६॥

श्रुतितदङ्गकृतञ्छ्रवणं पुरः
श्रुतपदानुगतं मननं धिया ।
तदनु सन्ततमभ्यसनं हृदा
विदधतः स्वमलक्षिततोऽस्य तत् ॥१७॥

स्फुरति चेतसि सर्वजनस्य तत्
सततमेव तथापि सुदुर्ग्रहम् ।
उपनिषन्नयनं गुरुशिक्षतां
जनमृतेऽमृतमेतदुदीरितम् ॥१८॥

कुमुदबान्धववासरनायक-
ज्वलनऋक्षगणे यदणस्थितम् ।
तदतिशायिमहो महितं महत्
स्फुरितमस्य हृदम्बुजदर्प्पणे ॥१९॥

बहुभवैर्न भवन्ति यदीक्षिणो-
यतिजनायतमानहृदायतम् ।
तमयमैक्षत कैश्चन वत्सरैः
इह न चित्रमसौ स्वयमेव सः ॥२०॥

यदमलाङ्घ्रिविषाक्तमना जनः
परिचिनोति परन्नपरं परम् ।
परमसौ न परस्परमध्यगान्-
मिहकोऽत्र नृणामतिविस्मयः ॥२१॥

प्रकृतिसिद्धनिरन्तरशर्म्मणि
CC-0. Nepal Sanskrit Academy, Kathmandu Collection
स्वमहिमक्षपिताखिलकर्म्मणि ।

स विरहन्नतुलाद्भुतनर्म्मणि
  किमपि बाह्यमवैन्नपरात्मनि ॥२२॥

अपि पिपीलिककीटपतङ्गका
  अपि विरञ्चिमहेन्द्रमुखाः सुराः ।
यदरण्यसंश्रयणात्सुखभागिनः
  नृपसुतोऽत्र सुखे परमे स्थितः ॥२३॥

प्रकृतिकल्पितमल्पितभावुकं
  जगदिदं परिजल्पितभिन्नकम् ।
स न पृथक् परमात्मतनोरवैद्-
  घटशरावकुसूलमिव क्षितेः ॥२४॥

इति समाधिसमाहितचेतसा
  विगतभेदमभिस्मरतेश्वरम् ।
नृपसुतेन मतेन तपस्विनां
  शतमहो शरदामतिवाहितम् ॥२५॥

चलति नापि पदं स्म विमुञ्चति
  न च पुरा नियता[1]सुमसौ वशी ।
न पुनरत्ति फलं स्म दलञ्जलं
  विरमति स्म न चापि समाधितः ॥२६॥

अधिशिरोऽस्य तडिल्लतिकोपमाः
  कनकभङ्गपिशङ्गजटाबभुः ।
भुवनमध्यविलीनतमो ग्रहा-
  ग्रहदिनेशरुचः स्फुरिता यथा ॥२७॥

---

१. क. ख. 'नियतां सुमसौ' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अधिजगाम लथोदितभास्कर-
प्रकरदीप्तितानहसोत्सुकम् ।
शतमखादिदिगीशवितापनं
किमपि रोचिरदशिशरदस्तदा ॥२८॥

त्रिभुवनोदरसंस्थितजन्मिनां
भयमयं तिमिरन्तनुते पुरा ।
इदमहो तिमिरौघविपाटना
पटुतरञ्च कृताभयदक्षिणाम् ॥२९॥

तपनतापमपाकुरुते शशी
प्रतिनिशं समुदित्वरदीधितिः ।
तपति तस्य तपो महिमातपो-
निशिदिवास्म तपो भुवनादिह ॥३०॥

धरणिधारणसंश्रवगोश्रवः
परिवृढद्रढिमक्षतमाढिका ।
सगुणचापकलाभवनि श्रिता
नृपतिभूतपसो गुरुता नता ॥३१॥

प्रतिदिनैधिततत्तपसां भरै-
रसुकरैरनरैरवरैर्नरैः ।
गुरुतरामधरत्सधरां धरा-
मतिसमाधिनिराधिरहोश्वरः ॥३२॥

समपहाय तदीयतपोभयाद्
दिगधिपा नव यद्द्रुतविद्रुताः ।
स्वमिह कार्य्यमहःपतिरादधे
तदधरत्खलु शेषपदाभिधाम् ॥३३॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नवनवोरगवर्य्यसुता करा-
म्बुजविलिप्तसिताश्रितचन्दनैः ।
परिजहावहदाधिमहीश्वरः
तपति राजसुते धरणीधरः ॥३४॥

स्थितवती पुरतोऽपि पुलोमजा-
पतिरहो सरसञ्चकुवे गिराम् ।
अपिजगावतिचित्रकलोर्वशी-
वशिवरो नुनुदे महतीं मुहुः ॥३५॥

गतमलं सुतले रिपुवार्त्तया
त्रिभुवनेन्दिरयापि रयागतम् ।
तदपि तस्य तपस्तपनोदये
मुदमवाप न जातु स कौशिकः ॥३६॥

यमपुरन्दररूपकलापयो-
रधिगतोऽन्तरमग्निरभ्र्जिजकिम् ।
स्फुटति सत्फुटमेव कणच्छलात्
कनकनप्तृतपोमहः साधुना ॥३७॥

कनकरोचिषि कानकितेजसा
त्रिजगति स्फुरितेन तपोबलात् ।
परिहरञ्जगति स्वयमादधे
तरणिजः किमकालिककालताम् ॥३८॥

यदि च जातु न जातु गणेश्वरः
वृषविधेर्विदधीत तदा भवेत् ।
प्रथममेव स पुण्यजनाभिधां
कनक[illegible] हुतिः ॥३९॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तपति राजसुते वरुणेऽत्यजन्-
न च पदप्रणतामलपुष्करः ।
प्रचुरमुक्तसमुद्रजलान्तरे
सुरभिदुग्धपिबोऽपि सदा ज्वरम् ॥४०॥

तपसि तेन रतेन सदा गतिः
विचकितेषु गतेषु यतस्ततः ।
दिगधिपेषु कथञ्चिदधारि सोऽ-
दितिजसोमपथान्तरवर्त्मनि ॥४१॥

तपसि तस्य निरन्तरसंस्थितिं
समभिवीक्ष्य पलायनवाञ्छया ।
मकरकच्छपपद्ममधारयत्
किमु करद्वितये निधिनायकः ॥४२॥

किमपि तत्तपसा परितापितः
सुरधुनीसलिलार्द्रकलेवरः ।
हिमधराधरजार्द्धतनुः शिवो-
मृतमयूखकलापि समस्तकः ॥४३॥

विधिरपि प्रसमीक्ष्य तपोमहद्-
वरमयङ्क्तमञ्च समर्हति ।
इति निरन्तरचिन्तनयात्यजन्
मुखचतुष्टयतः श्वसितावलीम् ॥४४॥

इति तदीयतपस्तनितापित-
त्रिजगतीजनताधिजिहीर्षुणा ।
मघवता मदनस्सहसैनिकः
स्वसदनात्प्रहितोऽस्य तपश्छिदे ॥४५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुरभिसीरभपुष्पशरासनः
मलयमारुतमत्तमतङ्गजम् ।
समधिरुह्य मनःस्थितमाधवः
स्वरिपुशङ्करमूर्द्धपदं विधुम् ॥४६॥

समुपजय्य गृहीत¹ नियुद्धविन्-
नयनपातवलिष्ठमहाबलः ।
प्रसभधैर्यधनातिविलुण्ठने
नृपसुतस्य ततो मदनोऽचलत् ॥४७॥

युग्मकम्

भ्रुकुटिचापसुसंहितलोचनं
चलचलेक्षणलक्षणमार्गणम् ।
प्रतिभटाभिमुखस्थितिसूकरो-
रसिगमुष्टियुगामकुचद्वयम् ॥४८॥

असिलतालसितासितकेश्यकम्
श्रवणपाशसितामलमुक्तकम् ।
श्वसनकम्पनचेलपताकित-
ध्वजनिभोरुपुरस्सरमुच्चलत् ॥४९॥

मदनभूपतिजैत्ररथाङ्कितं
विपुलवृत्तनितम्बमतिश्रमात् ।
वहदतिस्फुटदर्पकशान्तये
जघनभागनिवेशितसन्धिकम् ॥५०॥

बलिविराजितमध्यगनाभिभा-
भृतकृशावरभागवराङ्गकम् ।

१. क. मा. 'ध' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मधुरगीतिरवोद्‌गतहुंकृति-
स्फुरितवेणुमृदङ्गमुखध्वनिः ॥५१॥

निपुणतां हृदये[1]ऽन्तरवर्त्तिना-
गमितमाजिकलासु यथोचितम् ।
परिवृढेन शनैरबलाबलं
समगमत्कृतवीर्य्यसुताश्रमम् ॥५२॥

पञ्चभिः कुलकम्

अथ मधुस्सहकारतरूद्‌गता-
भिनववल्लरिमत्र पिकोदितैः ।
अधिनृपालसुताश्रममुन्मद-
भ्रमरचुम्बितयूथिकया गतः ॥५३॥

किसलयैः कलयन्नवमल्लिका-
शिर उदग्रसुमनस्तवकान्वितम् ।
भ्रमररावविनिर्मितसान्त्वनो
विकुरुते स्मरमालतरुर्न्नाम् ॥५४॥

स तिलकं वनराजिवधूमुखं
मलयवातनिरस्तदलावृतिः ।
भ्रमरहुंकृतिकामकलारवं
शशिमुखेन चुचुम्ब मधुर्युवा ॥५५॥

स्तवकभारनता नवमाधिवका
तरुणचूतमतल्लिकया तदा ।
किसलयाग्रभुजा परिरम्भिता
वशिमनोऽपि वशं विदधेतराम् ॥५६॥

---

१. क. मा. 'य' [illegible]

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कुसुमिता रजसा मलिनाम्बरा
स्फुरितभृङ्गसुमच्छदचक्षुषा ।
मलयगन्धवहे दलचेलकं
हरतिलाज्जितिका लतिकैक्षत ॥५७॥

कमलिनी मलिनां मलिनीकृतां
विदलितां ललिताञ्चलिताङ्गणैः ।
सरसि सारसिका रसिका सखी
हसति किं स्म सितच्छदकैतवात् ॥५८॥

वरभृतोऽथ कुहूलदृशः कुहूः
इतिगिरः किरति स्म वनान्तरे ।
मधुसमेधितमाधविकामधु
मधुरिमाधरिणीर्धरणी स्तुता ॥५९॥

अतिविकाशपलाशविलासव-
ज्जनसुखं वनराजिमुखं बभौ ।
घुसृणपङ्कमलं मसृणं वहत्
विबुधवारवधूवदनं यथा ॥६०॥

कृतसुशोकमशोकमुदैक्षत
प्रियवियुक्तवधूरधुना भयात् ।
स्मरशिलीमुखपल्लवशीलिता-
युतमनः स्रवदस्रविलोहितम् ॥६१॥

मृगयते स्म मृगान्मृगयारसः
मृगयुरेव मधुर्मधुरा रवः ।
विधुरितान्विधुखण्डशराकृति-
स्फुटपलाशविलासशरारुकः ॥६२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शुक[1]मुखीन्वशिनोऽपि शुकं वशं
शुकमुखाभमशोभत किंशुकम् ।
विरहिणामसुतिर्हृदये यथा
स्मरहृदङ्गविकासनकञ्चिका ॥६३॥

विकचकेतकधूलिमुदक्षिपत्
युवजनान्तरधैर्य्यधनं हरन् ।
विजितसङ्गरसंवरशम्बरः
युगशरो दिवसे बहुमाधिकः ॥६४॥

भ्रमरसम्भ्रमविभ्रमजभ्रम-
भ्रमविनाशिनमन्दमन्दिनी ।
पिककुलाकलितातुलकाकली
फलकलैर्लतिकाकुलिताललत् ॥६५॥

कुसुमितासुमितासुनमासुनो-
विनमितासुफलैर्लतिकासु सः ।
रसविशेषविवित्सुरिवाभ्रमन्
चलमनायुवभृङ्गवरोद्भुतम् ॥६६॥

पिककुलाकुलचूतविपोतके
भ्रमरगुञ्जितमञ्जुलकुञ्जके ।
ललितलोलितलोलविलोचनः
ससुरभौ विबभौ ललनागणः ॥६७॥

भुवि वसन्तमसन्तमयोगिनां
परिसमीक्ष्य वसन्तमदूरतः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection
१. क. मा. 'श्रु' इति पाठः ।

परिहसन्तमपि प्रियमङ्गना-
हृदि लसन्तमगान्मदनोत्सवम् ।।६८।।

विषमबाणसितातपवारणे
समुदिते रजनीजनिकारणे ।
विगतमानमदाः प्रमदा रणे
युयुधिरे नखदन्तविदारणे ।।६९।।

मधुरसौरभवन्मधुनाधुना
मधुरसौ परसौख्यकरोऽभवत् ।
युवतयो वनयोगसुयोजिता
रजनिजैर्जनिजैश्च निजैः प्रियैः ।।७०।।

इति वसन्तपरिष्कृतमाश्रमो-
पवनमायतपावनमायतम् ।
अमितमायतरोक्षरसां रसैः
स्मर उदारविचारविधः स्मर ।।७१।।

सुरतरुः सुरतार्थिसुरेच्छयं
सुरतया सुरमोऽसुरमोऽसरत् ।
सरससारसिके विसरो वने
सरससारसराजिसरो वने ।।७२।।

नृपतिपुत्रमसौ प्रमदागणो
युगपदेव जघान शरैश्शितैः ।
कुटिलितभ्रु शरासननिर्गतै-
र्मसृणगण्डशिलाकृतशाननैः ।।७३।।

घनघनाघनधीरतरध्वनि-
रथमृदङ्गरवः परिस्फुवे ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुरविलासवधूकलगीतिका
  मधुररम्बविमिश्रणसुन्दरः ।।७४।।

ननृतुरप्सरसः शतशः पराः
  सुरतरूद्भवपुष्पवतंसिकाः ।
अविकलाः सकलाः सुकलाः सुता-
  नृपसुतव्रतविघ्नचिकीर्षवः ।।७५।।

अतितपोबलसम्मिलिताश्रम-
  द्विपमृगेन्द्रमृगैः प्रमदश्रुतः ।
दिशि दिशि प्रससार विलासिनी
  विलसितानुगतः कलनिःस्वनः ।।७६।।

सुररतोत्सवदैवतयौवन-
  स्फुरितलास्यकलासुकलः कलः ।
वलयनूपुरहूडुकवल्लकी-
  घनमृदङ्गरवः स्म विजृम्भते ।।७७।।

अतिकृशोदरसङ्कटमन्दिरात्
  मुखपथेन बहिस्समुपागता ।
शुचिरसोच्छलितोर्म्मिपरम्परा-
  स्फुटमशोभतगीतिततिच्छलात् ।।७८।।

स निखिलात्मनि भेदविवर्जितं-
  चिरतरं विरहन्निरवग्रहः ।
समवलोक्य बहिःस्थितमुत्सवं
  सफलयञ्छ्रुतकैरुदमीलितः ।।७९।।

अमरवारवधूनिकरोकरा-
CC-0. Nepal Sanskrit Academy, Kathmandu Collection
  ङ्गणनिकाममथ विस्मृतिनाशिनीम् ।

स्मरणमात्रपुरस्थितमन्मथा-¹
धिगतविस्तृतकामनिबन्धने ॥८०॥

सरभसं समुदस्तभुजद्वया-
प्रपदपीडितभूमितलैकिका ।
द्रुमशिरः कुसुमावचयच्छला
निविडपीनकुचं समदर्शयत् ॥८१॥

खचितवज्रदलाङ्गुलिभूषणो-
ज्वलमरुन्मयदभ्रशलाकया ।
कुटिलितभ्रुवराननकन्धरं
श्रुतिपुटं कषति स्म पराप्सराः ॥८२॥

पृथुलवृत्तनितम्बशनैर्गतिः
नृपसुताभिमुखं प्रतिजग्मुषी ।
कमपि चेतसि भावमधिश्रिता
स्खलनमाप परामरभोगिनी ॥८३॥

समधिरुह्य मनोरथसद्रथं
स्थितवती युवती विदधे परा ।
कटितटीसुपटीञ्चपटे पटु-
र्मलयवातमिषाच्छ्रथवर्द्धनाम् ॥८४॥

नृपसुतानवमुल्लसितेक्षणं
समभिवीक्ष्य दृगञ्चलविभ्रमैः ।
करयुगोद्धृतहाटकपङ्कजं
परिचुचुम्ब मुहुरिव दिवाङ्गना ॥८५॥

---

१. स्मरो वेगहर्षाः सतविश्वः इति लिपिकरपाठान्तरम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

विबुधवारवधूविधुरा यथा
जनमनः प्रियतन्मुखपङ्कजम् ।
प्रकृतिनष्टनिमेषकृतान्तरा
प्रसृतिविस्तृतनेत्रप्रयपवी ॥८६॥

कुचविलिप्तमदप्रमदालिनो-
वदनदंशनमेत्य समीत्कृतम् ।
कुटिलचञ्चलनेत्रविलोकिता-
र्जुनमुखं प्रममर्द्दपरास्तनम् ॥८७॥

मरुति वाति विलोमविधाविति
चलति चेलचे जयघनाद्धनात् ।
कनकशैलशिलासमशीलकं
किमपि तत्समदर्शयनापरा ॥८८॥

एवं प्रत्नमरालमन्दगमनासन्नाहमालोक्य तं
त्रैलोक्यापजयार्जितोज्ज्वलयशोराशिप्रसूनायुधः ।
सद्यस्तम्बशिनाम्बरं वशयितुं वश्यादिबाणान्तिजा-
वाकर्णनिमिताधिरूढधनुषि प्रोल्लासवान्संदधे ॥८९॥

सिञ्जन्मञ्जीरकाञ्चीतरलवलयजस्फार[१]हूंकारभारः
चेद्द्राक्कोलाहलाद्य प्रतिचलदबलासैन्यसन्नाहतुष्टः ।
कामो वामे न सव्ये न च सरनिकरं सोऽर्ज्जुने सन्दधानः
तन्नाम्नो भाविनोऽपि प्रतिभटपदवीं प्राप्तवान्नैव तस्य ॥

मल्लीमालतिमाधवीमधुमिलन्मौलिस्थमाल्योद्गता
मन्दामन्दमरन्दविन्दुविसरस्पन्दप्रतिस्पर्द्धिनी ।

---

१. क. मा 'हूं' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सा चेष्टा विविधापि गीतिरसुरद्विड्वारवामाभ्रुवा
    माभाते स्म न चार्ज्जुनस्य हृदये स्मराः शरा दुर्ज्जराः ॥

इत्थं भूपाल[1]बालातुलबलतपसो विघ्नलेशेऽप्यशक्तो-
    नङ्गः शक्रान्तिकेऽगात्त्रिदिवयुवतिभिर्भग्नमानोद्यमाभिः।
शक्रे वक्रेऽपि चक्रे स्मरयुवतियुते चेतसा क्षेमचिन्तां
    भूयो नेत्रे निमील्यानवरतभविके स्वस्वरूपे स रेमे ॥

श्रीमत्कूर्मधराधरेन्द्रवसतिप्रख्यातपन्तान्वये
    जातः श्रीभवदत्तपण्डितवरः श्रीभार्गवी तत्प्रिया ।
तत्सूनोः सुकृतेः कृतौ कृतिमते काव्येऽर्जुनीयोदये
    षष्ठः स्पष्टविकृष्टमिष्टसुरसः सर्गोऽगमत्पूर्णतां ॥६३॥

इति श्रीसुकृतिदत्तविरचिते कार्तवीर्योदयमहाकाव्ये
कार्तवीर्योदयतपोवर्णनन्नाम षष्ठः सर्गः[2] ॥

---

१. स्रग्धराजातिः ।

२. इति श्रीकिरातक्षत्रियकुलोत्पन्नस्य मेचपञ्चलपाँचथरलालीखर्क-वरडाडाग्रामवास्तव्यदोवालीछाचामलिङराईकुलोद्भूतस्य डा. स्वामिप्रपन्नाचार्यस्य कार्तवीर्योदयसम्पादने षष्ठसर्गस्य टिप्पणीपाठभेदादिकं समाप्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कार्तवीर्योदयमहाकाव्ये

सप्तमः सर्गः

अथामराणामधिपः स्मराजा-
मुद्गीतवृत्तान्तमिदन्निशम्य ।
स्वस्थानहानभ्रमजातदैन्य-
सैन्येन भूपः शतमन्युरास ॥१॥

आकारमाविष्कृतदैन्यचिह्नं
वहन्वृषा तत्तपसो विहत्यै ।
गुरुं पुरस्कृत्य विधेर्जगाम
सभां पुरोत्कृष्टिसुहृष्टिमाप्ता ॥२॥

इन्द्रः प्रणम्यानुवय¹जीज्ञपत्स
प्रलोभ्यतामेषसु ऊर्ध्वभाभिः (?)
तपोन्तरायै खलु सिद्धिभिस्त्या-
त्स्वस्तिस्त्रिलोक्याः कृपया तवेति ॥३॥

ईशः प्रजानामपि तं तथेति
विसृज्य सिद्धीरणिमादिकास्ताः ।
सम्प्रेषयामास सुदर्शनस्य
सन्दर्शनार्थं जलजासनासौ ॥४॥

¹. क. मा. 'मजि' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उपेत्य तस्याश्रमभूमिमेता
मिथस्समेता निरतङ्कमेतम् ।
मार्गे[1] समेऽतन्द्रितमादरेण
दरेण चैक्षं तदराननभ्रु: ।।५।।

ऊता इवैतत्तपसा गुणेन
गन्तुन्नशक्ता न तदर्थिनास्ता: ।
विचारमाचेरुरिमं विलोच्य
रज्येत का नो विदुषी नतभ्रू: ।।६।।

ऋतं कथं स्याद्वचनं विधातु-
रनिच्छतो वा वरणञ्च कीदृक् ।
सुमन्दभाग्या सुविरुद्धशील-
मस्मासु दैवं किमहो विधातृ ।।७।।

ॠकारवन्ते रयते च कार्य-
गुणस्य वृद्धेरनिमित्तभूत: ।
प्रयाति साधोरनुकारमात्रां
समाधुतां साधुषु वा यथाकॄ: ।।८।।

ऌदिद्यथा भौतिकप्रत्ययात्समा-
ख्यातं समासाद्य तनोति युक्त: ।
मुख्याङ्गतामेति सदैव धातु-
र्निदर्शनं रूपमिहास्ति गम्ऌ ।।९।।

ॡकारवन्मातृकया भृतोऽपि
मन्त्रे निरर्थापतितोऽपि जन्तु: ।

१. क. मा. 'द्र' इति पाठ: ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

किं साधुतामेति विनागमेन
· निदर्शनञ्चात्र कुमारधाल्लु ॥१०॥

एवं वितर्कं बहुशो व्रजन्ति
सोपार्ज्जुनं सिद्धिततिः प्रयातुम् ।
स्थातुञ्च नेशासुभिर[1]प्रसक्त-
ता[2]दोलाविलासं मनसा प्रचक्रे ॥११॥

ऐचिन्तयाणुत्वमिहाणिमाथ-
स्तद्विचित्रञ्च न सम्भवन्नो ।
भावेन भावान्तरयोग उक्तः
शब्दस्मृतिज्ञैरपि तर्कविज्ञैः ॥१२॥

ओणन्तिताः स्म प्रियमात्मरूपं
समुत्सुकास्ते नविमानिताश्च ।
सर्वाहितास्तद्गुणकृष्टचित्ता
वरीतुमेवैनमुपागतांशोः ॥१३॥

औत्सुक्यमासां सफलीचकार
तपस्थितो राजसुतो न सद्यः ।
कुमुद्वतीनां घ[3]नराजिकाले
घनाघनेनापि हितो यथा ग्लौः ॥१४॥

अंशा यथैवापतितं तमीशं
वाञ्छाविहीनन्नजहुस्समस्ताः ।

---

१. क. मा. 'र' नास्ति ।
२. क. मा. 'ता' नास्ति ।
३. क. मा. 'द्यनरा' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तास्सिद्धयः किन्तु तदीयदृष्टिः
प्रतीच्छया तस्थुरनुज्झि[1]ताशम् ॥१५॥

आः खेदवं वृत्तमिदं प्रजातं
यत्सिद्धिवाञ्छापरिवर्त्यसिद्धिः ।
तत्सिद्धयेऽन्यो न बभूव योगो
विनार्ज्जुनापाङ्गतरङ्गधाराः ॥१६॥

कालङ्कियन्तङ्कृतवीर्य्यसूनो-
स्तपोवने सिद्धिगणे स्थितेऽस्मिन् ।
तदाश्रमङ्गन्तुममन्तुवाञ्छा-
विधेरास तदा विशङ्का ॥१७॥

खनिर्गुणानाञ्जलजातयोनिः
श्वेतच्छदं वाहनमारुरोह ।
उद्यद्गतिर्घस्रकरो हिमाद्रि-
र्यथारविन्दस्थलसन्मयूखः ॥१८॥

गच्छति स्म समरालमण्डल-
ग्रीवमुन्नमितरश्मिनियोगात् ।
पक्षपातकृतवातनिरस्त-
भ्राम्यदभ्रमधिरुह्य चलाङ्गः ॥१९॥

घर्मरश्मिरिव पङ्कमशेषं
शोषयन् क्षितितलस्य विधाता ।
अत्रिपुत्रसदनं प्रतिपेदे
सत्रिपुत्रवृतमार्षमुसङ्घः ॥२०॥

---

१. क. मा. न्मि इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ङिद्यथा स्पृशति सात्मनेपदं
धातुराशु विहितं हितं पदम् ।
प्रापदत्र गुणतां दृशिर्यथा
पश्य भावमनवाप्य चाप्यङि ॥२१॥

चित्रश्चरित्रङकृतवीर्यसूनो-
र्विधातुकामेन च वेधसाऽथ ।
दत्तद्वितीयेन तदाश्रमस्य
श्रमापहं भूमितलं समाश्रि ॥२२॥

छन्नस्सवल्मीकपतत्त्रिनीडै-
श्चिरं विचारञ्चरतापि तेन ।
विरिञ्चिना नो परिचीयते स्म
स्थितः पदान्ते सुधिया यथाच्छः ॥२३॥

गलन्निजाम्नत्र गतं समन्त्रं
दत्तार्थितोऽहं सरथोऽप्यषिञ्चत् ।
पितामहाग्रे सपितामहन्त-
माक्रम्य कान्त्या कनकं रराज ॥२४॥

मरं प्रमाणामदसीयगात्रा-
द्विनिर्गतं वीक्ष्य मुनिर्बभाषे ।
विधिं किमाकालिककल्पसूर्य्यं
प्रकल्प्य भाकल्पमिदं समोरुः ॥२५॥

अकारवन्मे पयसोऽभिषेको-
ऽनुवध्यमानोऽत्र पदे पुरस्तात् ।
उदात्तमाधाय परान्निहन्ते-
त्येवं तमूचे विधिरागमज्ञः ॥२६॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

टङ्काविवेमौ वृजिना विभेदे
माहिष्मतेयः प्रणनाम भक्त्या ।
दोर्भ्यामुभाभ्यामपि पर्यरम्भि-
निजाङ्घ्रिपद्मालिमिलल्ललाटः ॥२७॥

ठकारवद्वृत्तविचित्रदेह-
श्शुचौ रसेन स्थितिमादधानः ।
मूर्धन्यवर्णेन समं सवर्णः
प्रीत्या तमाह स्म सवेदकण्ठः ॥२८॥

डिण्डीरपिण्डाभयशः कदम्बै-
र्लोकत्रये पाण्डुरताङ्कृते ते ।
पञ्चास्य युक्त्या पुरहा भवानी-
मामन्त्र्य विज्ञापयतां स चण्डि ॥२९॥

ढक्कास्वर[1]ध्वानमुदीरयन्तः
कल्पोदयं सप्तपयोधयस्ते ।
दिग्जैत्रयात्रासु समग्रभूमि
भवान् विजेषीष्ट गतप्रगाढः ॥३०॥

णकारवत्तो प्रकृतेश्चरित्रं
वृद्धिं विधत्तां स्मृतमात्रमेव ।
दोष्णां सहस्रेण सदा रणे त्वं
मुदारुणे चैधि निरस्तबाणः ॥३१॥

तवेच्छया सन्ति[2] दिगीश्वराणां
रूपाणि चास्त्राणि करस्थितानि ।

---

१. क. मा. 'स्वरः' इति पाठो नास्ति ।
CC-0. Nepal Sanskrit Academy, Kathmandu Collection
२. क. मा. 'सन्तु' इति पाठः ।

वृष्ट्यादिकार्य्यन्निखिलं तदीय-
न्निजेच्छयैवावनिमण्डलेऽतः ॥३२॥

थूर्वप्रजानां हृदि जातमात्रं
सर्वज्ञतासर्वशरीरताभ्याम् ।
अकार्य्यमेतत्क्षण एव तासां
पुरोभवन् किल्विषवृन्दतोथूः ॥३३॥

दनोरपत्यानि तलस्थितानि
भुवो विहारे जलधौ वधूभिः ।
विजित्य कर्कोटकनागपुत्रं
वशन्नयेथा भुवि पुण्यवादः ॥३४॥

धनुर्गुणेज्यां[1] प्रवणं दशास्यं
रेवाविहारेषु सितं विधाय ।
दशास्यनिःश्वासरजस्वलानि
दिशां दशास्यानि विलोकयाधः[2] ॥३५॥

नरेन्द्रवर्य्यस्य फणीशकल्पा-
स्सप्तद्विपेन्द्रास्तव यन्तु दास्यम् ।
लक्ष्यं समाराज्यमुपेहि लोका-
लोकान्न भूमेर्लसितावदानः ॥३६॥

पाहि पादपतितान् रिपूनपि
जीवनक्षयकरेऽपि भिक्षुके ।
मास्म गा विमुखतां प्रपूरय
प्राणिनामभयदा नवाः प्रपाः ॥३७॥

---

१. क. मा. 'नाम' इति पाठः ।
२. 'अधरस्मिन् काल इत्यर्थः' इति मूललिप्यां पाठभेदः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

फलन्त्वलं सिद्धिलता भवन्तं-
भूदेवदेवद्रुममाप्य सद्यः ।
मास्मत्यजोभूः स्पृहणीयरूपा
वने यथा गन्धफलीर्द्विरेफः ॥३८॥

बाणो रथोवायुतपत्ररम्यो
धाराधरे चापि धराधरे ते ।
प्रायोधने वारिनिधौ निरुद्धो
मा क्वापि भूर्द्दर्शनयोग्यपर्व्वा ॥३९॥

भवच्चरित्रं त्रिजगत्पवित्रं
विगाह्य चित्तं लभतामपापम् ।
सरो यथा ग्रीष्म-ऋतौ मनुष्यो
वर्षा सरो वापि सदा सदम्भः ॥४०॥

महाभये राजविषाग्निचौरो-
पसर्गयुद्धामयमुख्यजाते ।
याने प्रवेशे शयने स्थितौ वा
नृणां शिवन्ते तनुताञ्च नाम ॥४१॥

यथागतो भूमितले च यस्त्वं
यथातथं तत्त्वमुदेतु चित्ते ।
तव त्वदीयाङ्घ्रिनिविष्टचेता
जनोऽपि भुक्तिं लभतां विमाय: ॥४२॥

रथाङ्गरूपं प्रतनं त्वदीयं
यद्बाहुदण्डो परिबम्भ्रमीति ।
ऋते तमाजौ पुरुषं पुराण-
जेतुं [illegible] सारः ॥४३॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लभ्यं समस्तं तपसास्य लब्ध-
न्नयुक्तमुक्तं पुनरुक्तभूतम् ।
इतीव वेधा विरराम किञ्चि-
त्तद्भ्रमाशास्य सहात्रिबालः ॥४४॥

वासो गुणानामवनीन्द्रपुत्र-
स्तयोर्गिरन्तामुररीचकार ।
स्ववीर्य्यसिद्धेऽपि पदेऽमराणा-
माज्ञा प्रतीक्षा हि विभाय सेवा ॥४५॥

शास्ता सुराणामथ कार्तवीर्य्य-
मामन्त्र्य तेन प्रणतः प्रतस्थे ।
हंसेन पक्षाहतिकैतवेन
भीत्याजिनापालयतां दशाशाः ॥४६॥

षट्कर्मनिर्णिक्ततनुर्मुनीन्द्र-
स्ततस्तमादाय निजाश्रमेऽगात् ।
तस्य द्वितीयाश्रमसिद्धयेऽथो
वा पङ्कजा[1]नाम कृतविरेषः ॥४७॥

समाप्तवर्णिव्रतमाप्तकामं
मुनिस्समावर्तनकर्मणा तम् ।
पित्रन्तिकं प्रापयितुं प्रसन्नः
प्रास्थानिकं मङ्गलमाततोत्सः ॥४८॥

हर्षादसौ यादवपूज्यपूर्वा-
रूढं रयोल्लासितदेवदत्तम् ।

---

१. क. मा. 'चा' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शक्तं महाभारतलङ्घनेऽपि
वनेऽर्ज्जुनः स्यन्दनमारुरोह ॥४९॥

क्षणेन चोत्तीर्य वनान्तभूमिं
ग्रामान्निवेशान्पुरपत्तनानि ।
प्राप विलङ्घ्य प्रतिपाल्यमानां
पित्रा पुरीं दत्तकृतातिशिक्षः ॥५०॥

ज्ञातं ससर्वज्ञतया स्वयञ्च्वा-
रण्योद्भवं वस्तु गुरून्ययुङ्क्त ।
संशिक्षयन्तो जगतीं महान्तो
ज्ञात्वापि पृच्छन्ति गुरून् हि विज्ञाः ॥५१॥

निष्केवलकं गुणम्

पुरीं सुरीतिं पृथिवीजिदीशो
मुदोविवेशो रुरुचोपशोभी ।
पौरैर्विनीतैरुदितैर्भृतैस्तै-
र्निरीतिभीतिस्मृतिभिश्शुभोडी ॥५२॥

तदागमेभूद् बहुलः प्रमोद-
स्तातस्ततानाम्पुरुषर्षभाणाम् ।
तातः प्रसूर्मोदमवापतुर्द्वौ
स दैवतं को न नरो स्मरेद्वा ॥५३॥

निष्केवलताल्व्यम्

मातापिताऽऽधाय तमङ्कमध्ये
व्यमुञ्चतां लोचनवाः सुखेन ।
तपस्तनुं तस्य तनुं भुजाभ्या-
मालिङ्गयन्तावतिशीतलाभ्याम् ॥५४॥

निर्मूर्धन्यम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शिरोऽग्रभागे मणिचारुरागे
हर्षाश्रुयोगं प्रजगाम गुर्वोः ।
बभूव च प्रक्रम एष भावि
राज्याभिषेकाख्यमहामहीयः ॥५५॥

निष्केवलदन्त्यम्

यथाचचक्षे स ऋषिस्सदोऽग्रे
चित्रन्धराशक्रशरीरजस्य ।
चरित्रजातं त्रिजगज्जनाना-
ङ्कूचच्छौघकक्षे गहनानलार्चिः ॥५६॥

निष्केवलोष्ठ्यम्

सरस्वतीलास्यकलाविलास-
विशालशाला सहसास्य कस्य ।
विधातृदत्तातुलभाग्यभाजः
श्रुत्वा तदस्याश्रुसभा जहर्ष ॥५७॥

निरनुनासिकसन्ध्यक्षरम्

प्रतिक्षणं सिद्धिपरम्पराभिः
प्रतीक्ष्य दृष्टचञ्चलदभ्रपातम् ।
तपः प्रतापप्रणताखिलार्थं
ददर्श राजा पृथुमानतस्तम् ॥५८॥

निर्दन्त्यौष्ठ्यसन्ध्यक्षरम्

यमानिसम्मानममानमाप्त-
म्पाथोजजन्मोदितपङ्क्तिभिस्तम् ।
तदात्मतन्मानमतीच्छभूमि-
पतेः पपौ दृङ्मदितानि कामम् ॥५९॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निरुष्मान्तःस्थम्

वीतिरीतिविदिनिर्मितिस्थिति-
मीतिभीतिसितिवीक्षितिक्षिपिम् ।
प्रीतिवीचिविचितं क्षितिक्षिदी-
दीप्तिकीर्तिविनिकीर्णदीधितिम् ॥६०॥

एकजातीयस्वरम्

चण्डशर्वनयनानलभस्मा-
नङ्गनव्यजननभ्रमदङ्गम् ।
नष्टबाल्यममरात्मजभासं
पश्यतामवजहर्षमनस्तम् ॥६१॥

युग्मम् । एकजातीयस्वरम्

कोकिलाकुलकलाकुलकाले-
लोलकेकिकलिलेललकोके ।
काकलीकलिलकोकिललोके-
लाल्ललल्लकलिकालकलः कम् ॥६२॥

द्विव्यञ्जनम्

लीलयालयबलिं बलीलयो-
ल्लेयबालबलयं वयो ललन् ।
वैरिवीरवरवारवारवो
वेलया ववलेवरावलम् ॥६३॥

चतुर्व्यञ्जनम्

सौधं विवेश क्षितिवैजयन्तं
बुधं स वेदेक्षि ह वैः श्वयत्तम् ।
मुनिं पुरोधाय सुभव्यकाले
न निन्द्यरोचिर्य्यमिभक्तिकाशी ॥६४॥

पादगोमूत्रिका

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रासादमध्यं पृथिवीन्द्रसूनुः
प्रविश्य साकं प्रससाद पित्रा ।
रसासमद्रापृथुवीरसूतिः
प्रदृश्य भो कन्नसभादरक्षम् ॥६५॥

अर्द्धगोमूत्रिका

समानयन्मान्यजनं द्विजानां
विसारिदैन्यानलकीलजालम् ।
निर्वापयन्दानजलप्रवाहै-
ररण्यहस्तीव रराज राज्ये ॥६६॥
समायन्दैन्यवनं प्रजानां
विद्धारिसैन्यातुलशीलशालः ।
सर्वाभयज्ञानकलप्रवादै-
रगण्यकास्तीव रराज राज्ये ॥६७॥

युग्मम् । श्लोकगोमूत्रिका

वायुरोधपरो धीरो रमारासकलोऽरिहा ।
हारिलोकसरामाररोधीरोपधरो युवा ॥६८॥

प्रतिलोमार्धम्

आसीदयं फलवचाः छातमोहगणोऽशठः ।
वृथापोढजधोऽखण्डघाभिनाढीबडाकरः ॥६९॥

अपुनरुक्तव्यञ्जनम् । युग्मम्

सारसाररसासाररसासाररसारसा ।
सारसाररसासार रसासार रसारसा ॥७०॥
तं रसाऽऽसर विस्तारं भाऽरंसारवभासदा ।
दासभावरसारम्भारस्ताविरससारतम् ॥७१॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रतिलोमार्द्धम्

काहलावरवावाधारामारासकलोपिका ।
सारमासरमाथामावामाथामधराधरा ।।७२।।

राधराधमधामावामाधामारसमारसा ।
कापिलोकसरामाराधावावारवलाहका ।।७३।।

युग्मम् । पूर्वं प्रातिलोम्येन अपरपद्यम्

सा सीताममतासीसाऽकालिमाननमालिका ।
सासेनागगनासेऽसातं रसाऽऽररसारतम् ।।७४।।

अनुलोमप्रतिलोमैकपादम्

अतिशेते स्म पितरं विशेषान्निति तेजसः ।
अयन्तथापि स्मर भो विनेयाद्दृशेऽल्पकः ।।७५।।

द्वितीयतृतीयगूढादिपादम्

स भाति स्मरणं प्राप्य विद्विषामन्तको यथा ।
सभातिस्मरणं प्राप्यमलचित्तेन तेन च ।।७६।।

तुल्यं प्राप्यानयं स्वर्गसदा नाकलयद्वयः ।
कीर्तिप्रतापाभिधकसदानाकलयद्वयः ।।७७।।

पलायाञ्चक्रिरे योधाभीत्यक्तावरवारणे ।
पलायाञ्चक्रिरे योधा भीत्यक्तावरवारणे ।।७८।।

सङ्गतास्तेनहरिणा हरिणा हरिणा यथा ।
सङ्गतास्तेन हरिणा सङ्गतास्तेन विह्वलाः ।।७९।।

यमकसङ्करी । युग्मम्

सा शारदा दारशासाशारसार रसारशा ।
रसावहाहावसार दारहाविविहारदा ।।८०।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection
सर्वतोभद्रमिदम्

नानाननार्हंनानन्दोदीनदानीददी नन ।
नदीननिनदोनोनोननन्दानन्दनन्दनम् ॥८१॥

द्व्यक्षरम्

लब्धपालनविल्लक्षपालकापालनामलः ।
लङ्केशलङ्घनं लब्धसलतो क्ष्मां लसद्बलः ॥८२॥

दशदलपद्मबन्धः

वरवीरपरस्मेरहरसारवरः स्थिरः ।
वारम्वारम्मारमारमारन्पारकरस्परः ॥८३॥

षोडशदलपद्मबन्धः

नवां वीरकलां श्रुत्वा कार्तवीर्य्यस्य वृत्रहा ।
हाजगाम विहस्तत्वं को वा भूपः क्षितौ तु न ॥८४॥
नरवीरस्य तस्यासीद्भूमौ साध्यन्न किञ्चन ।
नारायणो नराणां स कारुण्याद्दर्शनङ्गतः ॥८५॥

द्वाभ्यां खड्गबन्धः

धनुस्तस्य दृशो दृष्ट्वा श्रुतिपर्यन्तकर्षितम् ।
जम्बालभावमास्थाय दद्रुर्विजयायुधः ॥८६॥

धनुबन्धः

विलेसु तद्यशःशोभा मानिनां प्रप्रथावसाः ।
मानिता विविधग्रासा मान्तोवीररसप्रभाः ॥८७॥

त्रिशूलबन्धः

महोनिरस्तमित्रस्य तस्यासन्सुहृदोऽसुवत् ।
स चाप धनुबा कीर्तिः सदा नत्याऽगसुस्थिरः ॥८८॥

विरोधाभासपुनरुक्तवदाभासौ

तं प्रसाद्य नकोऽभुङ्क्तदारान्हारवराननान् ।
तम्र प्रसाद्यको भुङ्क्तदारान्हारवराननान् ॥८९॥

श्लेषलाटानुप्रासौ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वन्दारुजमनामन्दानन्दसुन्दरमन्दिरम् ।
चन्दिरं कुलपाथोधेस्तं प्रजाः प्रववन्दिरे ॥९०॥

छेकानुप्रासवृत्त्यनुप्रासौ

विराजमानः कविराजमानः
श्रिया विलक्ष्माव लयस्य तस्थौ ।
बलाल्लसद्भावसुधापहारा-
द्विराजमानः कविराजमानः ॥९१॥

समुद्गकयमकम् । लक्षणं काव्यादर्शात्

सभासमानञ्च सभासमान-
स्सभासमानञ्च सभासमानः ।
सभासमानञ्च सभासमान-
स्सभासमानञ्च सभासमानः ॥९२॥

महायमकम् । लक्षणं काव्यादर्शात्

दीर्घधीश्चारदृक्शक्रवच्चापराः
श्रेयसां भाजनन्सुन्दरोदारगः ।
कीर्तिमान्सत्यवाक्शास्त्रविच्छस्त्रधृङ्-
मन्त्रगोमन्त्रिणां कार्य्यकृत्सामतः ॥९३॥

मानितो भूमिपैर्युद्धतो निर्जितै-
र्दैन्यहाहस्तिगः श्रीपतेस्तुल्यः ।
सम्बभौ भूतले रक्षितुं सङ्गतः
कामदो मानदो भूषितस्तच्छ्रिया ॥९४॥

युग्मम् । द्वाभ्यां धेनुबन्धः

---

१. 'रैश्चतुर्भिर्युता स्रग्विणी सम्मता' इति स्रग्विणी जातिः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तातस्सुन्दरकृत्स्नवीरचरितं भव्यप्रवादप्रियं,
दृष्ट्वा कृत्यमितावधानचरणं तं वात्कृतान्तश्रियम् ।
वष्टीति स्म स काश्यपी प्रचलितक्षोणीशसञ्ज्ञमुदा,
दातारं यमिनां यशस्तव परं दृप्ते कृतान्तं सदा ॥९५॥

सुतं युवानं समभूमिबालिका
  प्रकृष्टनर्मालयमच्छवार्तकम् ।
सुनीतिवित्कर्तुमियेष वीतभीः
  वृतं मुदा तैरखिलैर्यशस्विनम् ॥९६॥

महर्षिदत्तं प्रतिरागशालिनं
  त्रिलोकगेहाङ्कजनावविक्रमम् ।
प्रमात्यवर्य्योऽवविधानमादिशं
  प्रतोषितार्य्यप्रतिराजमानिते ॥९७॥

सुतुष्टसप्रान्तसमाजसम्मतो
  मुदा चलद्दृत्तगणोऽवनिप्रभुः ।
परिप्लवो भव्यपरम्पराभि-
  स्स्वं सर्वपौरानुमतिं समागतम् ॥९८॥

सम्भारान् भानुभासो नरवरशिरसा वन्दितो दिव्यदिव्यः,
मानोत्तानोननोनोऽकृतसुतहितकल्लोकशोकघ्नकर्म्म[1] ।
धातापाता प्रतापी क्षितिपतिरतिमत्क्षेमधामप्रमग्नः,
संसारासारसाक्षो विकचकजकरामाननतानप्रनन्दन् ॥९९॥

हारबन्धः

श्रीमत्कूर्मधराधरेन्द्रवसतिप्रख्यातपन्तान्वये,
जातः श्रीभवदत्तपण्डितवरः श्रीभार्गवी तत्प्रिया ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१. यतिभङ्गदोषः २ चरणे ।

तत्सूनोरिह कार्तवीर्य्यचरिते सर्गोऽगमत्सप्तमः,
पूर्णत्वं सुकृतेः कृतौ कृतिमतश्चित्रैर्विचित्रान्तरः ॥१००॥

इति श्रीसुकृतिदत्तविरचिते कार्तवीर्योदयमहाकाव्ये
कार्तवीर्य्यगृहप्रत्यागमनं शब्दालङ्कारप्रदर्शनं
नाम सप्तमः सर्गः[1] ॥

१ इति श्रीकिरातक्षत्रियकुलोत्पन्नस्य मेच्यञ्चलपाँचथरलालीखर्क-वरडाडाग्रामवास्तव्यदोवालीछाचामलिङराईकुलोद्भूतस्य डा. स्वामिप्रपन्नाचार्यस्य कार्तवीर्योदयसम्पादने सप्तमसर्गस्य टिप्पणीपाठभेदादिकं समाप्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कार्तवीर्योदयमहाकाव्ये

अष्टमः सर्गः

आविर्भवतु तारिण्याः करुणापाङ्गसन्ततिः ।
या चरीकर्ति वैधेयान्मादृशानपि सत्कवीन् ॥१॥

राज्याभिषेकपदसम्भृतिमारचय्य
पुत्रं विधित्सुरवनीतलसार्वभौमम् ।
राजा जगाद जगदाहितकीर्तिपूर्ति-
दत्तां गुरुं गुरुमिवामरलोकराजः[1] ॥२॥

निर्माणमिच्छति प्रभो मम ते प्रसादा-
दासाद्य चान्तिमदशाञ्जगतः प्रकाशम् ।
कार्य्यंन्निधाय तनये लघु भास्वतीह
प्रातः प्रदीपगतरोचिरिवाचिरेण[2] ॥३॥

धुर्य्ये निधाय धुरमत्र चिरादुदूढां
विद्यामिवागमगमान्वितखिन्नः ।
सद्यस्सदक्षतनये विनयेन युक्ते
वाञ्छामि शान्तिमधुना भवतः प्रसादात्[3] ॥४॥

---

१. उपमालङ्कारः 'उपमानोपमेययोस्साधर्म्ये भेदाभेदतुल्यत्वे–उपमा' रुय्यकस्य–अलङ्कारसर्वस्वे ।

२. पूर्णोपमा ।

३. श्रौतीपूर्णा, उपमालङ्कारस्य भेदोपभेदः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भुक्ता मया बहुविधा विषया विभावा
आपातमातमधुरा विधुरस्वभावाः ।
एतान्नरेन्द्रपदवीमधिरुह्य भूयो
नेच्छामि दुर्ज्जररसैकनिदानभूतान्[1] ॥५॥

चित्तेन नैव महतो वहतो वयोऽन्त्यं
सन्त्यज्य याति विषयावलिरप्रसन्नः ।
भोगोचिता चतुरवारविलासिनीवत्
तस्माद्बुधः स्वयमिमां विजहीत[2] पूर्वम्[3] ॥६॥

आसाद्य जन्म शरदिन्दुकरावदातै-
राच्छाद्य सर्वभुवनञ्चरितैस्सुहृद्यैः ।
यो हंससारसहितः शरदभ्रमर्त्यः
संलीयते विमलविष्णुपदे स धन्यः[4] ॥७॥

पुत्रीयिताः प्रकृतयस्समनन्तराले
गेहान्तरीयमभवं रिपुगेहदाहे ।
नैदाघतीक्ष्णकरदर्शमदर्शदिन्द्र-
चारञ्चरन्तमरिवृन्दमिमञ्च[5] युद्धे ॥८॥

शीलं यथा सततवैनयिकेन नॄणां
श्रौतो यथा श्रुतिविचारबलेन धर्मः ।

---

१. आर्थीपूर्णा ।

२. तद्धितगार्थीपूर्णा ।

३. सर्गेऽस्मिन्निबद्धास्सर्वेऽप्यलङ्काराः 'कविकुलालङ्कारचूडामणी' महाकविना सुकृतिदत्तेन भूसुरेण सूरिणा सलक्षणास्समुपनिबद्धास्स्युः । परञ्च प्रकृतग्रन्थस्सम्प्रत्यनुपलब्धः । तस्मादन्येभ्यो ग्रन्थेभ्योऽलङ्कारलक्षणान्युपादीयन्ते ।

४. समासगा लुप्ता । उपमाभेदघटितालङ्कारः ।

५. क्यच्, क्विप्, णमुल्प्रलुप्ता ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शास्त्रं यथा सदयतीर्थनिषेवणेन
क्ष्मामण्डलं समवितञ्च मया[1] तथैव ॥९॥

अस्त्येव मे विषलतेव सितापि कीर्तिः
कीर्तिर्यथा बुधजनावनदापि[2] लक्ष्मीः।
लक्ष्मीर्यथा सुरनरस्पृहितापि भूमि-
र्भूमिर्यथा जलधिसीमतटं पताङ्गाः ॥१०॥

एवं समस्तमनुभूतवतस्सुखं मे
लोलश्च सातिशयमन्यपदाहृतश्च।
निःश्रेयसन्तदितरत्सुखमाप्तुमिच्छा
तत्पूर्तये मम भवानिह वा भवान्भोः[3] ॥११॥

इत्युक्तवन्तममुमाह मुनीन्द्रवर्यो
राजंस्त्वया व्यवसितं मम चेतसा किम्।
धन्योऽसि पार्थिवकुले पृथुवत्प्रथिम्ना
कीर्तेर्भवानिव पुरा प्रथते पृथुस्सः[4] ॥१२॥

मन्ये भवन्तमवधीरितचारुकीर्ति-
प्रेमामृताऽयुधितरङ्गसदृक्कटाक्षम्।
भूमध्यभागपरिशीलनलन्दकृत्ति
दृष्ट्वाधुनामृतरमावृणतेति हृष्टा[5] ॥१३॥

---

१. मालोपमा।
२. रशनोपमा।
३. अन्वयः– सम्बन्धोऽपि पारिभाषिकालङ्कारत्वेन स्वीकृतः।
४. उपमेयोपमा– उपमेयोपमा सा स्यादुपमानोपमेययोः।
पूर्वयोर्वैपरीत्यञ्चेत्परतः पुनरुच्यते।
(अलं. मणिहारः २४ परकालस्वामी)
५. हेतूत्प्रेक्षा– उत्प्रेक्षाभेदघटितः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वोदारदाररुचिकारविहारसार-
स्फारप्रचारनिरपेक्षमवेक्ष्य नूनम् ।
सापत्नभावमुदितापलितच्छलेन
त्वां मुक्तिराश्रयति सम्प्रति मौक्तकान्तिः[1] ॥१४॥

दृष्ट्वा भवन्तमयमेव विवेकराशिः
किम्भूमिवासिविहितोऽतिहितोऽथ धर्मः ।
किं मुक्तिभुक्तिफलहारविहारवासं
संशेरतेऽखिलजना इति भूतलेऽद्य[2] ॥१५॥

आलोक्य ये परिरणं शमनः किमेव
वाहद्विहस्थ न च वाहनमस्य बाहः ।
किं कल्पभानुरयमेकहयः कथं स्यात्
संशिश्यिरे त इति मित्रमवन्तु[3] च त्वाम् ॥१६॥

निर्वर्ण्य नाभिभवमाश्रितसत्यवार्तं
दक्षे सुते निहितलोकधुरं मुमुक्षुम् ।
संसेव्यमानमनिशङ्कविनायकेन
त्वां संस्मरामि ऋषभाख्यनृपं विधिश्च[4] ॥१७॥

विद्यालतासमवलम्बविशालशाले
सुप्राज्यराज्यकमलाविमलालयेऽस्मिन् ।

---

१. वस्तूत्प्रेक्षा ।
२. संशयः ।
३. सन्देहः– उपमानोपमेयसंशयः (का. सू. वृ. ४-३-११ वामनः)
४. स्मृतिः– स्मरणं या स्मृतितुल्यदर्शनात्प्रतिवस्तुनः (अलं. महो. ८।१६ नरेन्द्रप्रभसूरिः)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्थाने निधाय तनये सनये विधात्रा
भारं भवान्भवहरं पदमीक्षतान्द्राक्[1] ॥१८॥

राज्याभिषेकमनुभूय तवाध्वराजा-
सेकत्तनूभवधनञ्जयदीप्तकीलाः ।
द्विड्भूपसत्यभुवसासवपानपीनाः
पूर्णाहुतिं समभियन्तु शिरोभिरेषाम्[2] ॥१९॥

सज्जन्यजन्यकमलाशयनोपधानं
प्रत्यर्थिभूपतिविलासवतीजनानाम् ।
वैश्वस्त्ययागपरभारसहाऽप्रयूप-
स्त्वत्पुत्रबाहुरभिराजतु दीर्घकालम्[3] ॥२०॥

पीत्वा द्विजाधिपविनिस्सृतमच्छवर्ण-
वाग्व्याजतोऽमृतममन्दममाद्यदाशु ।
मुञ्चच्चरित्रकृतवीर्यवराधिपस्य
चेतश्चकोरशिशुरञ्चितचारुपक्षः ॥२१॥

आत्रेय एष धरणीसुतराज एव
दत्तो न चेदिह कथं सकलङ्कलेशः ।
तस्योदितं नवसुधा यदि चामृतस्य
प्राप्तिः कथं कथय तत्र च पार्थिवेऽभूत्[4] ॥२२॥

श्रुत्वा गुरोर्गिरमिमां मनसोऽनुकूलां
पुत्रं जयन्तमभिषेक्तुमना महीन्द्रः ।

---

१. मालारूपकम्, रूपकभेदघटितः ।

२. नानारूपकसङ्करः ।

३. रूपकम्, उपमैव तिरोभूतभेदा रूपकमुच्यते (का. आदर्श. २.६६ दण्डी)

४. श्लोकद्वये अपह्नुतिः । अपह्नुत्य किञ्चिदर्थान्तरसूचनम् (अग्निपुराण ३४५-१८)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उत्तिष्ठतिस्म सदसो विबुधानुयात-
स्साद्धं शिवैरपि मरुद्भिरसौ तलेद्यो:[1] ॥२३॥
भास्वानयं समुदयन्निखिलप्रजानां
दुर्भेद्यमन्धतमसं प्रविदार्य गोभिः ।
सद्धर्मकर्मणि नियोजयितेति भूपो
निश्चित्य चेतसि गृहं प्रविवेश तुष्टः[2] ॥२४॥
राज्याभिषेकपदसंस्मृतिचुम्बिचेतो
वृत्तोरुवाह मृदुतल्पगतस्य निद्रा ।
राजो गमागमविलासवती निशायां
प्रेङ्खोलिताभिनवपार्वणदोलिकाभाम्[3] ॥२५॥
लब्धापि विस्मृतिमलं तमसोऽन्यवायो
हन्तुं क्षमोऽर्जुनभविष्णुमहोदयन्न ।
द्राघिष्ठतामुपगतापि नरेन्द्रचित्तो
नैवारुणन्महइदं हितमश्विनी सा[3] ॥२६॥
कल्पेऽतिदेशमधिगम्य पितुः प्रविष्टो
धीरोभिषेकनिलयन्नवमर्जुनोऽथ ।
सप्ताब्धिमुद्रितमहीतलराज्यलक्ष्मी
पाणिग्रहोचितवरोक्तमवेष[4] भूव: ॥२७॥

---

१. समासोक्तिः– विशेषणानां साम्यादप्रस्तुतधर्माविच्छेदः (अलं. ८, ५१ शोभाकरमिश्रः) ।

२. श्लेषः– द्व्यर्थवाचकैः शब्दैः (वि. ध. पु. २४–६) ।

३. निदर्शना:– वाक्यार्थयोः सदृशयोरैक्यारोपे निदर्शना (काव्यविलास २-३० चिरञ्जीव) ।

४. कार्यनिबन्धना, अप्रस्तुतप्रशंसा– (अधिकारापेतस्य वस्तुनोऽन्यस्य या स्तुति। अग्निपु. ३४५–१६)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तुर्यैर्नदद्भिरतिधीरममन्दभद्रै-
स्संस्मृष्टभूषितसपद्मकपुष्करैश्च ।
सद्योऽनुपप्लुतगतैः करिभिश्च सौध-
द्वारं समाकुलमभूदथ तत्र[1]काले ॥२८॥

देवाङ्गनाकरलतापतिताश्च लाजा
मन्दारजास्सुमनसश्च विशुद्धवर्णाः ।
मन्दाकिनीगलितनिर्झरसन्निकाशा
भूमेः (मि) पतेरधिगृहं युग[2]पन्निपेतुः ॥२९॥

भद्रासनं समधिरुह्य जयाभिषेकं
यातोऽर्ज्जुनस्य तुलनां (छ) झगिया तदानीम् ।
हेमाद्रिशृङ्गमधिरुह्य यदा विवस्वान्
सप्तर्षिगाङ्गजलसेचनमाप्नुवीति[3] ॥३०॥

राजन्यशेखरमणिर्यदुतुङ्गवंश
भ्राजिष्णुमौक्तिकफलं द्विजदेवशाखी ।
शौर्याद्यगण्यगुणरत्नसुमेरुरुर्वी-
कान्तानुकूलदयितो निरसेचि[4] विप्रैः ॥३१॥

उत्तुङ्गरोहरवसुशृङ्गगतो विवस्वान्
धीरन्नदद्भिरमरालमरालपोतैः ।

---

१. कारणनिबन्धनाऽप्रस्तुतप्रशंसाः, अधिकारापेतस्य वस्तुनोऽन्यस्य या स्तुतिः (अग्निपु. ३४५-१६) ।

२. विशेषनिबन्धना सा ।

३. यद्यथातिशयोक्तिः प्रोक्ता चातिशयोक्तिस्तु ह्यतुलैरुपमागुणैः ।
(विष्णुपुराण २४-१०)

४. नीगीर्णोपमेयातिशयोक्तिः (विष्णुपुराण २४-१०)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आसंशितोऽमरधुनीविमलप्रवाह-
प्रस्यन्दिवर्त्तुलशुचि शिरसा बभार[1] ॥३२॥
दत्तादिभिर्द्विजवरैरभिषेकमन्त्रैः
सिक्तास्य वेदिरभिशुष्यति नैव यावत् ।
तावद्विपक्षगणलक्षसु शुष्ककक्षा-
भक्षप्रतापशुचिरस्य दिशो जगाम[1] ॥३३॥
वर्षाभिषेकमधिगम्य विदीप्यतेऽर्कः
सिन्धवम्भसैव परिभाति च वाडवाग्निः ।
विद्योतते घनरसेन हि वैद्युतोऽग्नी
राज्याभिषेकमधिगम्य बभौत[2]मांसः ॥३४॥
भद्रासनोपरिगतं कृतवीर्यसूनुं
दृष्ट्वैव भीतिरतिदूरमगात्प्रजानाम् ।
पूर्वाचलाग्रशिखरस्थितमंशुमन्तं
सम्पश्यतां भवति नो तमसो विबाधा[3] ॥३५॥
वर्षन्ति तत्र विबुधाः स्म जलं सुमन्त्रैः
पूर्वं ततश्च कनकानि बहूनि तेषु ।
धाराधरा जगति तस्य च जीवनानि
तद्वैरिराजवनिताक्षिद्वितानि च द्राक्[4] ॥३६॥

---

१. सैव । प्रोक्ता चातिशयोक्तिस्तु ह्यतुलैरुपमागुणैः
(विष्णुपुराण २४-१०)

२. प्रतिवस्तूपमा- उपमेयोक्तौ सामान्यवस्तुन्यासः प्रतिवस्तु (का. अ. सू. वृ. २-३-२ वामनः)

३. दृष्टान्तः प्रस्तुतार्थप्रसिद्ध्यर्थं निदर्शनं दृष्टान्तः ।
(का. अ. पृ. ४१ वाग्भट्टः)

४. दीपकम्- उपमानोपमेयवाक्येष्वेका क्रिया दीपकम् ।
(का. अ. सू. वृ. ४।३।१८ वामनकृतः)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्राप्याभिषेकमयमार्ययतद्विजेभ्यो
गोत्राद्वयं परिदधे वसनानि सम्यक् ।
सद्धीरभूषणगणैरलमङ्कृतस्वं
गात्रं ददर्श विमले मुकुरेऽपि वेषम्[1] ॥३७॥

राज्याभिषेकमदसीयमवेत्य चित्तै-
र्नेत्रैर्वचोभिरतिनूत्नमणीखनीभिः ।
दैत्यद्रुहां हरिणशावकलोचनानां
विद्वज्जनस्य सुतरामुदलासि भूमेः[2] ॥३८॥

आसाद्य राज्यमयमिन्दुरिवातिशीतै-
रानन्दयञ्जनमनांसि करैः सदैव ।
पस्पर्शि नैव तमसामकलं कलेशं
पस्पर्श सर्वशिरसि स्थितिमाप[3] पूर्णः ॥३९॥

आसन्नृपा नलभगीरथनाकुमाद्याः
पूर्वं समग्रगुणगौरवमादधानम् ।
किं ब्रूमहेऽथ नृपताविह राजमाने
तानेवमूचुरनुसद्मजनास्त[4]दानीम् ॥४०॥

नारोपि चापममुना श्रुतिमूलचुम्बि
नास्पर्शि वैरिजनतासुभुजङ्गखड्गः ।

---

१. दीपकभेदः ।

२. तुल्ययोगिता– तुल्यत्वे सत्यनेकस्य क्रियाद्यैस्तुल्ययोगिता ।
(अलं. सं. ६।२२ भावदेवसूरिः)

३. व्यतिरेकः– उपमानादुपमेयस्य गुणविशेषवत्वेनोत्कर्षः ।
(रसगं भा. ३ पृ. १५० पण्डितराजः)

४. आक्षेपः– यः प्राकरणिकत्वेन वचनस्यार्हस्य वस्तुनः शब्दगत्या निषेधः ।
(अलं. मञ्जरी [illegible] [illegible]णीदत्तः)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नाबन्धि च भ्रुकुटिकोटिरथापितस्य
विड्भूमिपाः पदनता अभिषेकमात्रात्[1] ॥४१॥

छत्रं शरच्छशिसमच्छविरस्य मूर्ध्नि
प्रोल्लासमाप सुहृदां विननाश तापः ।
आश्चर्य्यमस्य च बभूव भुजस्समुद्रो
मित्रालये वहलरत्नखनिर्बभूव[2] ॥४२॥

ऊर्जोर्जितामृतकरामलतद्यशोभि-
र्लोकत्रये धवलितेऽप्यतिशीलिते च ।
प्रत्यर्थिभूपतिमुखानि सितानि नासन्
सन्तापमाप च विपक्षवधूटिकाहृद्[3] ॥४३॥

आसाद्य पित्र्यपदवीमयमच्छकीर्तिः
प्रत्यर्थिनाञ्च विदुषाञ्च मृगीदृशाञ्च ।
शौर्य्येण सद्वितरणेन सुचारुतन्वा
चित्ते बभौ सुरपतिस्तदगोर[4]नीशः ॥४४॥

इत्थं पुरातननृपस्तनयाय सम्यग्
विप्रोत्कराय च समस्तजनाय दत्वा ।
राज्यञ्चिरार्जितधनान्यपसाध्वसञ्च
दातुं स्म चित्रमभिवाञ्छति चेश्व[5]राय ॥४५॥

---

१. विभावना– कारणं विनापि कार्योदये (अलं. शे. केशवमिश्रः)
२. रूपकम्– उपमानेन तुल्यत्वमुपमेयस्य रूपकम्
(विष्णु ध. पु. २४–४–५)
३. विशेषोक्ति – हेतुसाकल्ये फलानुत्पत्तिः (अलं. र. ५४ शोभाकरः)
४. यथासंख्यम्– उद्दिष्टानामर्थानां प्रतिनिर्देशो यथासंख्यम्
(अलं. सर्व.. ५९ रुय्यकः)
५. तद्देव ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुत्रं विनीतमपि शास्तुमनाः कदाचि-
  दूचे नृपस्सगुरुणाथ रहःप्रदेशे।
छात्रे सुतेऽपि निपुणे प्रतिशिक्षणं यत्
  तच्चापि कृत्यमुदितं मतिमद्गुरूणाम्[1] ॥४६॥

प्रासाद्य राज्यमभिरञ्जय सर्वलोका-
  निन्दुर्य्यथा प्रियकरप्रसरैः समन्तात्।
अन्वर्थता भवति राजपदस्य तस्मा-
  देवंविधे न्यगदि राजकलासुधीभिः[2] ॥४७॥

यस्य प्रयाति विकृतिं प्रकृतिर्नृपस्य
  तस्याचिरेण सुहृदेत्य सुहृत्पदञ्च।
राज्यञ्च वह्निमिलिताज्यदशामुपैति
  बन्धुश्च तोयरहितान्धुस[3]बन्धुरास्ते ॥४८॥

मन्वाद्युदीरितपथेन सदा धरित्री-
  पानोनृपस्य पुरतो गिरयोऽपि नीचाः।
भूमण्डलं लघुतरं परिभाति सिन्धु-
  र्गाधोवियन्नच महन्मरु[3]दल्पवीर्य्यः ॥४९॥

पृथ्वादिभिः पृथुयशोभिरियं धरित्री
  जानामि सम्प्रगदिता भवदादिभिश्च।
रक्षिष्यते विधिवदेव तथापि शिक्षा
  कृत्ये नियोजयति मां गुरुतात्व[4]दीया ॥५०॥

---

१ अर्थान्तरन्यासः– सामान्येन विशेषस्य विशेषेण वा सामान्यस्य समर्थनम्।
(रस भा. तृ पृ ५९९)

२. अर्थान्तरन्यासः।

३. विरोधः– अविरोधेऽपि विरोधो यत्रोक्तः स्यात् (अलं. मु. २९ विश्वेश्वरः)

४. भाविकम्– भूतभव्यार्थसाक्षाद्दर्शनवर्णनम्
(कुवलयानन्दम् १६१ अप्पय्य दीक्षितः)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लक्ष्मीर्निसर्गतरला विषयस्य भावा
    सर्वान्विहाय किल निर्जरसस्समुत्कान् ।
कश्चित्पुराणपुरुषं वृणुतेऽनपेक्षं
    हित्वा पुरा त्रिभुवनं भुवनोदरस्था[1] ।।५१।।

तस्याश्च मित्रमुदितं कनकं सखाय-
    मुन्मत्तमाहुरदसीयमतीव धूर्त्तम् ।
तत्सङ्गतः स्वयमचेतनमेवमत्त-
    मुन्मादकं भवति सङ्क्रान्तजना[2]नाम् ।।५२।।

तस्मात्प्रभूतकनकेन विधाय मेरुं
    सन्तारसांवरमणिं सहचन्द्ररश्मिम् ।
सर्वज्ञमेत्य विबुधं वितर त्वमस्मै
    नोन्मादमेत्य मुदितं श्रुत[3]शक्तिमन्तम् ।।५३।।

कन्दर्पदर्पशमनीनवरूपसम्प-
    त्कान्तानुरागनिपुणञ्च वयोऽपि राज्यम् ।
सामन्तमौलिमणिरञ्जितपादपीठ-
    न्नोन्मादयन्तु न च वत्स कदापि[4] चेतः ।।५४।।

उत्कोचजीवनकरः सचिवोपजापी
    कर्णजपो निजपराधजनोपतापी ।

---

१. काव्यलिङ्गम् - हेतोर्वाक्यपदार्थत्वे (अलं. सर्व. ५७ रुय्यकः)
२. पर्यायोक्तिः– पर्यायोक्तं यदन्येन प्रकारेणाभिधीयते ।
(अ. पु. ३४५–१८ अग्निदेवः)
३. उदात्तम्– वस्तुसम्पत्त्या महदुपलक्षणेन च वर्णनम् ।
(काव्यानु. पृ. ४२ वाग्भट्टः)
४. समुच्चयः– [illegible] (रस. [illegible] ३ पृ. ६७० पण्डितराजः)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भूदेवमत्सरपरो मनुजा इमे ते
राज्यस्य विप्लवकरा न वसन्तु[1] राज्ये ॥५५॥

हस्तं विहाय तव खड्गलताम्प्रयातु
तन्मुष्टिबन्धनमुपैतु मनः प्रहाय ।
बाणेषु पक्षपतनोत्थरयश्च लोकं
त्यक्त्वा युगातिशरणं श्रयतां भुजौ[2] ते ॥५६॥

पादे मिलत्यभिहितोऽपि पुरः क्षणेन
वक्षःस्थलं समधिरोहति वातवेगात् ।
लब्ध्वामुखव्यतिकरं विदधात्ययत्ना-
न्मूर्ध्नि स्थितिं खलजनोऽथ नरेण कल्पः[3] ॥५७॥

यस्मादुदग्रचरितानुगुणं सुशीलं
धत्से भविष्यति ततः विभुनान्वयस्य ।
नोपक्षतान्न्वयिविवेकविशुद्धचित्ते-
ऽसाध्यस्य किन्तु कथनीयमिदं ब्रवीमि[4] ॥५८॥

दुर्भेद्यमन्त्रमभिरञ्जितसर्वलोक-
श्चारेक्षणावगतमित्रविरोधिरीतिम् ।
स्थाने मुदाशयकुशेशयमोचितं त्वां
लक्ष्मीर्न मुञ्चति पुरा चपला चलापि[5] ॥५९॥

---

१. स एव ।

२. पर्य्यायः– पर्यायश्चेदनेकस्य स्यादेकेन समन्वयः ।
(काव्यवि २-४८ चिरञ्जीवः)

३. स एव ।

४. अनुमानम्– साध्यसाधननिर्देशोऽनुमानम् (अलं. सर्व. पृ. १८४ रुय्यकः)

५. परिकरः– विशेषणसाभिप्रायत्वम् (अलं. सर्व. ३२ रुय्यकः)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आकार्य्यं जन्म तव न स्फुटता प्रयातु
मन्त्रः प्रयाति यदि तत्पुरतो मृषोक्त्या।
आमूलमेव सकलं समलोकयेथा-
स्तिष्विप्रयुक्तिरहिते विहिता यथा स्यात् ॥६०॥

दौत्ये नियुक्तमधिसाधितकार्य्यमार्य्य-
म्प्रत्यागतं सदसिनानुनियोजयेथाः।
हस्ते क्रियाहनुमदाकृतिमस्य तावद्
रेखाकृतामितरबोधनिरोध[1]नाय ॥६१॥

कार्य्यं किमत्र भवतो जनरञ्जनं द्राक्
ध्येयं किमस्ति मधुसूदनपादपद्मम्।
सेव्यं किमुज्ज्वलमतिद्विजवर्य्यवृन्दं
हेयं किमैहिकसुखोत्सुकमर्त्ययूथम्[2] ॥६२॥

किं भूषणन्नरपतेर्नमणिर्य्यशोच्छं
कः शात्रवो विषयलोलुपता न बाह्यः।
मित्रं किमुज्वलमतिर्न तु बान्धवादि
किं वित्तमार्य्यचरितन्ननु हीर[3]कादिः ॥६३॥

साहित्यशास्त्रविदुषि व्यभिचारिदृष्टि-
र्वृत्त्यर्थविग्रहगिरः खलु शब्दशास्त्रे।
दुःशासनान्वितसभा ननु भारतादौ
सद्राज्ञि शासति विपक्षकथापि[3] तर्के ॥६४॥

---

१. सूक्ष्मम्- संलक्षितसूक्ष्मार्थप्रकाशनम् (अलं. सर्व. ७६ रुय्यकः)
२. परिसंख्या- एकस्यानेकत्र प्राप्तावेकत्र नियमनं परिसंख्या।
(अलं. सर्व. ६३ रुय्यकः)
३. सैव।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शास्त्रेण यान्ति विनयं विनयेन वित्तं
  वित्तेन सद्वितरणं सुयशश्च तेन ।
लोकत्रयं सुयशसा सुखमक्षयञ्च
  लोकत्रयेण नरनाथचरित्रपालाः[1] ॥६५॥

यद्भूमिपः प्रकृतिमण्डलमानियुङ्क्ते
  धर्माय ते तदपि तत्र प्रवर्तमानम् ।
तत्षाष्ठभागफलभागितया वृणीते
  भूमीपतिर्युगमिदं घनवद्धिकल्पम्[2] ॥६६॥

भूमीभुजां किमिह कार्य्यमिहार्य्यसङ्गः
  सेव्यं किमङ्घ्रियुगलञ्जगदीश्वरस्य ।
प्रेक्ष्यं किमाश्रितवनीयकभोजनादि
  रक्ष्यं किमिन्दुकरनिर्मलकीर्तिवृन्दम्[3] ॥६७॥

प्राप्तेऽभिषेणनदिने गमनस्य वेलां
  ज्ञातुं समर्पयति कैरवपद्मगुच्छैः ।
सेनाधिपे निभृतमन्त्रगणामहीशात्
  सङ्कोच्य पद्मनिकरं कथयन्ति युक्त्या[4] ॥६८॥

भाग्यञ्जनिर्नृपकुले विमले ततोऽपि
  राज्याप्तिरप्रतिहतं वचनं ततोऽपि ।

---

१. कारणमाला- पूर्वं पूर्वं प्रति यदा हेतुः स्यादुत्तरोत्तरम् ।
(प्रतापरु. ८-२६८ विद्यानाथः)

२. अन्योन्यम्- यत्र क्रियायाः परस्परं कार्यकारित्वं तत् ।
(काव्यानुशा पृ. ४२ वाग्भट्टः)

३. उत्तरम्- प्रश्नप्रतिबन्धकज्ञानविषयीभूतोऽर्थः (रस. भा. ३ पृ. ७८४)

४. सूक्ष्मम्- सलक्षितसूक्ष्मार्थप्रकाशनम् (अलं. सर्व. ७६ रुय्यकः)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तस्माच्च भूमितलपालनमाप्तधर्मं
तस्मात्पयोधितनयाधवपादभक्तिः[१] ।।६९।।
छत्रं सुराजशिरसि स्फुरतीन्द्रकल्प-
ञ्चित्रं समस्तजनतापविनष्टिरस्मात् ।
प्रत्यर्थिभूपतिगृहे तृणजातमेवं
संरोहयत्यपि सुभूपप्रताप[२]वह्निः ।।७०।।
क्वेदं कलेवरमनित्यममेध्यपूर्णं
क्वाकल्पमुज्ज्वलयशः स्थितिमत्पवित्रम् ।
धन्या नृपास्समधिगत्य धराधिपत्यं
तत्तादृशेन वपुषा परिशीलयन्ति[३] ।।७१।।
ब्रह्माण्डमण्डलमवैमि ततो विशालं
यद्भूभुजां नयदयोदितशौर्यभाजाम् ।
पारे परार्द्धगणनानि परार्द्धवृत्ता-
न्यासादयेति गतसङ्कटवासमत्र[४] ।।७२।।
शूराद् बिभेत्युपहसत्यपि भीरुकश्च
नास्तेऽतिदातरि न तुष्यति बद्धमुष्टौ ।
नानारतं भजति च त्यजति प्रहृष्टा
मुग्धाङ्गनेव नरनाथरमापि वत्स[५] ।।७३।।

---

१. सारम्– उत्तरोत्तरमुत्कर्षः सारालङ्कार उच्यते ।
(नरसिंहकविः)

२. असङ्गतिः– कार्यकारणयोर्भिन्नदेशत्वे सति ।
(प्रतापरुद्रीय ८–१५६ विद्यानाथः)

३. विषमम्– क्रियाफलाभावोऽनर्थश्च (काव्यानु ६–२६, सू. १९८ हेमचन्द्रः)

४. अधिकम्– वोध्यमाधारादाधेयाधिक्यवर्णनम् (चन्द्रा. ५,८१ जयदेवः)

५. स्वभावोक्तिः– स्वभाव एव भावानां स्वरूपमभिधीयते ।
(अग्निपुराणम् ३४४-३ अग्निः)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तस्मादिमां प्रमदसेव्यसुमध्यदेशा-
ञ्जङ्घाललाटकरजाङ्कवतीं रसेन ।
नाकृष्टकुन्तलमनाश्रितचोलभेदं
नाच्छिन्नकाञ्चिशनकैर्दययोपभुङ्क्ष्व[1] ॥७४॥

कामेन सार्द्धमुपयोजय धर्ममार्गं
शौर्य्यं भजस्व घृणया सह वित्तराशिम् ।
धर्मेण शाकमभिवाञ्छ विहाय सर्व-
मन्ते रमस्व निरपाय विभुक्तिबद्धा[2] ॥७५॥

प्रालेयपर्वतगुहासुगृहीतरस्वो
रोमाञ्चकञ्चुकितकम्पितगात्रयष्टिः ।
तद्वैरिभूपतिगणो विदधातु भीतिं
त्वत्कारणामिव तपस्विजने छलेन[3] ॥७६॥

राजन्वती क्षितिरियं भवता सुराज्ञा
भूत्वा बिभर्त्तु गिरिशृङ्गसमानसौधान् ।
राजन्तु तत्र गतभीतिसमस्तवर्णा-
स्तेशासतामनुदिनं सुकृतानि चर्चा[4] ॥७७॥

त्वत्स्वातिवृष्टिजनितोपनिषत्समज्ञा
मुक्तीकरोतु विशदातिशयात्प्रबालान् ।

---

१. विनोक्तिः- अन्यं विना यदान्यस्य स्यादशोभनता तदा ।
(अलं. मं. १३२ वेणीदत्तः)

२. सहोक्तिः- तुल्यकाले क्रिये यत्र वस्तुद्वयसमाश्रये पदेनैकेन कथ्यते ।
(काव्या. ३-३९ भामहः)

३. मीलितम्- वस्त्वन्तरतिरस्कारो वस्तुना मीलितं स्मृतम् ।
(सरस्व. कं. ३-४१ भोजः)

४. एकावली- यथा पूर्वं परस्य विशेषणतया स्थापनापोहने ।
(अलं. सर्व. ५४ रुय्यकः)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कृत्स्नं शिवं रचयतां स्फुरितादभेदा-
द्वर्णोत्करे विकिरतामतिशुद्धमात्रम्[१] ॥७८॥

त्वद्वैरिभूपतियशस्तमसा तमिस्रा-
मुच्चावचाध्वसदसत्परिभानहीनाम् ।
भूमीमिमां तव समुद्रभुजोत्थकीर्ति-
व्रातेन्दुरुज्वलयतु स्फुटतद्विशेषाम्[२] ॥७९॥

अर्कोपलस्य पयसा स्नपनेऽपि बाष्पा
शैत्यं यथा तव नरेन्द्र धराधरस्य ।
सङ्गे मुहुस्सदसतोरपि न व्ययतु
स्वच्छान्तराविरतखेलनचिद्विलासः[३] ॥८०॥

निष्पक्षपातमवितो जनकोऽथ मित्रं
त्यक्त्वा निजोपकृतिकाममिहोपकर्तृ ।
एतत्परोभयजगत्सुखदानबन्धु-
र्दत्तोऽसि पुत्र जगते गुरुदत्तदत्तः[४] ॥८१॥

आकल्पनाश्रुतजगत्त्रितयप्रकाशे
कीर्त्यां त्रिलोचनहते तव कीर्तिपूरे ।
अभ्यूहते त्रिनयनोत्थमकल्पकल्प-
ज्ज्योतिर्विभातु पुनरुक्ततरं वि[५]धातुः ॥८२॥

---

१. सामान्यम्– प्रस्तुतस्यान्येन गुणसाम्यादैकात्म्याम् ।
(अलं. सर्व. ७२ रुय्यकः)

२. तद्गुणाः– अन्यधर्मस्वीकारः (अलं. रत्ना. ६७ शोभाकरः)

३. अतद्गुणः– सति हेतौ परगुण–अस्वीकारः ।
(नयराजयशोभूषणम् पृ. १६० नरसिंहकविः)

४. विशेषः– यत्किञ्चिदवश्याभिधेयं यस्मिन्नाभिधेये निराधारम् ।
तादृगुपलभ्यमानम् ... (काव्या. ९-५-७१२ रुद्रटः)

५. प्रतीपम्– उपमानस्याक्षेप उपमेयताकल्पनं वा (अलं. सर्व. ७० रुय्यकः)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रूपं वयोऽप्यभिनवं प्रभुतापि वित्ति-
मुन्मादयन्ति जनिभाजमिति प्रसिद्धम् ।
शास्त्रावगाहनविशुद्धविवेकभाज-
स्तान्येव ते विनयवृद्धिकराणि[1] सन्तु ॥८३॥

षाड्गुण्यगुण्यनृपकार्य्यधरस्य वस्ते
वस्ते यशो हरिहयोरिह योगविच्च ।
शक्तो नभूरितरवारिविवर्षणेन
जेतुं परङ्कलुषयिष्यति वाहि[2]नीन्ते ॥८४॥

एकेन पाणिकमलेन विकासभाजा
सन्दानितां कुरुजनालिमहोसुलब्धाम् ।
एवं प्रजावनविधौ सततोत्थितस्य
स्वस्ते यशश्चटुलचञ्चुपुटैश्च[3] कीरैः ॥८५॥

चन्द्रभ्रमेण विबुधैरमृतप्रतीत्या
लेह्यं स्तनन्धयजनैरपि दुग्धबुद्धया ।
लब्ध्वा वराहवपुषं पुरुषं पुराणं
सौकर्य्यसाधितनिजोद्धरणं ध[4]रित्री ॥८६॥

गुञ्जेव धूर्ज्जटिकपर्दमहीनबन्धु-
ञ्ज्योत्स्नेव चन्द्रमनुरूपमलम्बि भानुः ।

---

१. व्याघातः– एकेन कृतं कार्यमपरेण तथैव–अन्यथा विधीयते सः ।
(काव्यानु. पृ. ४४ वाग्भट्टः)

२. प्रत्यनीकम्– प्रतिपक्षप्रतीकाराशक्तौ तदीयतिरस्कारः प्रत्यनीकम् ।
(अलं. सर्व. ६९ रुय्यकः)

३. परिवृत्तिः– अर्थानां विनिमयः (काव्यादर्शः २-३२१ दण्डी)

४. भ्रान्तिमान्– सादृश्याद्[illegible]तीतिः । (अलं. सर्व. १८ रुय्यकः)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्वामेकवीरमभिवीक्ष्य समीकभूमौ
प्रत्यर्थिभूमिपतयो दिवमुत्पतन्तः[1] ॥८७॥

एकैकशः समधिगम्य च पञ्चभावं
प्रेष्ठां धरामसुहरामपि सन्त्यजन्तु ॥
ये दुर्हृदञ्च सुहृदं युगपन्निपात्य
विप्रादिवर्णमुपसर्गवशान्नि[2]पात्य ॥८८॥

शब्दप्रपञ्चरसिका इह साधयन्ति
मा स्म प्रभुर्जगति तादृशसाधुतायै ।
आसाद्य पश्चिमवयः प्रविहाय राज्यं
मौनाश्रयं श्रयितुमेव समुत्सु[3]कोऽस्मि ॥८९॥

राज्यं ममेदमनुरूपतयाग्रहीर्य-
त्तन्मे मनोरथतरुः फलितोऽद्य दिष्ट्या ।
संवर्त्तवर्द्धितपयः पटगुण्ठमाप्त-
क्षोणीसमुद्वहनसौख्यजडोरुकाण्डः[4] ॥९०॥

प्रालेयशैत्यमिषवारितधातृतर्कौ
भव्यन्तनोतु गिरिराजवपुः किरीटे ।
जानामि तं पुरुषमेव भवन्तमद्धा
जानामि तं गुरुगिरानभवन्भवन्तम्[5] ॥९१॥

---

१. समम्– स्यादानुरूप्येण श्लाघा योग्यस्य वस्तुनः ।
(सा. द १०७१ विश्वनाथः)

२. व्याजस्तुतिः - स्तुतिनिन्दाभ्यां (अलं. र. ३९ शोभाकरमित्रः)

३. सैव ।

४. समाधिः कार्यसौकर्यं कारणान्तरसन्निधेः (कुवल. ११८ अप्पयदीक्षितः)

५. व्याजोक्तिः– सा समुद्भूतं वस्तु निगूह्यते ।
(प्रतापरुद्रीय ८–१३० विद्यानाथः)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संसारसिन्धुतरणे तरणी भवन्तम्
तत्क्षम्यतां प्रमुखतो मुखरोऽभवत्तो[1] ॥९२॥

इति मुदितमुदारं व्याहरन्तन्तनूजं
मनुजपतिमतो वाश्लिष्य विश्लेषमेव ।
उदितरुदितपौरस्फारनेत्राम्बुबिन्दु-
प्रचुरविमलमुक्तावृष्टमार्गस्समैषीत्[2] ॥९३॥

जनकविधुरमायं सायमासाद्य सद्यो-
न्तरितजनपतत्त्रीस्फीतकोलाहलाद्यम् ।
नयनदलनिमीलारुद्धतारालिबाल-
न्नृपतिवदनपद्मं सञ्चुकोचा[3]चिरेण ॥९४॥

जनकविरतवह्निज्वालज्वालावलीढं
क्षितिपतिमुखपद्मन्नेत्रपत्रान्तरालात् ।
अविरलतरलाम्भो बिन्दुवृन्दं विमुञ्च-
द्विधृतबहलवातन्निर्ववौ नैव[4] चित्रम् ॥९५॥

व्यवसितमिति पैत्रं निष्प्रतीकारमारा-
दवसितविषयाशं भूमिजानिर्विचिन्त्य ।
विगलितनयनाम्बुक्षालनेनानुमेने
जनकपदपयोजारण्यवासप्रयाणम्[5] ॥९६॥

---

१. यमकानुप्रासयोः संसृष्टिः एषां तिलतण्डुलन्यायेन मिश्रितत्वे संसृष्टिः ।
(अलं. सर्व. ८५ रुय्यकः)

२. रूपकानुप्रासयोः संसृष्टिः ।

३. एकपदानुप्रवेशे नानुप्रासरूपकयोः सङ्करः– एकमपेक्षान्यस्य प्रादुर्भावे तु सङ्करः
(अलं. मु. ५३ विश्वेश्वरः)

४. रूपकविभावनाविशेषोक्तीनामङ्गाङ्गीभावेन सङ्करः ।

५. काव्यलिङ्गसमा[illegible]क्तिरूपकोपमानां सन्देहः सङ्करः ।

DLC Nepal Sanskrit Academy, Kathmandu Collection

अथ कनकतनूजोत्पश्य भायात्तनूजे
 गुरुपदमनुयास्यन्मौनमाधाय वेषम् ।
मितहितवचनेनाश्वासयन्पुत्रपौत्रान्
 तपसि विहितकामो मन्दिरात्संप्रतस्थे[1] ॥९७॥

सहमुनिरयमेत्याश्रमं त्रस्ततानै-
 र्विरचिततनुवृत्तिः पर्णशालानिवासी ।
प्रणवजपनियामो भेददृष्ट्या विहीनो
 यमनियमतपोभिर्व्यापयामास[2] कालम् ॥९८॥

उटजविपुलसौधः शान्तिराज्ञीविहारी
 शमदमसचिवाद्यः कामकोपादिशत्रून् ।
द्रुततरमभिभूय प्राप्तयोगाग्रभूमि-
 र्व्यहरदतुलसौख्ये भूमिजानिः पुराणः[2] ॥९९॥

गते ताते कश्चिद्दिवसगणमुद्विग्नहृदय-
 स्ततो राज्यासक्तिक्षपितपितृविक्रतशुक् ।
स चक्रे स्वे चक्रे नवनवजनानन्दमनिशं
 तदात्वे चायत्यामपि सकलयोगैर्नर[3]पतिः ॥१००॥

कर्णाभ्यर्णविकृष्टसृष्टगरलज्वालाज्वलत्कुण्डलि-
व्यात्ता भीषणतुण्डतुल्यविनयत्प्रोद्दण्डकोदण्डतः ।

---

१. माधुर्य्यम्-
 मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः ।
 येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः । (काव्या. १-५१)
 माधुर्यमुक्तमाचार्यैः क्रोधादावप्यतीव्रता (सरस्वतीक. १-८०)
२. प्रसादः- प्रसिद्धार्थपदत्वं यत् स प्रसादो निगद्यते (सरस्वतीक १-६६)
 सुप्रसिद्धार्थपदता प्रसाद इति गीयते (अ. पु. ३४६-१६)
३. गुणसाङ्कर्य्यम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

क्षिप्रक्षिप्रविपक्षपक्षविलसत्क्षोणीन्द्रलक्षात्रसद्
वक्ष्यालक्ष्यविलक्षलक्षनिकरः क्षेमं दधौ क्ष्मा`पतिः ॥१०१॥
श्रीमत्कूर्मधराधरेन्द्रवसतिप्रख्यातपन्तान्वये
जातः श्रीभवदत्तपण्डितवरः श्रीभार्गवी तत्प्रिया ।
तत्सूनोरयमष्टमस्समगमत्सिद्धान्तवादानुजे
काव्ये श्रीकृतवीर्य्यसूनुचरिते सर्गः कृते सत्कृतौ ॥१०२॥

इति श्रीसुकृतिदत्तविरचिते कार्तवीर्योदयमहाकाव्येऽर्ज्जुन-
राज्याभिषेककृतवीर्य्यतपोवनगमनवर्णनम-
र्थालङ्कारप्रदर्शनन्नामाष्टमः सर्गः[२] ॥

---

१. ओजः– ओजस्समासभूयस्त्वमेतद्गद्यादिजीवितम् ।
(अ. पु. ३४६–१०, काव्याद. १–८०, सरस्वतीक. १–७१)

२. इति श्रीकिरातक्षत्रियकुलोत्पन्नस्य मेच्यञ्चलपांचथरलालीखर्क-
बरडाडाग्रामवास्तव्यदोवालीछाचामलिङराईकुलोद्भूतस्य डा. स्वामिप्रपन्नाचार्यस्य
कार्तवीर्योदयसम्पादने अष्टमसर्गस्य टिप्पणीपाठभेदादिकं समाप्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कार्तवीर्योदयमहाकाव्ये

नवमः सर्गः

कुण्डलीश्वरमञ्जीरमणिसिञ्जितरञ्जितम् ।
विघ्नव्यूहं गञ्जयतान्तारिणीपदपङ्कजम् ॥१॥

अथ तातनिदेशभाविता-
मवनीं साधु नृपस्य रक्षतः ।
पुरतो ददृशे विदर्भभू-
पतिदूतः प्रियभूतवाडवः ॥२॥

प्रणिपत्य रहोजुषस्ततो
निजवाक्यश्रवणोत्कचेतसः ।
पुरतो नृपतेस्स आददे
वचनं सद्वचनं विनीतधीः ॥३॥

जयतीह विदर्भसञ्ज्ञया
प्रथितन्नाकतलं स्वलङ्कृतम् ।
विबुधैर्गुरुशिक्षितैर्भृतं
विलसन्निर्जरसुन्दरीश्रितम् ॥४॥

युग्मम्

बहुभिर्बहुभिर्विचित्रितं
धृतसन्तानपरम्परागमम् ।
प्रसरद्वृषकर्मपालितं
धनदाभास्वरभासुरं तदा ॥५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नगरं खलु तत्र कुण्डिनं
धरणीमण्डलमण्डनाश्रितम् ।
विजयप्रभवं महोत्सवं
दधदेतन्नकिलामरावती ॥६॥

प्रियवासवतोषिताप्सरो-
गणप्रत्यग्रविलासमन्दिरम् ।
अमृताशनतुष्टमानसै-
र्गुरुसेवानिरतैर्बुधैर्युतम् ॥७॥

विशेषकम्

प्रियनन्दनखेलनोत्सुकै-
रपि रम्भोरुतले विहारिभिः ।
हरिणीनयनातितोषितै-
र्विलसद्भिर्बहुनिर्जरैः श्रितम् ॥८॥

कथमप्सरसोऽत्र न स्त्रियो
यददोवीक्षणलालसो जनः ।
अनिमेषपदं ययात्यल-
न्नहि पश्यन्द्विभुजश्चतुर्भुजः ॥९॥

तदभूस्समवैमि नाकिनां
रमणीजिष्णुरसोर्मिविभ्रमः ।
यदसुरसावलम्बन-
न्नपुनर्नाकसदां प्रियास्वहो ॥१०॥

मर्थद्वयम्

विहरन्त्यवलम्बनो मिते
CC-0. Nepal Sanskrit Academy, Kathmandu Collection
पथि नार्यो द्युसदाद्रसा न च ।

अवलम्ब्य रसान्वितान्ततो
विरहन्त्योऽत्र जयन्ति योषितः ॥११॥
हरिणीनयनेन निर्जिता
मुखपद्मेन जितेन्दुमत्यपि ।
चरणे निहिता मदालसो
गतिरासाञ्च मतिः कलावती ॥१२॥

युग्मम्

विधुतोरुयुगैरदम्भतो
लघुरम्भाकरसङ्गतिः कृता ।
कमलाकृतिचित्ररेखिका
कतमा तत्तुलनाङ्गताप्सराः ॥१३॥
प्रतिकाशिशिरोरुहोत्करा
मधुरागीर्भिरनर्घ्यकाञ्चयः ।
प्रमदाः शुभमध्यवेदयो-
र्न कथन्तीर्थभुवो भ्रसन्तु ताः ॥१४॥
यदधिष्ठितसुन्दरीगणं
प्रसिसृक्षुः पुरतो विशेषतः ।
शतशोऽप्सरसो विधाय तद्
दृढमभ्यासमुपादधे विधिः ॥१५॥
यदतीव समुन्नतालयो-
परिगा वायुचला पताकिका ।
वसुधामपहाय गाङ्गताम्
मुहुराह्वास्त किलामरावतीम् ॥१६॥
निशि चन्दिरचारुरोचिषा
द्विगुणीभूतसुधाकरैव यत् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विह[1]सङ्कुलसौधदम्भतः
    परिहासन्तनुते हरेः पुरः ॥१७॥

यदगारगचन्द्रशालिका
    रचिता चन्द्रशिलाभिरुन्नता ।
निशि चन्द्रकराभिमर्शतो
    वहते भो लघुचन्द्रशीतलम् ॥१८॥

विधुकान्तशिलातिशीलिता
    लयसाहस्रविनिर्गताम्बुभिः ।
निशि यत्र सतामवग्रह-
    प्रभवा भीतिरुदेति नो मनाक् ॥१९॥

शुचिमासविजृम्भिते रवेः
    शुचिसादृश्यविगाहितेजसि ।
शुचिना विधुकान्तवर्त्मना
    व्रजतां यत्र पदन्न शोचति ॥२०॥

दिननाथहवद्विभाविते
    यदगारे वसतां सदान्तरे ।
दिवसे सहसा विनिर्मिता
    सहसा शीतकथा विनश्यति ॥२१॥

यदधिष्ठितराजमन्दिरं
    वरमभ्रालिहवर्त्मना[2]रवेः ।
पथि विश्रमदं हरेः पदे
    तनुते रूपकशातिशातनम् ॥२२॥

---

१. क. मा. 'विहगसकुल' इति पाठः ।
CC-0. Nepal Sanskrit Academy, Kathmandu Collection
२. क. मा. 'ता' इति पाठः ।

नृपमन्दिरनैकरत्नजैः
किरणैः शक्रधनुस्ततिः कृता ।
तनुते परदेशगामिना-
मिह वर्षर्त्तुधियं सदा नृणाम् ॥२३॥

नृपमन्दिररत्नभित्तिषु
प्रतिमात्तः प्रतिबिम्बिता जनाः ।
प्रतिहारनिवारिता इह
प्रविशन्तः प्रतिभान्ति ते पुनः ॥२४॥

नृपसुन्दरमन्दिरोदरं
हरिदश्माचितमायतन्नृणाम् ।
नवशाद्वलभूमिविभ्रमं
कुरुते नूतनगामिनामिह ॥२५॥

मणिकुट्टिमचारिणी वधूः
प्रपदालं विकटीतटीपटी ।
नृपसद्मनिगहते निजा-
वयवेयत्त्वमिहाभिपश्यताम् ॥२६॥

स्फटिकाश्मनलेषु योषितां
पदपद्मं प्रतिबिम्बितं क्षणात् ।
इह नाभसपद्मपक्षका-
नुमितेः पक्षपदे नृपालये ॥२७॥

नृपगेहसुवर्णभृङ्गभा-
मणिभासा द्युमणिं पुरःप्रभम् ।
अपि तक्षसुशालतेजसं
तनुतेऽस्याऽसंगताविहान्वहम् ॥२८॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नृपपस्त्यहिरण्यशृङ्गभा-
मणिवज्रप्रभयातिभासुरा ।
इह भासयतः परस्पर-
न्तरुणार्कस्य विभापि सन्निधौ ॥२९॥

मदमत्तमतङ्गजावली-
चलकर्णाश्वलतालवृन्तकैः ।
इह राजगृहं गृहावली-
प्रभुभूतं परितः प्रवीज्यते ॥३०॥

प्रतिबन्धुरसिन्धुरक्षरन्
मधुलब्धभ्रमरोद्धुरारवैः ।
इह भूपतिमन्दिराजिरं
विरमङ्गीति कदापि नेक्षते ॥३१॥

इह सञ्जितशालभञ्जिका
प्रविशच्चित्तविषादगञ्जिका ।
नरनाथमनोऽनुरञ्जिका
समितिः शिल्पपदार्थपञ्जिका ॥३२॥

पयसि भ्रममश्नुते यतो
मणिभाभासिनि धार्त्तराष्ट्रधीः ।
विदुरोक्तिरदूरगामिनी
शुभगाङ्गेयविभावनापि यत् ॥३३॥

गुणचित्तकथा समाश्रिता
विजयेनार्जितभूरिवैभवा ।
इह धर्मसभा कथन्न सा
धृतनासत्यभवोदया मुहुः ॥३४॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

क्रथकैशिकवंशमौक्तिकं
गुणविश्रामललामधाम सः ।
इह भोज इति प्रथाङ्कितो
धरणीजानिरलं विराजते ॥३५॥

यदजस्रविसर्ज्जनाम्बुभि-
र्मरुरारोहति कच्छभूमिताम् ।
यदगण्यवनीयकावली-
र्धनदं स्ङ्कमवैन्यशङ्कया ॥३६॥

यदुदग्रकृपाणपाणिना
पणितं युद्धमहापणे द्वयम् ।
हरिदन्तविहारि सद्यशो
निजसौधैकरतिञ्जयेन्दिरा ॥३७॥

यदरातिनृपालसुन्दरीं
दरदीर्णां शवरी वरीयसी ।
गुरुयुक्तदरीनिकेतनं
परिदर्श्यातनुते दरादरम् ॥३८॥

यदरालकरालरुक्कर-
करवालक्षपितारिबालिका ।
द्वदीर्घदरीसरीसृपै-
रपि सख्यं प्रचरीकरोत्यलम् ॥३९॥

यदनुष्ठितसप्ततन्तुजा
भुवनं कीर्तिनटी समश्नुते ।
यदुदारशयः कुशेशयं
विहरत्येति विसर्जनाम्बुना ॥४०॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सप्तभिः कुलकम्

विधिना निरमायि किङ्गुणा-
न्निखिलानेकपदे दधाति नः।
द्रुहिणः शठ एवमीरितं
परिवादं परिमार्ष्टुमाश्रयः ॥४१॥

अमुतो बहुवाहिनीपते-
रुदितास्ते कनकप्रभाभिधा।
कमलाविमलाज्वभूषितं
दधती पाणिपदं सुकोमलम् ॥४२॥

दिगधीश्वरवाञ्छितश्रियं
विलसत्कल्पलतासहोदराम्।
अपि सोमसमप्रभोज्ज्वलां
न वदामः कथमिन्दिरान्नु ताम् ॥४३॥

प्रणिधाय विधिर्व्यधादिमां
हृदयं प्राणनिरोधकौशलः।
हृदयस्थिरताञ्जनोऽश्नुते
भृशमस्याः प्रतिलोकनेऽपि तत् ॥४४॥

अनुवाकविवेककुण्ठधी-
र्विधिरेतद्वपुरासृजत्कथम्।
किमु वारिधिजास्तवश्रुति-
र्न्नं जति[1] प्रास्य सहायतामलम् ॥४५॥

कनकस्य न तत्र सा प्रभा
कनके तत्प्रभया स्थितं खलु।

---

१. क. मा. 'स' इति पाठः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कनकं क्व नु रङ्करङ्कत-
स्तुलितं क्वातुलना जगत्सु सा ॥४६॥
शिशुरेव जगत्त्रयी भ्रुवा-
मधिरूढा सुषमाधिरोहणी ।
रुचिगर्वितसुभ्रुवामियं
गुणभारोन्नतमौलिमण्डलीम् ॥४७॥
वदनं सदनं सुरोचिषा-
न्नयते साग्विविलोकनायने ।
असितालसिताः शिरोरुहं
निरवद्यं कनकप्रभावपुः ॥४८॥

कनकाम्बुजचन्द्रचन्दिरात्
कथितात्सौरभवत्सुशीतलम् ।
हृदयङ्गमसुज्ज्वलञ्जलं
विधिरादाय विलिम्पतीव ताम् ॥४९॥

प्रतिदर्शमदर्शनङ्गतान्
विधिरादाय विधून्विचूर्ण्य तान् ।
कुरुते प्रतिवासरन्नु तं
मुखनिर्णेजनचूर्णपूरणम् ॥५०॥

विधुमण्डलतत्सुधां समां
विधिरादाय विधाय तन्मुखम् ।
गतसारमिदं किमाततो-
दलकालं कृतिसिक्थकालयम् ॥५१॥

कृतविष्णुपदावलम्बनो
विधुरेतन्मुखकान्तिवाञ्छया ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रतपन्त नुतामुपागतो
द्विजराजत्वमगान्तभान्तुताम् ॥५२॥

निशि सुप्तमिवोत्पतन्मुखं
रजनीशो द्युतिभिर्विजृम्भते ।
प्रतिबुध्य तदानने जग-
त्युदिते स क्व दिवा भृशायते ॥५३॥

कमलाकनकप्रभाकरं
कमलं तच्चरणाम्बुजासनम् ।
प्रतियातु कथन्तुलाकथा-
मथ तस्या वदनेन भास्वता ॥५४॥

कमले विमलेऽपि नो सुधा-
ऽमृतसिन्धौ न विधौ च सौरभम् ।
यदसीयमुखञ्जगत्सुख-
न्द्वितयन्तद्धरतेऽतिनिर्भरम् ॥५५॥

कमलं कमलन्न निर्मलं
सकलङ्कं विधुमण्डलं स्फुटम् ।
विलसद्वदनं तदाननं
समताङ्केन समे नु विष्टपे ॥५६॥

सजलञ्च तदाननं समं
कमलावासतया कथं भवेत् ।
मधुपैः परिचुम्बितं रसा-
द्विधिपत्नी प्रियवासभावितम् ॥५७॥

नलिनं विकचं लसत्कचं
CC-0. Nepal Sanskrit Academy, Kathmandu Collection
द्विजराजप्रभया गतप्रभम् ।

स्फुरितश्च तया तदाननं
सदृशं तस्य कथं भवेन्नु तत् ॥५८॥

चपले विपुले विलोचने
हरिणीगर्भविमोचने श्रिया ।
शिशुखञ्जनगर्वगञ्जने
जयतोऽस्वालसदञ्जने पुनः ॥५९॥

हरलोचनवह्निकीलया
मदनं भस्मकृतं महौषधी ।
पुनरानयितुं विनिर्मिते
विधिना तन्नयने धरापते ॥६०॥

त्रिजगज्जयया त्रिकं रति-
स्मरयुग्मं ध्वजयष्टिरुत्तमा ।
अदसीयतनुर्विलोकने
द्वितयं मीनयुगं तदङ्कितम् ॥६१॥

नलिनीदलसत्स्थलस्थितो
विजयं प्राप्य तिथिं सखं जनः ।
प्रविलोकयितुर्जयं दिशन्न-
पितन्नेत्रयुगान् पलायते ॥६२॥

रुचिहीनसुपीनमीनतः
कथने तन्नयनोपमा भवेत् ।
यदमू खलु वामदक्षिण-
श्रुतिमार्गानुगते न चाखण्डलः ॥६३॥

श्रुतिरेव हि तच्छ्रुतीमता
यदिह व्यासकृता मयद्वयी ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रविभज्य पुराणसंहतिः
स्थितिमाप्तास्ति नवाङ्कसंविदा ॥६४॥

चमरीकवरीमदशिरो
विलसन्तीं प्रविलोक्य साम्प्रतम् ।
जघने न बिभर्ति चामरं
परिनिश्चित्य गतप्रयोजनम् ॥६५॥

इदमीयशिरोरुहस्पृहं
कलयन्ती कलया कलापिनी ।
निजबर्हरुचा शरत्कृतं
लभते बर्हनिबर्हदण्डनम् ॥६६॥

प्रसदीयललाटपट्टिका-
वृततिथ्यङ्कवपुर्विशेषिणी ।
मृगनाभिकृताङ्कमावह-
त्यमलां बिन्दुतनुश्च रोहिणीम् ॥६७॥

शुकतुण्डमदो मुखाम्बुजं
सरसं वर्णयतीति मत्सरि ।
शुकतुण्डमुवास तत्र किं
विलसद्गन्धवहाञ्छलात्परम् ॥६८॥

रदनाः फलिवल्लिपर्णभू-
रसरक्ता विलसन्ति तन्मुखे ।
मदनावहतुष्टिपुष्टये
भवितारः कतमोत्तरोष्ठके ॥६९॥

मसृणोघसृणप्रभाधरो-
CC-0. Nepal Sanskrit Academy, Kathmandu Collection
धरतेऽस्या मरुमार्गबन्धताम् ।

युवभिः कलितैः पिपासया
श्रुतिमात्रेण गवेषितामृतः ॥७०॥

त्रिजगद्गतकान्तिदर्शनं
विधिरादर्शमदो मुखाम्बुजम् ।
विरचय्य भवत्कृते नु कि-
ञ्चिबुकं वृत्तमपि व्यधात्पुनः ॥७१॥

प्रसदीयगलाध्वना स्वरा-
नखिलान्वाक्तनुते यदश्रमात् ।
तदवैमि विरञ्चिरादधे
निजकान्ताकरकच्छपीनिह ॥७२॥

कविता भविता रसान्विता
व[1]चनं सद्वचनं विवञ्चनम् ।
प्रथमा सुषमेति तद्गल-
ङ्गणयन्तिक विदधे त्रिरेखकम् ॥७३॥

प्रतिबालमृडालनालया
सममे तद्भुजयोर्युगं द्रुतम् ।
नवसङ्गमवाप्य कण्टकै-
र्भविता उचिराजहंस ते ॥७४॥

भवती[2]ह सुरभूरुहो भवां-
स्तव सा कल्पलतार्हति क्षितौ ।
वहेऽङ्गुलिमालपल्लवा-
म्प्रतनुं या प्रतति भुजच्छलात् ॥७५॥

---

१. क. मा. 'व्यसनम' इति पाठः ।
२. क. मा. 'ह' पाठो नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बहुमीलितपर्वसन्धयो
मृदुलाभारतगा गिरो यथा ।
नखलोहितवर्णशोभनाः
करशाखाः परिभान्ति सुभ्रु'वः ॥७६॥

मृदुमांसलमंसमुन्नत-
ङ्कुरनालाकरहाटसन्निभम् ।
रसकालमवाप्य सुभ्रुवो
भविता कण्टकिताङ्कुरान्वितम् ॥७७॥

उदरं विपुलास्थिनो वरं
विमलन्नामलकञ्चतूवरम् ।
कुचकोरकयुग्ममुच्यतां
सदृशं केन विदर्भभूभियः ॥७८॥

कनकाचलजा शिला भवेत्
सुरतक्ष्णा मसृणीकृता मुहुः ।
सुरभीपयसाभिषेचिना
जनश्वेताङ्कुरयुग्ममुज्वलम् ॥७९॥

युग्मम्

तदपि स्फुरितोजसां भोरै-
र्यदि वृत्तत्वमवाप्नुयात्तदा ।
दरनिर्गतकूचसूचिन-
स्तुलना स्यात्कनकप्रभोरसः ॥८०॥

सरसीरसपूरितेव सा
तदुराजौ जलजातकोरकौ ।

---

१. क. मा. 'भ' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गतभृङ्गरसावहो लसद्-
भ्रमरी राजकरप्रकाशिनी ॥८१॥

तव चित्रचरित्रसंभव-
द्रुतसंविद्रुतवक्षसि स्थिरम् ।
मदनाङ्गुलिनालचालित-
ङ्गुलिकायुग्ममवः कुचौ किमु ॥८२॥

मुखनिर्जितराजमण्डला-
ऽधरसंस्थाननवासवासदा ।
विनिबद्धवलिश्च मध्यतो
न कथं साखिललोकवन्दिता ॥८३॥

हरलोचनवह्नितापितो
मदनोऽस्यास्सरसे पयोधरे ।
त्रिवलित्रिपथातरान्तरे
रमते नाभिसरोवलेऽप्यलम् ॥८४॥

कुचचक्रशिशुः सरोवरे
विजिहीर्षुः किल नाभिसन्नके ।
यदुदस्यत शैवलन्नु त-
द्रुचिरास्यास्तनुरोमराजिका ॥८५॥

सविधेऽस्ति पयोधरोन्नति-
रिति संसूचयितुं विनिस्मृता ।
किमु सूक्ष्मपिपीलिकावलि-
स्तनुरोमावलिकैतवादिह ॥८६॥

तपसानुपमेन किं विधिः
परमाप्यं शुचिसर्गकारणम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परिगृह्य विदर्भ[1]यि धुजो-
   दरसृष्टिं विदधे विलोक्य च ।।८७।।

परमाणुरपि प्रदृश्यता-
   न्तपसा योगवतेति वाञ्छया ।
विदधे विधिना विदर्भभू-
   पति[2]रन्येक्षणगोचरो न किम् ।।८८।।

त्रिजगज्जयिनो मनो भुवो
   रथचक्रं सुनितम्बदम्भतः ।
वहते महते रणाय सा
   परिसन्नद्धतरञ्च वर्त्तुलम् ।।८९।।

पृथुवृत्तनितम्बमण्डलो-
   परिशिञ्जन्मणिमञ्जुमेखला ।
दरघूर्णितनेत्रपङ्कजा
   शयिताङ्के कृतिनोऽनुकस्य सा ।।९०।।

कदलीसरसापि चिक्कणा
   न विलोमापि तदूरुसन्निभा ।
करिराजकरोऽपि रोकवा-
   नतु सोमोऽपि न तत्तुलाङ्गतः ।।९१।।

कनकप्रभया निजोरुणा
   नृपरम्भा हरिणी पराजिता ।
करिराजकरोऽपि तद्धिया
   कुरुते सङ्कुचितन्मुहुर्मुहुः ।।९२।।

---

१. क. मा. 'मि' इति पाठः ।
२. क. मा. 'दि' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रुचिगर्वविवादशालिनो-
र्जघनं साक्षितदूरुकाण्डयोः ।
परिगृह्य गजाशनच्छद-
ङ्कुरुते सन्धिमिहान्तरा किमु ॥९३॥

अदसीयपदारविन्दयो-
स्सुषुमामाप्तुमलन्तपस्यति ।
कमलञ्जलवाससंभ्रवं
घृतभृङ्गालिजपाक्षमालिकम् ॥९४॥

जलजञ्जलवासजन्मना
तपसा तत्पदताङ्गतं तनुः ।
यदिदं श्रितचारुहंसकं
कविवाक्यैर्मधुरैश्च संस्तुतम् ॥९५॥

द्विविधे द्विविधां प्रबालके
दधते तत्पदपङ्कजं नृणाम् ।
अवनी[1]जमतीव कोमलं
स्थिरराङ्गनजडास्पदं पुनः ॥९६॥

अपि मानवती विदर्भजा
रमणीयैर्मणिभिस्समाचितम् ।
कनकान्वयमौलिभूषणं
पदपद्मेन विलोडयत्यलम् ॥९७॥

शिखराग्रदन्तीपदाम्बुजे
नखरान्नातिखरान्बिभर्ति सा ।

१. क, मा, 'अवनेज' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रमणीगणमौलिमण्डली-
मणिशाणोत्कषणैस्समुज्वलान् ॥९८॥

मदमत्तमरालमानिनी-
मनसा मन्दगमाभिमानकम् ।
विजहाति विदर्भसुभ्रुवो
गतिमालोक्य विलासलालिताम् ॥९९॥

मृतसम्भ्रमविभ्रमाभ्रमद्-
भ्रमरालपभुगजप्रिया प्रभुः ।
परिदृश्य विदर्भजा गतिं
सविलासां करिणी हृणीयते ॥१००॥

कुतुकाद्विधिना व्यधायि सा
कचपाशात्प्रपदाद्गुणास्पदम् ।
कृतिनः कतमस्य सा कृते
कृतिरास्तेऽनु सरोजजन्मनः ॥१०१॥

अधुना मधुनातिसाधुना
विधुनामात्यवरेण सीधुना ।
मदनः प्रचिकीर्षतेऽनु किं
कृतमन्त्रस्सदनन्तदनङ्गकम् ॥१०२॥

इय[1]मस्ति नरेन्द्रनन्दिनी
शिशुता प्रेमवतीति यौवनम् ।
शिशुतामवलम्ब्य तत्तनौ
रमते सम्प्रति सत्प्रतिश्रवम् ॥१०३॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१. क. मा. 'रु' इति पाठः ।

शिशुता युवता च तत्तनौ
  निजनिघ्नत्वविधित्सया किमु ।
कलहं कलहंस संरव-
  त्कलकाञ्च्यास्तनुतोद्यकैतवात् ॥१०४॥

युवतां युवता स्मरेण त-
  च्छिशुताशेषनिषेधनाय किम् ।
हृदये कुचधीरदर्शको
  धृतरोमावलिदण्ड आहितः ॥१०५॥

अनुदिनरममाणयौवनोष्म-
  प्रसरविशीर्णशिशुत्वशैत्यमान्द्या ।
शुचिरसलतिका किमत्पुराणा-
  भिनवदलेव नरेन्द्रजाद्य भाति ॥१०६॥

पदयुगमतिमन्दश्चञ्चलन्नेत्रयुग्मं
  कृशतरमवलग्नस्पीनपीनो नितम्बः ।
कुचयुगलमपीत्प्रांशुनाभिर्गभीरा
  जयति मदनमित्रं यौवनं प्राप्य तस्याः ॥१०

अनुदिनमुदयन्तं यौवनारम्भमग्र्यं
  जनकनृपतिरस्याः प्रेक्षभूमीपतीनाम् ।
दिशि दिशि निजदूतान् हूतये सन्दिदेशा-
  वधृतदुहितृवाञ्छा साध्यतत्पाणिपीड्यः ॥१

यातेषु जङ्घाकरिकेषु भोज-
  श्शुद्धान्तशुद्धान्तरचारशुद्धम् ।
मां प्रेषयामास निमन्त्रणार्थं
  सदेह[1]पुत्री प्रणयावलोकैः ॥१०९॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१. क. मा 'सहेह' इति पाठः ।

तत्स्वयंवरमलङ्कुरु तस्या
भाविनं कतिपयेन दिनेन ।
राजतं खलु युवामभीप्सितं
सङ्गमेत्य रतिमन्मथौ यथा ॥११०॥

आयादायाति चायास्यति च वसुमतीजानिवृन्दं वरीतुं
तां सौन्दर्यैकसीमान्नृपमुकुटशिरोरत्नभूयस्तथापि ।
तस्यास्तत्कालभावोदयजडविसरत्स्वेदरोमाञ्चराजत्
प्रेमोत्सुक्यप्रकर्षप्रहितभुजगतस्रग्धराकन्धरा ते ॥१११॥

सा त्वं प्राप्य भवांश्च तामनुदिनं सौन्दर्यसारश्रिया
सौख्यं यातु पयोजजन्मविबुधसृष्टिप्रमोत्करम् ।
वृत्तं वानघकुम्भिकुम्भदलने शार्दूलविक्रीडितं
स्मारं स्मारमुदारमालयलसन्निःश्रेयसं तत्कृतौ ॥११२॥

शुद्धान्तप्रणयप्रचारनिपुणक्षोणीसुरेणोहितं
दृष्टं भोजकुलावतंसतनुजा प्रत्यङ्गमानोज्ञकम् ।
यत्तत्कानकिभूभुजः श्रुतिपुटद्वारानिनीतात्मनः
सौख्यक्षेमपयोधिमग्नमननोत्संख्यावतस्तद्विजात् ॥११३॥

श्रीमत्कूर्मधराधरेन्द्रवसति प्रख्यातपन्तान्वये
जातः श्रीभवदत्तपण्डितवरः श्रीभार्गवी तत्प्रिया ।
तत्सूनोर्नवमो गुणैरनवमः सर्गोऽगमत्पूर्णतां
काव्येऽस्मिन् सुकृतेः कृतौ कृतिमते रत्नावलीभ्रातरि ॥

इति श्रीसुकृतिदत्तविरचिते कार्तवीर्योदयमहाकाव्ये
स्वयंवरोपक्रमे कनकप्रभावर्णनन्नाम नवमः सर्गः[1] ॥

---

१. इति श्रीकिरातक्षत्रियकुलोत्पन्नस्य मेचयञ्चलपाँचथरलालीखर्क-वरडाङाग्रामवास्तव्यदोवालीछाचामलिङराईकुलोद्भूतस्य डा. स्वामिप्रपन्नाचार्यस्य कार्तवीर्योदयसम्पादने नवमसर्गस्य टिप्पणीपाठभेदादिकं समाप्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कार्तवीर्योदयमहाकाव्ये

दशमः सर्गः

लक्ष्मीपतीश्वरविरञ्चिकिरीटशाण-
प्राप्तप्रकाश[1]नखरत्नविराजमानम् ।
स्वान्तान्तरालतिमिरं मम सन्धुनोतु
श्रीतारिणीपदयुगं दययाऽव[2]तीर्णम् ॥१॥

निपीय तर्षाद्बुधवर्यनिष्प-
द्वचोऽमृतं तद्गतमाधुरीं सः ।
तिरोविलोलच्छिरसाभिनन्दन्
स्मितोत्तरं वाचमुवाच भूपः ॥२॥

अये किमस्माभिरकारि पुण्यं
भवान्तरे वा जनुषीह यस्य ।
फलं प्रजातं भवता सहास्या-
सुभाषितस्तोमवता सहास्या ॥३॥

चित्रं किमत्राऽर्ज्जुनपक्षपाती
पियूषबिन्दून्विरलान्निशायाम् ।

---

१. क. मा. 'ष' इति पाठः ।

२. 'उक्ता वसन्ततिलका तभजाजगौ गः' इति वसन्ततिलका वृत्तम् । अस्मिन् सर्गे 'उपेन्द्रवज्रा प्रथमे लघौ सा' इति लक्षणेनोपेन्द्रवज्रवृत्तं प्रयुक्तम् । मध्ये मध्ये [illegible] प्रयुक्ता ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्विजाधिपो मुञ्चति धस्रमध्ये
  चित्रम्भवांश्चामृतभूरिधाराः ॥४॥

अहो युतानाञ्छुचिना रसेन
  विनिःसृतानां पुरुषोत्तमाच्च ।
वाचाम्बभूषां सुरदीर्घिकोपमां
  साधर्म्यभाजामधुनोपलम्भः ॥५॥

गङ्गातरङ्गाः कविवाग्विलासाः
  कामिन्यपाङ्गाः कृषिकर्तृकल्पाः ।
प्रमेधमानाः शुचिना रसेन
  प्रमोदयन्ते निकटस्थचित्रम् ॥६॥

परोपकारैकरसो भवादृङ
  न प्रार्थनामर्हति पीडितानाम् ।
किमर्थितः शीतमयूखमाली
  प्रतिक्षपं मुञ्चति सौधधारा ॥७॥

सद्हृद्यपद्या सुपदा सुवर्णा
  रसान्विता भूरितरार्थयुक्ता ।
लसद्ध्वनिस्सत्कविता च कान्ता
  पुरी सुराज्ञः प्रमुदे न कस्य ॥८॥

श्रुतैव सा चन्द्रिरचारुवक्त्रा-
  देशानटद्भ्यो बहुशः पुरापि ।
अनेन युष्मद्वचसा तु कान्ता-
  मध्यक्षतापन्नतनूमवैमि ॥९॥

पिपासितस्येव जलं सुशीत-
  ञ्छायेव तिग्मद्युतितापितस्य ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एमराधिसिन्धौ, मम नष्ट सन्धौ
निमज्जतस्ते वचनं सुमित्रम् ।।१०।।

कुलञ्च शीलं विमलं सलीलं
वचो विदर्भक्षितिवासवस्य ।
निमन्त्रणं यन्त्रणया विहीनं
त्वदीरितं केन भवेद्विलम्बः ।।११।।

दैवं हि दिष्टं क्षितिदैवतं त्व
न्दिष्टं मम मिष्टमेव (?) ।
शिष्टानुशिष्टे सुजनोऽपि कष्टे
प्रवर्तते किं सुतरामभीष्टे ।।१२।।

सुवंशजाता सरला सुपर्वाऽऽ-
पाणिग्रहात्सौख्यकरी कृशाङ्गी ।
प्रियाशयालम्बनवतीसुयष्टि-
र्गार्हस्थ (?) प्रमार्गास्खलनैकहेतुः ।।१३।।

चिन्तामणिर्वेत्ति किमर्थ्यमानं
गौः कामधुग्वानुमिनोति किञ्च ।
शृणोति किङ्कल्पतरुश्च कान्ता-
खिलप्रमाणैः पतिवाञ्छितज्ञा ।।१४।।

न शर्मगार्हस्थ्यमृते नराणा-
न्तच्चानुरूपां गृहिणीं[1] विना ना ।
न चापि पुण्योत्करमन्तरेण
न सोऽपि दुःखीर्णतपो विनेवे ।।१५।।

---

१. क. मा, 'णो' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मन्ये द्वितीयामहमद्वितीयं
  मित्रं तृतीयार्थपयोधिपारे ।
विना तृतीयां प्रकृतिं द्वितीया
  प्रिया न कस्यास्ति युगे द्वितीये ॥१६॥

शाला विशाला विमला च माला
  वित्तञ्च चित्तं विपुलं कुलञ्च ।
रूपन्नराणामनुरूपमस्ति
  चन्द्रामना नास्ति मुधैव सर्वम् ॥१७॥

अपारसंसारपयोधिपुरे
  निमज्जमानस्य जनस्य नूनम् ।
लीलाविहाराय विधिर्व्यधासी-
  त्तारुण्यपूर्णां तरणीं पुरन्ध्रीम् ॥१८॥

भवन्तु मित्राणि बहूनि लोके
  लोकेश्वराणामपि चेतरेषाम् ।
लोकेशतृप्तं स[1]यशंगृहीतं
  प्रियाशये शायिसुमित्रयुक्तम् ॥१९॥

उद्वो[2]ढुकामोऽस्मि नरेन्द्रकन्यां
  स्थाने सुतां भोजकुलावतंसः ।
स्वयंवरे दित्सति तत्र कन्या
  वाञ्छैव हेतुः किमिहान्यकृत्यम् ॥२०॥

तथापि कन्या हृदयेतिलोले
  यथा तथा मामकसम्प्रवृत्तिः ।

---

१. क. मा. 'श' इति पाठः ।
२. क. मा. 'उद्वोढु कामोऽस्मि' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रवेशनीया भवतातिविद्वन्
विदर्भभूपे स्वमुखाध्वनैव ।।२१।।

सापेक्षयोर्योग्यपदार्थयोश्च
यो योजनं बुद्धिबलाद्विधत्ते ।
पदाविभातस्समुपस्थितोऽसौ
विशिष्टबुद्धेः प्रभुतामुपैति ।।२२।।

तत्खद्यगद्यद्युतमार्य्यकार्य्यं ?
विधेहि सौख्ये युगलन्निधेहि ।
विधेर्विधानं हि बुधो विबुध्य
विधेयमायातिविधावधानः ।।२३।।

गते त्वयि त्रीणि दिनानि विद्वन्
विलङ्घ्य वैदर्भपथस्य पान्थः ।
भवामि भावो भवता विभाव्यो
भोज्याहृदो भोजकुलानिरुद्धः ।।२४।।

इत्युक्तवन्तं कृतवीर्य्यसूनुं
पुनस्समूचे द्विपदांवरेण्यः ।
भोज्याशयं पूर्वतिरोहितं स
प्रकाशयज्ज्ञाततदीयभावः ।।२५।।

यद्यस्ति भोज्याकरपीडनेच्छा
नरेन्द्र भोस्सिद्धमवेहि कार्य्यम् ।
पयोदसिक्ता धरणी न किञ्चि-
दपेक्षते बीजयुताङ्कुराय ।।२६।।

पुरा सुराणामृषिरागतस्त-
त्पितुर्गृहं पितृनिदेशवाही ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सपर्य्यया कुण्डिनमण्डनस्तं
संगृह्य वृष्यान्न्यधितादरेण ॥२७॥
सुता वरान्वेषणविन्न चित्तं
भूपालमालापविचित्रभङ्ग्या ।
विनोदनार्थं पुरतः प्रविष्टा
वयं स्थितास्संसदि तत्र राजन् ॥२८॥

नरेन्द्रसख्यातिशयाद्रहस्ये
न्यषेधिषं तत्र न दर्शकैश्च ।
अश्रौषमष्टश्रुतिवाक्यमारा-
त्सुरर्षिणोक्तस्पुरतो नृपस्य ॥२९॥

वैदर्भदर्भाग्रमतेस्सुता ते
रमासमासादितभूमिलोका ।
तस्यावरश्चक्रधरऽपरऽ कः
स चास्ति भुव्यर्जुनसञ्ज्ञयाऽथ ॥३०॥

वृणोति सा तम्पुरुषम्पुराण-
स्य पौरुषं यत्नमपेक्षते च ।
तथापि सर्वान्नृपतीन्समेत्य
स्वयंवरस्यापि कथा कथास्तु ॥३१॥

तयोऽर्ज्जुने प्रेमरसातिरेका-
द्धृतेऽखिलक्ष्मापतिमण्डलस्य ।
तामीप्सतो युद्धजयेन भङ्गो
माहिष्मतीशाद्भविताऽचिरेण ॥३२॥

त्वदीयपुत्र्या वृतमर्ज्जुनं तं
CC-0. Nepal Sanskrit Academy, Kathmandu Collection
समस्तभूमण्डलराज्यलक्ष्मीः ।

विहाय मानं वरिता सहैव
तथापि[1] सा भर्तृगृहं प्रयाता ॥३३॥

गङ्गापगाभिर्जलधिं यथैति
तथा सपत्नीभिरुपास्यमाना ।
भर्तारमेमीति च सूचयन्ती
राज्यश्रिया साकमसौ प्रयाता ॥३४॥

प्रारोपितश्रीधरणीधराख्यं
कन्यावरद्वन्द्वमुपास्यमानम् ।
तनोति भद्राणि नृणामृताख्य-
न्तदेव किं किं तनुयान्न भद्रम् ॥३५॥

कन्यावरद्वन्द्वमिदं दधान-
श्चित्तो मनो निग्रहसावधानः ।
जगच्चलञ्चेत्यनुसन्दधानः
कैवल्यलाभाय कटिं बधान ॥३६॥

एतद्युगायोजनचिन्तयालं
कश्चन्द्रिकाञ्चन्द्रमसा नियोक्ता ।
विहाय लक्ष्मीर्गिरिशादिदेवान्
पुरा पुराणं पुरुषं वृणोति ॥३७॥

प्राकारणीया निखिलावनीन्द्राः
स्वयंवरव्याजबलात्सुतायाः ।
तद्भूतिरास्तान्तनुजा विवोढु-
र्जयोपकारादु१दा विशाला ॥३८॥

---

१. क. मा. सथापि इति पाठ.।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विधातृसन्दिष्टमिदन्निगद्य
प्रभोर्यथाज्ञेति न मुक्तवन्तम् ।
नृपं समापृच्छ्य गते सुरर्षौ
मया सहान्तःपुरमागमत्सः ॥३९॥

तत्रात्मजामङ्कतले निवेश्य
जगाद राजा महिषीसमेतः ।
कन्येति धन्ये धियमेव मन्ये
त्वां लोकगण्ये क्षितिजन्मसान्ये ॥४०॥

धन्यासि नान्यासि पयोधिजाया
जाया प्रजाया जगदीश्वरस्य ।
मम प्रजायाश्छलमादधासि
को जन्मनेते प्रभवेदजायाः ॥४१॥

माहिष्मतीशस्य जनार्दनस्या-
र्ज्जुनस्य योग्या महिषी प्रदिष्टा ।
त्वं वेधसास्म¹नसोतु यात्रा ?
यात्रापि तस्यात्र दिनैः कियद्भिः ॥४२॥

स्वयंवरे सर्वनृपान्विहाय
विहायसा रत्नसमानभासम् ।
विहाय नाधिक्यममुञ्च भूमा
विहायनं त्वं वृणुया वरेण्ये ॥४३॥

क्षीराब्धिवच्चक्रधराय पुत्री
विनिर्गलन्मन्दरसानुरागः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१. क. मा. 'न्य' इति पाठः ।

ददानि राजात्मजलोकतोषी
वनस्थितिस्वास्थ्यमुपैतु कामः ॥४४॥

प्रत्ययप्रकृतिवद्युवां विधे-
श्शासनं समधिगम्य सङ्गतौ ।
प्राप्नुतश्च निजरूपसम्पदा
सार्थकत्वमनुभूत साधु तम्[1] ॥४५॥

इत्थमुक्तवति भोजकुलाग्रे
प्रोन्नतं सुपृथुहर्षवशेन ।
ह्रीभरादवनितं सुतायाः
काञ्चनाप सुषुमां वदनाब्जम् ॥४६॥

हर्षमित्रमवलम्ब्य तदानीं
व्रीडविघ्नमवमत्य कटाक्षः ।
प्रस्थितः सहचरीवदनाब्जे
नैपुणेन बुबुधे नृपपुत्र्याः ॥४७॥

आयतास्सुविशदास्सरलास्ते
किञ्चिदुद्गतरुचिस्मितमित्राः ।
दृष्टयः प्रियसखीवदनेऽस्या-
स्सम्मदोर्मय इव त्वयि दृष्टाः ॥४८॥

जातमद्य सुदिने न किमन्यन्
मृग्यते शिवमिति प्रतिवक्तुम् ।
तत्कटाक्षमनुयाति वयस्या-
पाङ्गदर्शनमथ स्म सहास्यम् ॥४९॥

---

१. ङ-ग. [illegible] इति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भूपतिर्नतनतं वदनाब्ज-
न्नेक्षते स्म दुहितुः प्रियसख्याः ।
प्रेक्ष्य वक्त्रमुदयत्पृथुहर्षं
सोचितसम्मतिमवैत्तनुजायाः ॥५०॥

भूपतिस्वतनयामिति वाचा
नन्ववन्द्यचरितस्सद आगात् ।
तत्र मन्त्रिजनमादिशताशु
प्रकृताय विदधे विधिविज्ञम् ॥५१॥

तन्निदेशमधिगत्य मन्त्रिण-
स्सौधपङ्क्तिमतुलामचीलृपन् ।
भाविभूपतिसुतास्वयंवरा-
र्थाय सर्वनृपवासहेतवे ॥५२॥

भूम्यलभ्यसविधाभिराहता-
स्तामपारिषुरिमे तथा यथा ।
कुण्डिने त्रिदशलोकविभ्रमो
यास्यतां क्षितिभुजाम्भविष्यति ॥५३॥

उच्चलत्पृथुपताकमुक्षस-
त्तोरणावलिसुमृष्टमन्दिरम् ।
सिक्तचन्दनपथं सुमण्डित-
ञ्जनयति नाकजित्वरम् ॥५४॥

सन्निवर्त्य पुरसत्क्रियामय-
भूपती न्ववदितरां स्म शासभिः ।

१. क. मा. 'दीत' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्वां मुखेन मुखजन्मना मया
    सन्न्यमन्त्रयत मन्त्रिमध्यगम् ॥५५॥

तत्सुता त्वदभिधां यदाश्रृणो-[1]
    त्तद्दि[2]नात्प्रभृति तत्तनौ स्मरः ।
समिधेन्वसु समिद्धव वह्नि-
    र्दीप्यते प्रतिदिनङ्गतश्रमः ॥५६॥

चित्रमत्र तदभूत्क्षिति[3]म्परो
    यत्सुता त्वदभिधाय बोधयत् ।
तन्त्रये गिरिदरीषु निद्रितः
    शम्बरारिहरिराश्वजागरोत् ? ॥५७॥

निन्दन्तीह वदनाद्यचन्दनं
    मन्यते विधु[4]मयं विधूमकम् ।
वह्निमेव कमलन्न कोमलं
    वामकामशरलक्षवक्षसा ॥५८॥

तारहारघनसारशारदा-
    म्भोजभारसुनुषारशारभाः ।
शुभ्र वोऽद्य शयनं सुखायय-
    न्नैव सञ्ज्वलति कामसञ्ज्वरे ॥५९॥

एकमत्रिजमलं विगर्हते
    नार्हते प्रियजनाय चार्यकम् ।

---

१. क. मा. 'श्रा' इति पाठः ।
२. क. मा. 'हिवा' इति पाठः ।
३. क. मा. 'ती' इति पाठः ।
४. क. मा. 'मि' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मन्मनोऽपरममुञ्च गर्हते-
ऽनार्हते स्ववपुषेप्यद्याप्यर्कम् ॥६०॥

मन्यते शशिकरात्सशीकरान्
विस्रवद्विषधराञ्छरान्परान् ।
पुष्पपत्रिण इयं पतत्रिणः
स्वात्मनो विशदलैर्निबर्हणे ॥६१॥

चन्द्रचक्रमवघूष्य मन्मथः
कारुकः प्रतिनिशंसुते ? जितान् ।
वाशराञ्छलकरान्विमुञ्चते
तवर्कमित्थमनुयाति साधुना ॥६२॥

सार्जुनेन मनसार्जुनपक्षे
पूर्णभा इति सखीजनवाक्यात् ।
त्वत्सुहृत्किमिति चन्द्रमवेक्ष
प्राप्नुते नयनयोरतितापम् ॥६३॥

सा मयीव विधृताज्र्जुनपक्षे
मैत्र्यमेत्य लभते द्विजराजे ।
त्वत्कृतङ्कुरनिपीडनमाराद्
हेतुकर्तृ विहितस्तु विशेषः ॥६४॥

विद्रुताधिरधिनाऽज्र्जुनचिन्ता
कृष्णपक्षसम्मिताम्बुजपीडा ।
साधिशय्यसुखमेति न तल्पं
धर्मजाततनुरेव ततोऽसौ ॥६५॥

सा सखीमुखविनिःसृतमात्रं
प्रस्तुते तृणगणोऽर्ज्जुनताम ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मज्जते श्रुतिपुटेन निपीय
प्रेमवारिनिधितुङ्गतरङ्गे ॥६६॥

पीडिता हृदि मनोभवबाणै-
स्तद्विप्रं स्मरति नो शशिमौलिम् ।
शम्भुनेत्रशुचिभस्ममनोजं
शेखरस्थविधुरानयतीति ॥६७॥

एकोऽपि शिवलोचनानल-
ज्वालदाहतपसाप पञ्चताम् ।
त्वन्निजेषुङ्कुरुताङ्कुरेष्वपि
त्यज्यतां मयि तु नाहमस्मि ते ॥६८॥

स्वर्णदीपरिसरे शिवालिके
वह्निसङ्गतमवाप्य पञ्चताम् ।
यद्यतो भवदियं पिशाचता-
न्विप्रयुक्तवनितावधोद्भव ॥६९॥

पञ्चतामुपगते वियोगिनी-
सौख्यमत्र भजतीति नान्वगात् (?)
त्वां रतिस्तव पुनः पिशाचता
पापकर्मजनितादुदावताम् ॥७०॥

सा रतिस्तवसती कथन्तया
वार्यते न परकीयकामिनीः ।
संस्पृशन् हृदि भवानुपेक्षितः
किम्पुमत्र[१]इति साधुवृत्तया ॥७१॥

---

१. क. मा, 'त्त' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जन्महेतुरपि ते जगद्गुरु-
 र्ललनं विधिमुखैस्तवामरैः ।
सौमनस्यमपि ते सहोद्भवं
 विक्रमस्त्रिभुवनाक्रमक्षमः ।।७२।।

शम्भुनेत्रदहने हवक्रिया
 जन्मिनां हृदयमेव मन्दिरम् ।
केन नास्ति कथनीयसद्गुणो
 यद्ययुक्तबधपातकं त्यजे ।।७३।।

नेत्रवह्निपटुकीलतापितः
 शावकोऽमृतकरो न जीवयेत् ।
त्वामृतं यदि न धूलयद्धरो
 भस्मना तव ललाटमण्डलम् ।।७४।।

पीतवान्विबुधनो मुधा सुधां
 यद्गतेरधरतोऽधराम्भवान् ।
तेन सम्प्रति मृतोऽपि नामृतं
 प्राप्नुतेऽमृतविदायिनो हरात् ।।७५।।

मन्यसे मदन किम्मुनेर्वधू-
 र्मामिमहेन्द्रमलिनीकृताम्मदात् ।
मानसं मम मही महीपतिः
 शास्ति लोकहृदयानयापहः ।।७६।।

किं न वेत्ति विदुषामधीश्वरी
 सर्ववित्कनकसन्ततिः शठ ।
त्वत्कृतापनयमन्त्रनिर्भय-
 स्तत्कथं मम दुनोषि मानसम् ।।७७।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मन्मनो मम पराद्य दुर्दशा
  का भविष्यति शठेति मा वृथः ।
वायवीयमपि वारुणञ्च किं
  वेत्ति सोऽस्त्रमवनीपतिः प्रभुः ॥७८॥

किं स्मर ज्वलसि मानसे मुधा
  प्रोषणेऽस्य न तवास्ति पौरुषम् ।
यत्सु[1]धास्मितमुखः सुखस्थितः
  सर्वदिक्पतितनूरिह प्रभुः ॥७९॥

पञ्चतान्नयसि पञ्चभिश्शरै-
  श्चेदसून्मम मुधा स्वयं स्थिताम् ।
सन्ति मेऽसव इहापरे स्थिता
  यान्न संस्पृशति ते शरोत्करः ॥८०॥

एवमादि बहुशो विगर्हते
  मन्मथं तव पदाम्बुजाशया ।
साशयाशयशयालुवक्त्रका
  दीर्घमुष्णमति निःश्वसित्यपि[2] ॥८१॥

मां सखी शशिकलाकलातुला
  त्वत्कृते स्मर कृतान्दशामिमाम् ।
कुण्डिनेशदुहितुर्हितावदत्
  प्रस्थितन्नृपतिमन्त्रणाय ते ॥८२॥

तन्नरेन्द्रयुवयोस्समागमः
  कामवह्निद्रुतविद्रुतात्मनोः ।

---

१. क. मा. 'मु' इति पाठः ।

२. षोडशभिः कुलकम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वस्वरूपविभवानुरूपयोः
  स्वर्णयोरिव न यत्नमर्हति ॥८३॥

का सहस्रकरदर्शने भवेत्
  पद्मिनी न मकरन्दसङ्गिनी ।
मन्दमुच्छ्वसितचारुकोरका
  देहनालघनकण्टकावली ॥८४॥

यामि निश्चिनु निजप्रियेतिता-
  श्चन्द्रिका हि वृणुते निशाकरम् ।
मुक्तशङ्कमिति निर्विलम्बितं
  कुण्डनक्षिजगमेन मण्डप ॥८५॥

इत्थमुक्तिमुपहृत्य मञ्जुलां
  द्विजवरं समु[1]वाच भूपतिः ।
एवमस्तु भवतामनुग्रहा-
  द्यातभद्रमुभयत्र यत्त भोः ॥८६॥

सशुचिवानिति विनम्रकन्धरो
  वस्त्रवारणमहार्हभूषणैः ।
पारितोषिकतया समर्पितै-
  स्सम्प्रतोष्य मुदितो व्यसर्जयत् ॥८७॥

युग्मम्

सोऽचिरेण समुपेत्य कुण्डिनं
  भूपतिं कनकवंशमौक्तिकम् ।
वृत्तदीप्तमनुरूपरोचिषं
  तत्सुतागुणसितान्तरञ्जगौ ॥८८॥

---

१. क. मा. 'मुवाच' नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भूपतेरपि सुता सखीमुखा-
दर्जुनागमकथासुधाप्लुतिम् ।
प्राप्य मन्मथभुजङ्गदंशन-
स्वेद[1]वेगम[2]जहात्स्वमानसे ।।८९।।

अर्जुनोऽथ जयतामधीश्वर-
स्स्वप्रभावनतसीमभूभुजि ।
राज्यमाप्तसचिवान्निवेश्य स-
द्वासरे व्यधित सोत्क[3]सङ्गमम् ।।९०।।

यत्प्रमाणमुदितञ्जगत्त्रये
सा त्रयी यदुपलब्धिमीक्षते ।
स्वस्थितप्रमितिसम्प्रवृत्तये
ते द्विजातयवचस्तमूचिरे ।।९१।।

कन्यका दधिसु[4]माक्षतान्विताः
प्रस्थितस्य नृपतेः पुरोभवन् ।
वारमुख्यवनिताश्च वल्लकी-
तल्लजस्वरयुतञ्जगुः पुरः ।।९२।।

प्रस्थितस्य कलधौतकल्पितो
धौतपूर्णकलसोल्लसत्पुरः ।
दक्षिणस्य पथि दक्षिणे भव-
द्धेनुरस्य सितवर्णतर्णका ।।९३।।

---

१. क. मा 'ड' इति पाठः ।
२. क. मा. 'न' इति पाठः ।
३. क. मा. 'त्' इति पाठः ।
४. दधि–सुम–अक्षतान्विताः । 'सुम' इति पुष्पनामधेयम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उच्चचाल चलशैलविभ्रमा-
बायि मत्तवरवारणावली ।
दानवारिरुरपिच्छिलीकृत-
क्ष्मातलास्य पुरतो महीपतेः ॥९४॥

दानवारिपदमावहन्मुदा
मस्तके न मणि भाति भास्वता ।
कालनागनिकरस्ससैन्यको
देशमाप रमणन्ततः शनैः ॥९५॥

वाजिराजिखुरभिन्नमेदिनी
प्रोद्गतप्रचुरधूलिभिर्हि वः ।
तद्गतावपि हिते तले दिवा
चक्रवाकदयिताशुचङ्गता ॥९६॥

एवहप मे तदवनीतलङ्गतौ
किं विहाय सकलं विहायसम् ।
याम इत्थमनुयोक्तुमेव कि-
न्दध्रिरे वचनचापलं ह्रिया ॥९७॥

भूपतेरुपयमार्थके गमे[1]
सङ्कटे गजघटाभिरध्वनि ।
स्यात्कथं प्रसरणञ्च वाजिनां
वाजिता यदि पराङ्गनो भवेत् ॥९८॥

प्रावृषेण्यघनधीरनादिभिः
फलिपतैर्विगतभीतिवीतिभीः ।

---

१. गम् धातोः पचाद्यचि गमे- यात्रायामित्यर्थः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सारथिग्रथितरश्मिभिस्तत-
स्तत्वरे[1] धृतमहारथै रथैः ॥९९॥

चक्रवानथ रथोऽर्ज्जुनयुक्तः
सिन्धुजातनिनदेन परेण ।
धार्त्तराष्ट्रकुलमुद्धतकर्ण-
न्द्रावयन्पथि जगाम रयेण ॥१००॥

नात्र चित्रमभिमन्युमहन्य-
स्सोऽर्जुनं प्रवहति स्म मुन्दव (?)
सैन्धवः पशुरसावतिविद्वा-
नर्ज्जुनस्तुतमधः कुरुते स्म ॥१०१॥

पश्चात्पुरस्तस्य पदातिसङ्घा-
स्संख्यावतो जग्मुरहीनसंख्याः ।
संख्याविहीना अपि केचनै[2]व-
मुद्‌गूर्णखण्डा निकटेऽस्य तस्थुः ॥१०२॥

प्रेङ्खोलिताजर्ज्जरवद्धु[3]राणां-
वितर्ज्जयद्भिस्त्वथ गर्जितानि ।
भयावहैर्भीरुभरस्य भूयो
भेरीरवैर्भूरिभिरुज्जजृम्भे ॥१०३॥

प्रयाणदूरत्यजताध्वमध्यं
पिधत्त तैलादिशुभं विधत्त ।
इति ब्रुवन्तः पुरतोऽस्य जग्मुः
परः शता वेत्रकराः प्रवीराः ॥१०४॥

---

१. त्वरधातोः लिटि 'तत्वरे' शीघ्रताञ्चक्र इत्यर्थः ।

२. क. मा. 'वा' इति पाठः ।

३. क. मा. 'रुरु' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विलोकयन्तीभिरमुं प्रयान्तं
गवाक्षमार्गैः पुरसुन्दरीभिः ।
सम्प्रेषितालोचनपङ्क्तिरासीन्
नीलोत्पलस्रक् शकुनाय तस्य ॥१०५॥

रक्तेन नीलेन सितेन पाण्यो-
र्दृशोर्मुखेनामरसेन सृष्टाः ।
अनङ्गपूजाकुसुमस्र[1]जस्तं
लतावतान्वीयुरभीष्टरूपाः ॥१०६॥

स्मेरैर्मुखाब्जैस्स कटाक्षपातै-
र्विलोचनैर्हारिपयोधरैश्च ।
पदे पदे सैनिकचित्तहारी
वाराङ्गनानान्निकरोऽन्वगात्तम् ॥१०७॥

विशालरथ्यापि पुरी तदानीं
संबाधमार्गेव तथा बभूव ।
यथा पदव्यापृतिमन्तरैव
चचाल सेना मृदितैः शरीरैः ॥१०८॥

ततः क्षणेन क्षणदेशवंश्ये
विलङ्घ्य रेवां परतारवृत्तिम् ।
अध्यास्त तां ग्रामटिकान्तमिस्रां
सम्पन्नभोगाम्पुरसंविधाभिः ॥१०९॥

अग्रे चचाल क्षितिपालसैन्यं
विजन्यवार्त्तञ्च सजन्यवार्त्तम् ।

---

1. क. मा 'स' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चतुर्विधं वासववासकाष्ठां
मनोऽनुकूलैर्विषयैर्विजुष्टाम् ॥११०॥

सा धुर्य्यवामीकरभोरुभार-
प्रणीतसर्वाथ परम्पराभिः ।
नवोपकार्य्या क्षपितत्रियामा
मार्गेऽपि नाखिद्यत राजसेना ॥१११॥

सा स्थूललक्ष्यस्य नरेश्वरस्य
प्रीतिप्रदायैः परितोष्यमाणा ।
अनीकिनीशैलसरित्पुराणि
प्राज्यानि राज्यानि विलङ्घयते स्म ॥११२॥

एवं कियद्भिर्दिवसैर्व्यतीत्य
क्रमेण मार्गापतितान्सदेशान् ।
सौराज्यसम्पन्नसमस्तलोकं
विदर्भभूमिनिकटम्प्रपेदे ॥११३॥

श्रुत्वा समागतममुन्निजदेशसीमां
सामात्यबान्धवजनस्सपुरोहितश्च ।
प्रत्युज्जगाम सविदर्भमहीमहेन्द्रो
दित्सुस्स्वयंवरमहेन पराम्महेलाम् ॥११४॥

सङ्गत्य तेन विनयेन सुकुण्डिनेश-
सौन्दर्य्यवर्य्यजितदस्रसहस्रभासा ।
प्रष्टीभवन्भवसुतेन समं समन्ता-
दादाय तन्निजपरं विशदं विवेश ॥११५॥

नानादिगन्तरसमागतभूपतीना-
ञ्छत्रैर्मरालधवलैः पिहितार्कताप्याम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पश्यन्प्रफुल्लनलिनाभमुखः पुरीन् ताम्
प्रासादमुन्नतमभीष्टमथाससाद ॥११६॥

तं सन्निवेश्य सविदर्भपतिः प्रणम्र-
स्तत्रोपचारनिचयेन तथा सिषेवे ।
सङ्कल्पमात्रसुलभार्थपरम्परोऽपि
व्यस्मेष्ट यं समवलोक्य यथार्ज्जुनोऽसौ ॥११७॥

अथ विधिमवसाय श्रौतमग्र्यं स सायं
विहितहितसुभक्षः संविवेशात्तमिन्नः ।
मनसि विविधतर्कान्न्यस्यतोस्यास्यतोसौ
रजनिरजनि निद्राक्षेमदात्री चिरेण ॥११८॥

श्रीमत्कूर्मधराधरेन्द्रवसति प्रख्यातपन्तान्वये
जातः श्रीभवदत्तपण्डितवरः श्रीभार्गवी तत्प्रिया ।
तत्सूनोः सुकृतेः कृतौ कृतिमते सत्स्फोटवादानुजे
काव्ये श्रीकृतवीर्यसूनुचरिते सर्गो दिशासंख्यकः ॥११९॥

इति श्रीसुकृतिदत्तविरचिते कार्तवीर्योदयमहाकाव्ये
स्वयंवरोपक्रमे विदर्भनगरगमनन्नाम दशमः सर्गः[1] ॥

१. इति श्रीकिरातक्षत्रियकुलोत्पन्नस्य मेच्यञ्चलपाँचथरलालीखर्क-वरडाडाग्रामवास्तव्यदोवालीछ्याचामलिङराईकुलोदभतस्य डा. स्वामिप्रपन्नाचार्यस्य कार्तवीर्योदयसम्पादने दशमसर्गस्य टिप्पणीपाठभेदादिकं समाप्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कार्तवीर्योदयमहाकाव्ये

एकादशः सर्गः

जाटाटीरजटाजूटरिङ्गद्गङ्गातरङ्गतः ।
निर्णिक्तञ्चरणद्वन्द्वमुमायाः पातु मामलम् ॥१॥

रजनिचरमयामे मन्दधामातिवाते
सुखशयनमवाप्तं स्वप्नदृष्टप्रियायाः ।
मधुरतरविहारै राजसिंहं विनिद्रं
रचयितुमिति धीरन्निर्जगुर्वन्दिपुत्राः ॥२॥

अयमुदयति यस्याग्रे सरोऽनूरुरुच्चै-
स्तिमिरपटलभेदी कर्मसाक्षी स देवः ।
दुरितदलनदक्षैर्नैकसंख्यैꣳकरैस्ते
प्रकृतरुचिरकार्य्यें मित्रतां संबिभर्तुः ॥३॥

विरमति रजनीयन्नैव युक्तात्र निद्रा
त्यज शयनमुदग्रं प्रेमदृश्यानुयातृन् ।
सुखयति हितवेशो याहि वैदर्भकन्या-
वरणनिलयमत्राभीप्सितं प्राप्नुहि द्राक् ॥४॥

रजनि रजनिपूर्वं मानिनी शीतभानौ
निकटमुपगतेऽस्मिन्नम्बरान्तङ्कराद्यैः ।
स्पृशति गलदमन्दानन्दने चाम्बुबिन्दुः
क्षणम[illegible]करेणा[illegible] याति [illegible] ॥५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

घनतिमिरपटेनाच्छादितास्यां त्रियामां
स्फुरितसरलतारा नाग्रहो दीप्तदेहाम् ।
विधुरमृतकराग्रैस्संस्पृशन्संविधाय
क्षरदनघुजलौघां याति खिन्नः प्रभाते ॥६॥

सुरपतिसदनं सं लङ्घ्य[1] दोषाकरोऽसौ
विततकरसहस्रो विद्रुतो देवताभिः ।
द्रुततरमुपयास्यन्कीर्णतारातिभार-
श्चरमगिरिवनान्तस्सम्प्रवेशङ्करोति ॥७॥

पतयति दिननाथे पद्मिनीं दैवयोगा-
दुपपतिरिव चन्द्रच्छायया पादपाती ।
मधुरतरकराग्रैस्संस्पृशन्मुद्रितास्या-
मनभिमतनिजार्थाविश्यभीतोपयाति ॥८॥

गतवति निजनाथे पद्मिनीं सद्मनि स्वे
घटितदलकपाटं सौख्यसुप्तां सुधांशुः ।
रिरमयिषुरिवायं संस्पृशन्स्वैः कराद्यैः
पतिरखमरुणाख्यं विश्यभीतोपयाति ॥९॥

कति कति न पुरन्ध्र्यः सन्ति लोके तथापि
प्रथितगुणगणो[2]ऽद्यः पद्मिनी सद्मनि स्वे ।
गतवति निजनाथे मौनमाधाय शेते
विकशति पतिहूतं सानुरागं समीक्ष्य ॥१०॥

गगनतलसुतल्पे रात्रिचन्द्रौ यथेच्छ-
ङ्गलदुडुसुममालञ्जातसर्वाङ्गसङ्गम् ।

---

१. क. मा. 'लंघ' इति पाठः ।
CC-0. Nepal Sanskrit Academy, Kathmandu Collection
२. क. मा. 'ष' इति पाठः ।

रतिसुखमनुभूय क्षीणशुक्रेऽद्य[1] काले
  द्रुतमुदसितहस्ते निष्प्रभौ सम्प्रयातः ॥११॥
उदयगिरिदरीतो निस्सरन्भानुसिंह-
  स्तिमिरकरिसमूहहृदयं सम्पिपेष ।
तदनुगलदसृग्भी रज्यते पूर्वकाष्ठा
  न तु चरणविहीनस्यारुणस्योदयेन ॥१२॥
खरकरपरिवारो दैवयोगादनूरु-
  स्सुरपतिललनाया रक्ततां स्वीयकान्त्या ।
नियमिततिमिराली कैश्यमास्यं व्रजन्त्या
  हरिहरिहरितोऽयं चुम्बति प्रातरेत्य ॥१३॥
भवतु वृषवधूटीशूरपादानुरक्ता
  दिगमृतकरसङ्गोल्लासितास्यापि तावत् ।
विचरणमरुणाख्यं पक्षिणं तिग्मतुण्डं
  बत बत कथमेषा रज्यते प्राप्य राजन् ॥१४॥
क्वणति मधुररावा वल्लकी वैणिकानां
  ध्वनति कुशलमर्त्योत्सङ्गसङ्गो मृदङ्गः ।
शिविरसमजिरेऽस्मिन् हासिका हासिकास्ता
  हुतपरिगतभृत्या नृत्यमायाति कर्तुम् ॥१५॥
विविधसुरतबन्धातीतभूपस्त्रियामा
  गलमिलि[2]तवधूटीबाहुवल्लीविबद्धाः ।
क्षणमधिगतनिद्राः कामिनः शम्बशब्दं
  रजनिविरतितूर्यध्वानमाकलयन्ति ॥१६॥

---

१. क. मा. 'घ' इति पाठः ।
२. क. मा. 'वित' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विपुलकुचभरेणाक्रान्तवक्षस्तटानां
मृदुलभुजलताभिः कामिनीभिः सितानाम् ।
पृथुलजघनभारोन्मर्दितानाम्प्रभातः
बहुलमभिकन्ूणान्मोचनान्मैत्र्यमेति ॥१७॥

अलघुजघनभागाद्दूरमुक्तं वधूटी
रतिरभवशेन क्षौमवस्त्रं प्रभाते ।
कथमपि शयनीयादुत्थिते प्राणनाथे
चकितहरिणचक्षुः शीघ्रमन्विष्यतीह ॥१८॥

बहुतर (तम) खेदोद्भेदसम्प्राप्तनिद्रा
वपघनघनयोगादेकतां प्राप्नुवन्तौ ।
मुखचलदनिलेनान्योन्य शैज्य वहन्तौ
कथमपि शयनीयम्मुञ्चतोऽस्मिन्युवानौ ॥१९॥

अपि नरपतिसेनासन्निवेशोद्गतेन
प्रचुरमुरजभेरीझर्झराणां रवेण ।
विनिहतसुखनिद्रौ कामिनौ केलिलोलौ
मुकुलितनयनाब्जं श्लिष्यतो गाढमद्य ॥२०॥

कृतपटुचटुवाक्ये या प्रगे मानयुक्ता
विफलितशपथाद्व्याजसुप्ता परा च ।
ध्वनति कलमृदङ्गे प्रोत्थिते प्राणनाथे
गलदविरलबाष्पा सानुशेते मृगाक्षी ॥२१॥

किमपि किमपि मन्दम्मन्दमाभाषमाणं
रतिविरतिवितान्तश्रान्तगात्रं प्रभातः ।
मिथुनमुदितमोदम्भेदयन्नैद्रतन्द्राम्
अनुभवदुपयाति द्वेष्टृतां हेतुहीनाम् ॥२२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बहुतिथतिथिपान्तस्सैन्यवर्गो नृपाणाम्
उदितमधुरनिद्रो बोध्यमानः प्रभाते ।
नगरकलकलेन प्रोन्मृजन्नेत्रयुग्मं
व्यतिपरिहितवस्त्रन्नेक्षते प्रेक्षमाणः ।।२३।।

चमरगिरिझरीणां फेनपिण्डोपमे ये
शिशिरमहसि जाते कापि मुग्धा कथञ्चित् ।
शयनमिलितकुड्या लम्बनातीतरात्रिः
प्रणमति बहुमानादस्ततां यान्तमेनम् ।।२४।।

विपुलतलनितम्बाक्रान्तपौरस्त्यभागं
रतिविरमणकाले सोपसंस्त्रानवस्त्रम् ।
उषसि कमनमर्त्यः शक्नुते नानुकर्षं
घनजघनतटान्तस्पर्शजाड्येन दोल्ला ।।२५।।

लुलितललिततारा: पृष्ठभागे वहन्त्यः
विसृमरतिभिरालीवेणिमुन्मुक्तबन्धाम् ।
बहुतरपरिपीतम्लानवक्त्रेन्दुबिम्बा
रजनयश्च वराजन्प्रस्थिता वारमुख्याः ।।२६।।

रतिरभसवशेन प्रेयसाच्छिन्ननीव्याऽ-
नियमितपरिधानं संविशन्त्या कयाचित् ।
उषसि शयनदेशादुद्धजन्त्या कथञ्चित्
मुखरसनयैव वध्यते चान्तरीयम् ।।२७।।

क्वणितदशनवासा मन्दहासाप्रकाशः
स्तिमितनखपदालीजृम्भणो जृम्भिता व्वा ।
अलसविलसदङ्गैः स्थितानल्पतल्पात्
पुनरपि परिणेतुस्सम्बुभुक्षाङ्करोति ।।२८।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दयितहृदयदेशे सौख्यसुप्तो मृगाक्षी
रसतिरसविभेदे ताम्रचूडेति तारम् ।
उपहृतभुजवल्ल्या श्लेषमामीलिताक्षं
प्रियतमवदनाब्जं चुम्बति त्यक्तुकामा ॥२९॥

घनतरमुपगुह्याचुम्ब्य पादौ प्रणम्य
प्रियतमविनियोगाद् गेहकार्य्यार्थमार्य्याः ।
कति कति नहि साध्याः पश्च[1]पूजाविधानं
विदधति करपद्मैर्दीप्तदीपैः प्रभाते ॥३०॥

मृदितसुरभिमाल्यं कीर्णमुक्ताकलापं
विलुलितवसनान्तङ्गन्धतैलावसिक्तम् ।
चिरतर[2]तिखिन्नं कामिनीपाणिपद्मैः
कमल[3]कुलमिवाग्रं तल्पमुत्थाप्यतेऽद्य ॥३१॥

प्रथमतिशयशीतो दाक्षिणात्यो नभस्वान्
दरदलदरविन्दामोदसौगन्धबन्धुः ।
मृगमदबहुपङ्कस्त्रीस्तनाभ्यङ्गखञ्जः
वहति सुरतखेदं खेदभेदापदक्षः ॥३२॥

उदितवति पुरस्ताच्छूरसूते हिमांशुः
व्रजति च तदशान्तां त्रस्तसर्वांशुकोऽसौ ।
यदनुसृतममुं द्राग्मन्यते जीवलोको-
ऽपरगिरि शिखरस्थग्रासमात्रेण चन्द्रम् ॥३३॥

---

१. क. मा. 'पस्त्य' इति पाठः ।
२. क. मा. 'रत' इति पाठः ।
३. क. मा. 'न' इत्यधिकः पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विशदितभुवनान्ता चन्द्रिकानन्यकान्ता-
ऽनुसरति निजनाथं प्रस्थितञ्चान्यलोकम् ।
अहह कुमुदिनीयं मुन्द्रितास्या तु नास्ते ?
प्रथममिलितभृङ्गैरन्तरा वार्य्यमाणा ॥३४॥

अमृतमपि सुलेभे यत्सकाशाद्बुधौघः
कुमुदवनमतीव श्रीमदासीद्यतश्च ।
द्विजपतिममुमद्यास्तं प्रयान्तं न कश्चित्
वसुगणपरिहीनं प्रेक्षते सिद्धकामः ॥३५॥

बुधगुरुपदमाप्तुं यद्गुरोर्वामनेत्रा-
महरतरतलुब्धश्चन्द्रमास्तत्फलं किम् ।
मृगपदकृतचिह्नं पूर्वदेशान्निरासं
वसुगणपरिहारञ्चान्वहं भूप युङ्क्ते ॥३६॥

गगनसलिलराशेः पश्चिमाशातटान्ते
विततपवनजालः कल्पसांयात्रिकोऽसौ ।
स्फुटिततरलताराहारमायुक्तचन्द्रा-
भिधवरमणिमेनं प्रोद्दिधीर्षुस्समीतः ॥३७॥

गगनशयनमध्ये चन्द्ररात्र्योर्विहारे
त्रुटितरुचिरहारभ्रष्टतारा हि ताराः ।
सपदि तदुभयेन त्यक्ततल्पप्रदेशात्
पवनगतिविलोलञ्छोधनीभिस्समन्तात् ॥३८॥

रविसमुदयवेला चेटिका मार्जयित्वा
तिमिरवकरसङ्घाद्भिन्नरूपा विधाय ।
सुरगिरिपरपार्श्वे हाटकीये करण्डे
नृपतिमुकुटरत्नं न्यस्यते नूनमेताः ॥३९॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परिमलिनितमध्याः स्नेहलेशेन हीना
वसुगणमपिधायातर्ज्जयन्त्यो न भद्रैः ।
पटुषतरनिनादैस्साय्र्यमाणाः कराग्रै-
र्विदधति गममेता दीपिका वारबध्वः ॥४०॥

अथमुदयगिरीन्द्रालोहितोष्णीषकल्पः
भ्रमुदयितविद्रुवोत्तंससिन्दूरपूरः ।
सुरपतिललनाशापाटलो भ्रंसगुच्छः
जगदघमभिहर्तुं प्रोज्जिहीते विवस्वान् ॥४१॥

रविनिगलननिस्सन्देहमन्देहदेहा-
चलभिदुरसदृक्षां तोयपूर्णाञ्जलींस्त्रीन् ।
प्रभिषवमिति ताङ्गाः सान्ध्यकर्मप्रवृत्ता
इह विदधति विप्रा वेदमात्रापवित्रान् ॥४२॥

नियमितकरणैषा धौतकौशेयवासा-
दरचलरदवस्त्रा कौशवृष्यान्निषण्णः ।
हृदि धृतविधिशवितस्सङ्गृहीताक्षमाला
जपति किमपि गुह्यं संसदग्र्य द्विजानाम् ॥४३॥

अधिरजनिवियोगव्याकुलात्मा स यावत्
रथचरणसनामान्विष्यति प्रेयसीं स्वाम् ।
रविसमुदयनुन्ना तावदेवाशु कोकी,
मधुरतरविरावा पार्श्वमस्य प्रयाति ॥४४॥

प्रतिपटुवटुभिस्सञ्चोदिताः काचिदर्थं
द्रुतमतिपरिहारान्नोत्तरं दातुमीशाः ।
रजनि विरति चित्तस्थैर्यसञ्जातबोधा
दधति मुदमिदानीं धीवरोनीकधीराः ॥४५॥

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

गतमपि बहुदूरान्नेदयन्त्यर्थजातं
स्थितमपि बहुपश्चादानयन्त्येव बुद्ध्या: ।
गहनमपि सुबोधं कुर्वते युक्तिसङ्घै-
रुषसि धरणिपाला: पण्डिताश्च प्रवीणा: ॥४६॥

क्षितिपमृदुपदानि प्रेक्षतेऽन्यभावं
वितरति ससुवर्णां भूरिशो गामिदानीम् ।
विरचयति कलापं मुक्तकञ्चातिशिल्पान्
नरपति निकुरम्बं काव्यकर्ता च धीर: ॥४७॥

उषसि विगतनिद्रैस्सैन्धवक्षोदलेहैः
खरतरखुरघातैर्मन्दुरां क्षोभयद्भि: ।
कृतमलिनशरीरै: केशरं धूनयद्भि:
कटकनिकटभूमिर्भूष्यते वाजिवर्य्यैः ॥४८॥

प्रथमतितरतुङ्गो मन्दुरारङ्गनृत्यन्
कलितललितरश्मि: प्रोक्षिपन्नग्नपादम् ।
अमृतकरणगोत्र: सिन्धुजो वाजिराजो-
ऽभिलषति तव यात्रां वैरिगोत्रौघभेत्तु: ॥४९॥

सरलकरविसारो भद्रवंशात्तजन्मा
वनविहरणशील: स्तम्भभङ्गप्रवृत्त: ।
विधुतशयनदेशस्ते सदृक्षो गजोऽयं
तव विनयपर: किं मुञ्चते दानवारि: ॥५०॥

पृथुतरकरनिर्यत्प्राणसम्मृष्टभूमौ
शयनसुखमपास्य प्रोत्थिता हस्तिराजि: ।
कवलयति रसालान्सालसाक्षं कराग्रैः
मृदुचलितकपोलं प्रोच्चलत्कर्णतालम् ॥५१॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रतिदिशमभिसर्पत्सौरभोद्दामभार-
  प्रसभहृतमनोऽलिध्वानसञ्छादिताशः ।
विदलितदलनिर्यन्मौक्तिकाभाम्बुबिन्दुः
  विशति यजनगेहश्चारुपुष्पोपहारः ॥५२॥

धृतदधिघृतदूर्वाः पुष्पमुक्ताः प्रबालाः
  करकिसलययुग्मैः कन्यकाश्चारुवेषाः ।
विकसितशतपत्रश्रीमदास्यं त्वदीयं
  दधति परमवाञ्छान्द्रष्टुमेता द्विजानाम् ॥५३॥

श्रुतिशिरसि निरूढं मङ्गलं सङ्गृहणान्तः
  परिहितसितवस्त्राश्चित्रकोद्भासिमस्ताः ।
मृजितदशनरोचिर्धारया क्षालयन्तो
  रदनदशनमेते द्वारि तिष्ठन्ति विप्राः ॥५४॥

त्वरयति च विदर्भक्षोणिसङ्क्रन्दनस्य
  प्रथितगुणगरिम्णो मौलकान्तान्तिकोऽसौ ।
रचितरुचिरभावाश्चर्यमङ्गल्यशाला
  समितसकलभूपोत्तंसनाथं भवन्तम् ॥५५॥

उपयमविधियोग्या कल्पसङ्कल्पनेन
  क्षपितरजनियामा यामताः कल्पयामाम् ।
सपदि समवसाय क्षोणिपालास्त्वदन्ये
  परिदधति यथेच्छं स्रग्विभूषाम्बराणि ॥५६॥

कति नरपतिपुत्रा भूषयन्तेऽद्य भूमिं
  कति वरणधरित्रीं प्राप्नुवन्ति प्रमोदात् ।
कति गतिमतियुक्ता निस्सरन्ति स्ववासात्
  कति सु[illegible] यातुमिच्छन्ति शीघ्रम् ॥५७॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गतिरभसवशेन प्रातिकूल्येन वेशं
परिदधनमुदग्रं पार्श्वमौलिं समृद्धया ।
अपि धनपतिमित्रं काचिदद्यावनीशं
परिहसति गवाक्षात्प्रेक्ष्य गाढं मृगाक्षी: ॥५८॥

वदरफलविशालैर्मौक्तिकैस्साधु दृष्टं
गतिरभसविहस्तो मौलिकोटौ विलग्नम् ।
सपदि भुजयुगेनाच्छिद्य हारं विधत्ते
गमनसमययोग्यां लाजवृष्टिं नृपोऽन्य: ॥५९॥

व्रजसि किल वरीतुं या ...मार्ज्जनेन
त्वयि वहति सुभावं चेतसा निर्गमो मा ।
न भवतु तव लज्जा त्वन्यथा स्याद्विदग्धा
वचनमिदमबुद्धा कोऽपि राजाद्य याति ॥६०॥

अविरलमदधाराक्षालितक्ष्मेभराजो-
ऽपरिगतमनुयान्तं देश्यभूपं विलोक्य ।
वदति पुरपुरन्ध्री प्राप्स्यसेऽनङ्गभावं
समितिसमुपयातो भोजकन्याकृते त्वम् ॥६१॥

तदपरमवनीशं कापि वक्तयद्य[1] यां तं
कनककुलविभाता राजपुत्री भवित्री ।
तव किमपरमास्यं शोभते साधुवृत्तं
तव गमनमलं तेऽरिष्टतायै नरेन्द्र: ॥६२॥

पथि नरपतिमन्यं प्रेक्ष यान्तं त्वरातो
हसति नगरनारीश्लिष्टचातुर्यधुर्य: ।

---

१. क. मा. 'क्त्प्रा' इति पाठ: ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रकृतिसुभगमास्यं वीक्ष्य कस्याननार्य-
स्तव भवति रिरंसा साधनाक्तौ च बाहू ॥६३॥
मदवनकृतहासा विप्रभावा नरेशाः
बहव इह समेतास्तेषु ऋक्षेशकान्तिः ।
नखरविसृततेजास्त्वञ्जनाभः प्रभासी-
ति विहसति पराचीभूय भूपं परान्यम् ॥६४॥
अपि वसनविभूषा भूषिता भोजकन्या
करकिसलयपीडा कामनातन्तुनद्धा ।
परिषदि नृपमाला नैव शोभां प्रयाति
नृपतिमुकुटरत्नं त्वां विना नायकञ्च ॥६५॥
इति विलसितनानाश्लेषहृद्यैर्विचित्रैः
मधुरपदविलासैर्वन्दिनां वाक्यजातैः ।
शयनसमुपनीतस्स्वप्रियाकेलिकल्पैः
परिहृतशयनीयो यादवः प्रोदतिष्ठत् ॥६६॥
अथ दिनमुखकृत्यं संविधायाविलम्बात्
रचितरुचिरवेषः शिल्पिभिर्धीरचेताः ।
कतिपयहितसैन्यैरन्विता भोजकन्या
वरणनिलयशालाद्वारभूमिं प्रपेदे[1] ॥६७॥
अथ विदर्भनरेन्द्रपुरोधसा
सविनयं परिदर्शितमग्रतः[2] ।
नृपतिमण्डलमण्डितमुन्नतं
स विविशे वरणालयमण्डपम् ॥६८॥

---

१. 'ननमयययुतेयं मालिनी भोगिलोकैः' इति लक्षणान्मालिनीवृत्तम् ।
२. 'द्रुतविलम्बितमाह नभौ भरौ' इति लक्षणाद् द्रुतविलम्बितवृत्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्यजनचालननिर्गतमारुत
प्रसृमरानलधूपसुवासितम् ।
अतिसितातपवारणमालया
कुमुदराजीविराजिसरामितम् ॥६९॥

घनघनाघनघोरतरध्वन[1]-
घनमृदङ्गरवैः प्रविलम्बितम् ।
द्रुतमिहैहि विभूषय मामिति
प्रणिगदन्तमिव स्वमति स्फुटम् ॥७०॥

निपुणवैणिकवादितवल्लकी-
कलरवैः कनकप्रभयोदितम् ।
शयनदूत निवेदितया मनाग
नुवदन्तमिवास्फुटमन्मदम् ॥७१॥

मदनकेलिकलाकुलकामिनी-
कुचरुचिस्मृतिकारिभिरुन्नतैः ।
प्रतिदिशञ्जलसम्भृतपल्लवो
लसितहाटकसत्कलशैः श्रितम् ॥७२॥

विविधवारवधूवदनोद्गतो-
द्धतनिरन्तरगीतिमनोरमम् ।
पवनकम्पनचारुपताकया
प्रणिदिशन्तमिवागमनायनम् ॥७३॥

अभिनवस्तवसंस्तव नन्दितां
रुचिरवाग्रचनापदवन्दिनाम् ।

---

1. क. मा. 'व' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निजनिजक्षितिपालगुणोक्तिभि-
र्विरसिताभिरलं मुखरीकृतम् ॥७४॥
अमरलोकनिरन्तरनिष्पत-
त्कुसुमसौरभलोभवशान्मुहुः ।
भ्रमदभ्रमदभ्रमरावली-
कलगिरा कृतसामगिरं यथा ॥७५॥
बहलकार्यवशात्सहसा विश-
न्निरयद्वत्सुकदेश्यजनव्रजे ।
कुपितवेत्रकरप्रतिहारभू-
कलकलाकलपौरकुलाकुलम् ॥७६॥
विविधदेशविदर्भमहीभुजा-
मनुमुहूर्तमुपात्तनिदेशनैः ।
निजनिजेश्वरभावुकभावुकै-
रनुचरैस्सचरैर्बहिराश्रितम् ॥७७॥
दशभिरादिक्रियाकुलकम् ।
अथ रत्नविचित्रभङ्गिभिः
खचितं हाटकपीठमुन्नतम् ।
सविदर्भपुरंदरादरा-
र्पितमारात्समशोभयन्मुदा ॥७८॥
रुचमाप तदा तदासनं
कृतवीर्यात्मजसाध्वधिष्ठितम् ।
उदयन्मिहिरप्रभाध्वरा-
मरभूमीधरशृङ्गसङ्गिनाम् ॥७९॥
समलङ्कुरुते स्म केवलं
सनभद्रासनमेव भूपतिः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निखिलक्षितिपालमण्डितां
    समितिं नामपि रोचिषांभरैः ॥८०॥

भविदस्रसहस्ररोचिषं
    कृतवीर्य्यस्य सुतं विलोक्य[1]ते ।
विजहुः कनकप्रभाश्रितां
    मनसाशामखिलक्ष्माभुजः ॥८१॥

प्रथमं स्तिमितादद्भुतोदया-
    दृगपस्तद्धरणीभुजामिहा ।
तदनुप्रकृतैककार्य्यता
    स्मरणात्कोपकषायितामुहुः ॥८२॥

रुरुचेतमनोरमापि सा-
    र्जुनकान्तिर्गुणदोषदर्शिनः ।
क्षितिपालकुलापकौशिक-
    द्विजसङ्घाय पतङ्गभा इव ॥८३॥

मनसा कुटिलेन केवलं
    वचसा प्रेमनिदर्शनो रताः ।
तल्लीनमहाहिना ह्रदाः
    शरदच्छा इव निर्वभुर्नृपाः ॥८४॥

अविदुर्ननते गुणोत्कर-
    मनु[2]युक्तोऽपि गुणैस्स यादवः ।
अपि धातुमलं परं गुणा-
    ननवद्यानपि मत्सरो नृणाम् ॥८५॥

---

१. क. मा. 'व्य' इति पाठः ।

२. क. म. 'ननपु' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वनसार्जुनमेव मेनिरे
  भयतोऽपार्थमिमे नराधिपाः ।
युधि भीममहो सदागतिं
  ननु नासत्यभवं मनोरमम् ॥८६॥

कुलशीलवपुर्वयोगुणै-
  रनवद्यैः कनकप्रभोचितम् ।
प्रविलोक्य जहुस्स्वयंवर-
  स्तमाशालतिकान्विता नृपाः ॥८७॥

अथ सर्वनराधिपावली
  सहसा कर्षणशक्तिरुत्तमा ।
सुमचापभृतो जगत्त्रयी-
  जनमोहैकमहौषधीविधेः ॥८८॥

वसुगर्भविदर्भपत्तना-
  करमध्योदितरत्नमुत्तमम् ।
सदनं गुणरूपसम्पदा-
  मनवाद्यांवरवर्णिनीभुवाम् ॥८९॥

युवचित्तवशाग्रकार्मणं
  रमणीसंहतिमौलिभूषणम् ।
नयनोत्सवधोरणीनृणां
  भुवि भृङ्गारजनीखनीध[1]रा ॥९०॥

ऋथकैथिकवंशवारिधे-
  रुदिता पद्मकरापि देवता ।

१. क. ख. 'यमन' इति पाठः।
CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अकलङ्कितसोदरा स्थिर-
प्रकृतिश्चार्जुननाम धारिणी ॥९१॥
शिविकासनमाश्रिता सखी
परिहासोक्तिसमुल्लसत्स्मिता ।
प्रतिचञ्चललोचनाञ्चलै-
र्लसदिन्दीवरदामचारुताम् ॥९२॥
अभितो वरणस्थलाङ्गणं
विदधाना प्रतिकर्मकर्मणा ।
पुनरुक्तककामनीयका-
सनवातायनवर्त्मना नृपान् ॥९३॥

सप्तभिरन्त्यक्रियाकुलकम्

प्रविलोक्य कृतार्थयन्त्यसौ
बहुवित्सौविदवृन्दरक्षिता ।
जनलोचनपेयतामगान्
नृपकन्न्या सहसा पतिंवरा ॥९४॥
दिवि भूमितलेऽपि निर्ज्जरां
परिषन्मध्यगतां नृपात्मनाम् ।
नयनैः कृतशास्त्रपारिणः
ययुरभ्यस्तनिमेषबन्धनैः ॥९५॥
असदीयवपुर्विलोकने
सुरराजस्स्वदृशां सहस्रकम् ।
मुनिदारविहारसम्भवं
बहु मेने पुरतो विगर्हयन् ॥९६॥
घनपीनशचीकुचद्वया-
क्रमणे प्रक्रमसात्रमाप यः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुलकं तमुदारमारस-
प्रतिपश्यन्कनकप्रभावपुः ॥९७॥

विधिना कृतवीर्यसूनवे
विहितेति श्रुतवान्स नारदात् ।
शतकोटिधरोऽपि निःश्वस-
न्तति दीनस्य दशामगान्मुहुः ॥९८॥

ज्वलनोऽस्य समीपदिक्स्थितः
प्रविलोक्य प्रवणत्वमस्य तत् ।
हृदि चिन्तितकूटसाक्षिता-
मुपयामे विजहौ विशंकितः ॥९९॥

शमनोऽधिकृतो वृषायने
प्रविदन्भोजसुतान्तराशयम् ।
अधिताधिमधीतवान्विधे-
र्नहि कार्यस्य गुणो नियन्त्रितः ॥१००॥

निकषात्मजमानसं मुहुः
प्रचलन्ताग्निकषापरावृतत् ।
निकषस्य समस्तवैरिणां
कनकापत्यवरस्य साध्वसात् ॥१०१॥

वरुणोऽतरुणो न दारुणः
करुणश्चारुणसारथिप्रभे ।
कृतवीर्यसुते विषोढवा-
न्नृपकन्यामनुरक्तचेतसम् ॥१०२॥

वहमानमुवाह संस्पृशन्
पवमानः कनकप्रभावपुः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नरभावविदर्जुनोद्भवा-
ङ्भुयतस्साधु धिया स्वयंवरे ॥१०३॥
धनदोघनदोषगात्रको
रुचिराङ्गीकृपणश्च याचताम् ।
भुवि कल्पलतां विदर्भजां
प्रविलोक्यालजतैस्म चेतसि ॥१०४॥
विदिगी[1]शेश्वर ईश्वरः शिवा
शशिलेखामरवा[2]हिनीप्रियः ।
नववाञ्छविभूतिविभूषणो
भुवि धन्या नृपकन्यकामिमाम् ॥१०५॥
गुणगौरवगुम्फितं वपु-
र्विधिरम्याः प्रविलोकयन् शनैः ।
निजपाणिसरोरुहं मुहुः
प्रशशंसाद्भुतशिल्पकोविदम् ॥१०६॥
धरणीधरणे परात्तनुं
विनियोज्याहिपतिस्समागतः ।
प्रशशंस विलोक्य कन्यका-
न्निजरूपान्तरदत्तचेतसम् ॥१०७॥
कमलन्निजवक्षसि श्रितां
वरणस्थानगताञ्च तां हरिः ।
अनिमेषतया विलोकय-
न्विविदे नान्तरमण्वपि स्फुटम् ॥१०८॥

---

१. क. मा. 'शे' इति पाठो नास्ति ।
२. क. मा. 'वह्निनिपीय:' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रमरैः प्रवरैरदर्शिनो
दितिजैस्साक्षिनिजैरशंसिनः ।
समगायनदिव्यगायनै-
स्सुरनारीनिकरैरमानिनः ॥१०९॥

पाटुवैणिकसंसदग्रत-
स्तपसपिङ्गजयकलापकम् ।
भ्रमयन् प्रशंसनां शिरो
मृदुवीणानिनादेन नारदः ॥११०॥

दमयति दमयन्ती स्वच्छभासं वितानैः
तरलयति गुणानां सम्पदा शैलजाताम्[1] ।
श्लथयति हानसर्वं वेदवत्या अखेदात्
दलयति मदमिद्धं साधु मन्दोदरिस्थम् ॥१११॥

त्रिभिर्विशेषकम्

तुलयति न पुलोम्नः कन्यकां भाग्यभारात्
न जनकसुतयासौ जायते जातसाम्या ।
द्रुपदनृपतिपुत्री किञ्च पाञ्चालिकास्याः
पुरत इति समस्तं दिष्टजातं प्रविद्वान् ॥११२॥

मदनविटपिवेल्लद्वल्लरीं तां प्रपश्यन्
वियति विनतपक्ष ऽ पर्वतोऽप्यस्थिरोऽभूत् ।
स्मरपरशरलक्ष्यो वीक्ष्यतां व्यासदेवः
शरणमुपजगाम स्वाग्रजातन्तुषारम् ॥११३॥

विमलविपुलमुक्तामुक्तगात्रीं विलोक्य
दिनसमुदितकामो वामदेवो महर्षिः ।

---

१. मालिनी जातिः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सविधविविधविद्याभिज्ञविज्ञैर्निरुक्तां
श्रुतिमतनिजमुक्ति प्राललम्बे कथञ्चित् ॥११४॥
वरणभुवि समीतां वीक्ष्य तां राजपुत्रीं
विषयिवशवरिष्ठस्सद्गरिष्ठो वसिष्ठः ।
कथमपि परिसेहेऽरुन्धतीशोभिपार्श्वो
मदनकदनवह्निज्वालजालं विशालम् ॥११५॥
दक्षोप्यक्षवशो विलक्षपदवीं सम्प्रेक्ष्यतां शिश्रिये
पश्यन्कस्य पुरोऽपि कश्यपमुनिः कस्याभवद्वश्यगः ।
अत्रिस्सत्रिवरस्त्रिवर्गचरमं मेने कदा कृत्रिमं
जातस्तिग्ममरीचितापित इव स्मारैर्मरीचिः[1]शरैः ॥११६॥
रम्भासम्भृतविभ्रमाप्यभृतसास्तंभं स्थिता
तां दृष्ट्वा हरिणी हृणीमितवती दृग्भ्यां भृशं तर्जिता ।
प्रख्यातावशिनां वशेव शमगात्किञ्चोर्वशीतद्गुणैः
याता कापि न मेनका रुचिकलपान्तस्याः पुरःकामपि ॥
चिन्तारत्नकृतालबालसुरभिक्षीरोक्षितक्षोणिभूः
कल्पद्रुस्पृहणीयदानचरिता सा राजपुत्री ततः ।
क्षुभ्यत्क्षीरपयोधिमध्यविसरत् प्रोत्तुङ्गभङ्गप्रभा
पाङ्गावेक्षणदानतोऽसुखयत द्यावापृथिव्योर्जनान् ॥११८॥
तस्याः पक्ष्मलचक्षुरुक्षितशितप्रोद्यत्कटाक्षावली
दुर्व्याली कवलीकृतस्मृतिधियस्तारुण्यभाजस्तदा ।
केयं सान्द्रसुधाभिपृष्टिरुदिता केयं लताष्टापदी
किं कुर्मः क्व वयं कथमिदमिति व्यामोहमापेदिरे ॥

---

१. 'सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्' इति शार्दूलविक्रीडितवृत्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उद्यच्छारदपार्वणामृतकरप्रस्पर्द्धिवक्त्राम्बुजान्
दूरोत्क्षिप्तकटाक्षकैतवलसन्नीलाब्जमालामिमाम् ।
शृङ्गारामृतसिन्धुनिर्गतरसा[1] सौभाग्यभाजं रसाद्
दृष्ट्वा यादवनन्दनो हृदि दधौ क्षेमं वचो वेधसः ॥

श्रीमत्कूर्मधराधरेन्द्रवसति प्रख्यातपन्तान्वये
जातः श्रीभवदत्तपण्डितवरः श्रीभार्गवी तत्प्रिया ।
तत्सूनोः सुकृतेः कृतौ पृथुमतेः श्रीकार्तवीर्योदये
सर्गः काव्यवरे गतो ह्युपदशो गङ्गाप्रसादानुजे ॥१२१॥

इति श्रीसुकृतिदत्तविरचिते कार्तवीर्योदयमहाकाव्ये
प्रभातवर्णनस्वयंवरस्थलगमनवर्णनं
नामैकादशः सर्गः[2] ॥

---

१. क. मा. 'मा' इति पाठः ।

२. इति श्रीकिरातक्षत्रियकुलोत्पन्नस्य मेच्यङ्चलपाँचथरलालीखर्क-वरङाङाग्रामवास्तव्यदोवालीछाचामलिङराईकुलोद्भूतस्य डा. स्वामिप्रपन्नाचार्यस्य कार्तवीर्योदयसम्पादिते एकादशसर्गस्य टिप्पणीपाठभेदादिकं समाप्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कार्तवीर्योदयमहाकाव्ये

द्वादशः सर्गः

पुरो भवतु तारिणी निगमशीर्षसञ्चारिणी
समस्तभयहारिणी निखिलदुःखसन्दारिणी ।
परमेश्वरविहारिणी भवपयोधिसन्तारिणी
जयमुकुटधारिणी भुजगसम्भार[1]भारिणी ॥१॥

मुख्या सखी चन्द्रकला प्रगल्भा
समस्तभूमीपतिमण्डलस्य ।
कुलञ्च शीलं विदुषीविशेषाद-
भोज्यानिदेशार्थमथाससाद ॥२॥

विदर्भसिन्धोरुदिता सहैव
लक्ष्मणाशिवश्रेष्ठतनूविहारा ।
तस्याः पुरश्चन्द्रकला चकाशे
नानादिगन्तागतभूपतीनाम् ॥३॥

सत्सूक्तिपीयूषझरीं किरन्ती
विचित्रचारित्रविशेषविज्ञाः ।
पतिं वरण्याः कनकप्रभायाः
मुख्या सखी सन्निधिमाससाद ॥४॥

---

१. पृथ्वी जातिः। सप्तदशाक्षराणि भवन्ति । षष्ठाक्षरेषु नवाक्षरेषु च यतिः लक्षणञ्च– 'जसौ जसयला वसुग्रहयतिश्च पृथ्वी भवेत्' ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नृपस्य साकेतनिकेतनस्य
प्रापय्य सामीप्यमहीमहीनाम् ।
गुणैस्सखी भोजकुलप्रतिष्ठां
जगाद जीमूतगभीरवाणी ॥५॥

मधूकमालाञ्चितपाणिपद्मां
यथा... पद्मसुपद्महस्ताम् ।
प्रोचे वयस्या पुरतो विधाया-
ऽयोध्याधिराज्यस्य पतिंवरां ताम् ॥६॥

आरण्यको गज[1] इवायमुदानवीर्यो
दानाम्बुसार्हकरकोलपन[2]रापनाम्ना ।
भूमिपतिर्गतिविनिर्जितहंसकान्ते,
कान्ते न किन्न रमसे नगरेऽमुनैव ॥७॥

एतन्नृपाभिजनभूरहितैरयोध्या
योध्यापरेण तपसा विदुषापि बोध्या ।
यो ध्यायति प्रतिदिनं स विमुच्यते ता-
मध्यायतो गदितवानिति शक्तिनप्ता ॥८॥

अस्याहवे प्रतिचलन्नसि कृत्स्नसर्प्यं
प्रारभ्य भोजनविधिं रिपुराजकस्य ।
प्राणैर्निपीय च यशः पयसां प्रवाहं
तद्योषितान्नयनवारिभिरेति शुद्धिम् ॥९॥

घण्टालः पुष्पवद्भ्यामम्मरपुरधुनीदारवारिप्रवाहः
प्रोत्क्षिप्तानन्तशुण्डोमृतजलविकुथः शैलराजोरुदंष्ट्रः ।

---

१. क. मा. 'गुञ्ज' इति पाठः ।
२. क. मा. 'र' इत्यधिकः पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मृ[1]द्वन्द्वोद्दामवैरिव्रजविकटनलारण्यमेतस्य राज्ञः
कीर्तिस्तोमाभ्रकुम्भीजगदुदरसरस्सम्भ्रमीवम्भ्र[2]मीति ॥

एतन्नृपालपृथुवृत्तभुजोपधाना
नानाविलासजनितश्रमनिस्सहाङ्गी ।
साकेतजोपवनकुञ्जगृहे कुरुष्व
सत्सारवोर्मिचलितश्वसनोपभोगम् ॥११॥

सम्प्रेक्ष्य तं शशिकलावचनावसाने
भूमीन्द्रजा कुलगुणैरनुरूपरूपम् ।
भूपञ्जहाव हह रुक्षविलोकनेन
धात्रान्यदीयरचितन्न परस्य भोग्यम् ॥१२॥

ततस्सखीन्द्रकलोज्वलाभा
द्विरेफमालामिव मञ्जुरावाम् ।
भोज्यां प्राणीन् पेमथुराधिनाथं
सितांशुकं कैरवगुच्छकं वा ॥१३॥

उद्दिश्य[3]दिश्यजनगीतयशो विशालं
वासं श्रियो धरणिमण्डलमण्डनन्तम् ।
त्रस्यच्चमूरुशिशुचञ्चललोचनान्ता-
मूचे विचित्रवचना[4]रचना वयस्या ॥१४॥

माधुर्य्यधुर्य्यमथुरामधुरोपभोगं
माध्वीकमाध[5]रमनोज्ञकटाक्षवृष्ट्या ।

---

१. क. मा. 'मृद्वत्' इति पाठः ।

२. स्रग्धारा जातिः ।

३. क. मा. 'उदीश्य दीश्य' इति पाठः ।

४. क. मा. 'वचना' इति पाठो नास्ति ।

५. क. मा. 'र' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एवं कृतार्थय कृतार्थकृतार्थिसार्थं
लज्जां व्युदस्य शुचिरस्य विहस्य किञ्चित् ॥१५॥

एतद्वितीर्णवसुराशिपरम्पराभि:
र्धीरिष्टभूमितलवासिषु वित्तदेषु ।
ह्यर्थीभव[1]द्द्रविणसञ्चयनः कुवेरः
पुष्णातु रिक्ततरमित्रकपालिगेहम् ॥१६॥

एतस्य वाजिवरराजिखुरक्षतक्ष्मा-
निर्यातरेणुनिकरच्छलजालमग्नः ।
संरुद्धपादबिसरो मलदूषितश्च
लीलागतो भजति दीनदशां पतङ्गः ॥१७॥

एतत्प्रतापरविरेव किल त्रिलोकीं
रात्रिंदिवं वितिमिरां कुरुते सदोद्यन् ।
एतस्य चास्तसमयो विधिवासरान्तः
किं वा विदर्भनृपनन्दिनि सम्प्रदिष्टः ॥१८॥

सम्पन्नभोगसुभगान्ननु भूरिसेनान्
नित्यं भुनक्त्यपपथायमुदग्रवीर्यः ।
दृष्टार्थकान्नियमतः प्रधनावतारे
तारेशजिष्णुमुखि भोस्सखि पश्यसि त्वम् ॥१९॥

ग्रीष्मे तटान्तविनिरूढतमालमाला-
सुश्यामलामलजलां यमुनां विगाह्य ।
एतन्नृपालकरपल्लवसक्तसक्ता-
हारैर्विहारमनुसर्तुमिह प्रसीद ॥२०॥

---

१. क. मा. 'द्' नास्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संशान्तकाममदमुना अमुना पुनाना-
मासाद्य पुष्पयमुनां तटकेलिकाले ।
नूत्ना सखी भवतु सा तव भ[1]ङ्गहस्तै-
रातन्वती व्यजनवातमदूरसंस्था ॥२१॥

वृन्दावने सुरभिसौरभलोभरिङ्गत्
गुञ्जन्मधुव्रतसु मञ्जुनिकुञ्जभूमौ ।
पल्याङ्कदेशमधिशय्य विशालनेत्रे
कामोत्सवैस्सफलयो भुवयो नवीनम् ॥२२॥

गोपाङ्गनाभुजविलूलनवप्रवाले
विस्तीर्णमालशिशुशालनिरन्तराले ।
गोवर्द्धने मृदुलघासधराभिरामा-
रामो रमस्व रमणे नरमेव रम्य ॥२३॥

सा भोगभूमिरुदिता नहि केवलं पूः
कर्मन्दिदृंसति विमुक्तिधरा धरापि ।
उत्तानपादतनयः शिशुरत्र पूर्वं
तप्त्वातपः पदमयाप परैर्दुरापम् ॥२४॥

स्नात्वा कलिन्दतनयासलिले सलीलं
त्वं बाहुले बहुलपक्षसदृक्षकान्तिम् ।
राधापतिं बहुलपङ्करुहैः प्रपूज्य
सद्वीक्षणे बहुलजन्मभिदां वधानः ॥२५॥

एतद्भूपतिकीर्तिहंसवनिता ब्रह्माण्डसञ्चारिणी
याता ब्रह्मपुरं विरञ्चिपतगादापन्नसत्वाक्षितिम्[2] ।

---

१. क. मा. 'मङ्ग' इति पाठः ।
२. शार्दूलविक्रीडितं वृत्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रायान्तीस्खलन्तीस्म निर्ज्जरधुनीतीरे तदीयोदरान्
निष्क्रान्तः शिशुरेव राजति शशिस्त्रैलोक्यमाह्लादयन् ॥
एतद्भूपतिकीर्तिवारवनिता त्रैलोक्यरङ्गाप्यली ?
मध्ये दुग्धपयोधिचन्दनरसादिग्धां तनुं बिभ्रती ।
शेषाहीश्वरयष्टिकापरिमिलन्नक्षत्रमालाप्रभा-
नीहाराचलकन्दुका कुतुकतो नित्यन्नरीनृत्यते ॥२७॥

सखीमुखोत्थां मथुरेश्वरस्तुति-
साकर्ण्य निर्वर्ण्य च भोजकन्न्या ।
कुलेन शीलेन गुणेन चार्ज्जुने
मे[1]नेऽत्र किन्दोषमनर्ज्जुनस्वतः ॥२८॥

ततो वयस्याश्मितशोभितास्या-
नुमाय वैराग्यमिह क्षितीशे ।
वाराणसीभूपतिसन्निकाशं
प्रापय्य तामिन्दुमुखीं बभाषे ॥२९॥

अये मृगाधीश्वरमध्यदेशे
वाराणसी राजति मध्यदेशे ।
या काशनान्मुक्तिपुरीपुरस्तत्
काशीति सञ्ज्ञां लभते सदर्थाम् ॥३०॥

तस्याः पुरोधिपमिमं हरनेत्रवह्नि-
ज्वालोषितस्मरनवीनतरप्ररोहम् ।
उन्नीय वक्त्रकमलं शुचिनारसेन
पूर्णेन सिञ्च चलता नयनाञ्चलेन ॥३१॥

---

1. क. मा. 'मे नेत्रे' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यसो नृपाः प्रवितरन्ति करंद्विषन्त-
स्सेवा रता अपि सदा समितिस्थितायाः ।
हारावयुक्तगलकान् विदधातिचैता-
नेष क्षणात्क्षितिपतेः कृतसर्वपक्षः ॥३२॥

भूभर्तुरस्य गुणतस्समितिस्थितस्य
स्वीये परस्य च पुरे लघुमार्गणौघः ।
नित्यं समापतति तीक्ष्णमुखस्समन्ता-
त्कृत्वा सुभोजनमयं परितृप्तिमेति ॥३३॥

एतन्नृपालखरधारशरक्षताङ्गा-
स्त्यक्त्वापसून्न जहति क्षितिमिद्धभोगाम् ।
प्राप्यापि मङ्गलतुलन्न च पार्थिवत्वं
रक्तप्रसाधितभुवामपयाति तेषाम् ॥३४॥

युद्धे स्वीयश्च विमुखस्स हि सम्मुखत्व-
न्निभिद्य मित्रमुदितं समुदेति शत्रुः ।
यस्सम्मुखे विमुखतां स हि याति शत्रुः
काशीपतिः पुनरमित्रमुदारसत्त्वः ॥३५॥

चित्रं विमुक्तिमभिवा[1]ञ्छति पक्ष्मलाक्षि
त्यक्ता न भूपतिरसावविमुक्तसङ्गम् ।
आनन्दकाननपुरेऽपि सुखोपलब्धि-
मानन्दकाननपुरेण तवायताक्षि ! ॥३६॥

विश्वेश्वरस्य नगरी न गरीयसी किं
भूपोऽप्यसादनवरो नवरो मतः किम् ।

१. क. मा. 'वञ्छ' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

किन्नासि यौवनवती नवतीर्थयोग्या
केनाधुना न भवती भवतीह रक्ता ॥३७॥
स्नात्वा प्रभातसमये मणिकर्णिकायां
विश्वेश्वरं समभिपूज्य विशालभक्त्या ।
एतेन सौधशिखरे शिखराग्रदन्ति-
क्रीडारता सफलयाशु तनुर्वयश्च ॥३८॥
कामारिरत्र वसतीति कथं स काम[1]-
स्सेव्यो भवेदिति भयं सुभगेन याहि ।
सम्प्रार्थितो गिरिजया गिरिशः पुरेऽस्मि-
न्कामन्नृणान्निवसतां विरुणद्धि नैव ॥३९॥
वाराणसीति गदिता किल मुक्तिसत्रं
तत्रागता सुकृतिदुष्कृतिनस्समानम् ।
कैवल्यभागमुपयन्ति शिवप्रसादात्
साम्यंहि लिङ्गमु[2]दितं परमेश्वरस्य ॥४०॥
आराध्य तत्र गिरिजागिरिशौ निकामं
कामं युवामिह परत्र तथापवर्गम् ।
सद्भावलाभफलमश्नुतमेतदाहु-
श्चातुर्यमूर्जितमुदेति यदत्र तत्र ॥४१॥
यूनामिहापि बहुलप्रियतायुताना-
मर्द्धाङ्गमात्रमिलनाहितदम्पतित्वम् ।
श्रुत्वावसानसमये विमुखो च माभू-
स्सर्वाङ्गसम्मिलनतोऽपि ततोऽधिकं शम् ॥४२॥

---

१. क. मा. 'य' इति पाठः ।
२. क. मा. 'पु' इत्यधिकः पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

किं ब्रूमो वरवर्णिनि क्षितिपतेरेतस्य तस्याः पुरः
माहेयं महितं महित्वमतुलं यस्मिन् क्रमन्ते गिरः।
धीराणामनुरक्तचित्तमनुजस्तोमाय वित्तञ्च यत्
श्रेयो धारयते गिरीशपदवीं दत्ते च पद्या'यते ॥४३॥

हस्तस्थापितशङ्खपद्ममकरो राजाधिराजोऽस्त्ययं
स्थानेयं शतकोटिमुत्सृजति च क्षोणीभृतां पक्षमित्।
शालेयश्रुतिमार्गविप्लवकरावृन्दक्षिणाशास्थितः
किञ्चायं बहुवाहिनीशचरणः पातालमध्यश्रितः ॥४४॥

प्रतिज्ञामाधाय त्रिभुवनसिताद्वैतकरणे
व्रजन्ती शक्ताभून्नरिप्रमुखमालिन्यदलने[2]।
पदे तस्य क्षोणीपरिवृढपतेः कीर्तिदयिता
ततो ह्रीणायातु भ्रमति सकलाशास्वनुदिनम् ॥४५॥

काशीपतिस्तुतिविकाशिमुखीं सखीं तां
भोज्याशयप्रणिहिता निजगाद दासी।
अन्येऽपि सन्ति धरणीपतयः पदानि
तद्वर्णनाय कतिचिच्च निगूहयस्व ॥४६॥

दासीगिरा प्रणयलेशविहीनदृक्षा
तस्यास्सकाशीपतिरासभावम् ?।
सा पद्मिनी न मनुते स्म कलेश्वरस्य
तस्यातिकोमलपरेण[3] हृदोभिमर्शम् ॥४७॥

ततस्सखीशिञ्जितरत्नकाञ्चीं
काञ्चीं पुरीं द्यां समधिश्रयन्तम्।

---

१. शार्दूलविक्रीडित् वृत्तम्।
२. शिखरिणी जातिः।
३. क. मा. 'करेण' इत्यधिकः पाठः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संविश्रतं तं सुखमाञ्च काञ्चित्
काञ्चिद्गिरं प्राह विदर्श्य भोज्याम् ॥४८॥

अये[1] मृगाक्षि ! क्षणमत्र भूपतौ
क्षिपस्व चक्षुः क्षपितारिपक्षके ।
कटाक्षनीलाम्बुजमालया वृतं
वरीष्यसे साधुमधूकमालया ॥४९॥

सुतीक्ष्णकौशेयकदक्षधारा
विपक्षपक्षक्षपणाविलक्षः ।
सुस्थूललक्षः कृतमित्ररक्ष-
स्संलक्ष्यतामेष कपाटवक्षः ॥५०॥

एतन्नृपालगजराजघटाघनाली-
सङ्घट्टनादहितभूपपृथुप्रतापः ।
भास्यां तिरोभवति युद्धधरान्तराले
सञ्जायते च रिपुयौवनदुर्दिनत्वम् ॥५१॥

एतन्नृपालकरवालकरालकाल-
प्रोत्तालफालगतनालशिरोऽज्वजालः ।
युद्धान्तरालगतवैरिविशालवर्गो
बालप्रावल इव सम्मृदितश्चचा[2]ल ॥५२॥

नावन्नदन्ति मददन्तिगणा व्रजन्ति
वाजि[3]व्रजाश्च विलसन्ति विलासवत्यः ।
नन्दन्ति नन्दनजना रिपुमन्दिरेऽस्य
यावन्न वा नयनकोणसुशोणदीप्तिः ॥५३॥

---

१ क. मा. 'मे' इति पाठः ।

२. क. मा. 'बा' इति पाठः ।

३. क. मा. 'वाजि' पाठो नास्ति ।

CC-0, Nepal Sanskrit Academy, Kathmandu Collection

तुरङ्गखुरखण्डिता प्रजविचक्रसञ्चूर्णिता
मदान्धकरिकोटिभिः श्रवणसूर्यसम्प्रेरिता ।
इदन्नृपरणोऽपरे परनरेशपृथ्वीभयात्
समाश्रयति पुष्करं विभुविभूषितं म[1]णिध्रुवम् ।।५४।।

किन्नैव सन्ति भुवि सागरमेखलायां
पृथ्वीश्वरा नयदयोदयशौर्य्यभाजः ।
तेषां स्वकीयगुणगौरवपातिताना-
मारोप्य मूर्ध्नि चरणन्तु विराजतेऽयम् ।।५५।।

एतत्पुरे वसति पञ्चमुखो गणैस्स्वै-
रस्वैरिवन्निजभजज्जनमुक्तये नः ।
सोऽयश्चतुर्भुजवपुर्भजतीति युक्त[2]-
मेकात्मकत्वमुदितं हरिशर्वयोर्यत् ।।५६।।

यूनामुना हरिहरोभयरूपमेक-
माराध्य तत्किमपि दैवतकं सदैव ।
तन्नामधाम समलङ्कृतां गतानां
यत्र क्षयो भवति जन्म परम्परायाः ।।५७।।

विमुक्तिलक्ष्मीप्रियरत्नकाञ्ची
काञ्ची कला मु[3]ञ्चति काञ्चि[4]दन्या ।
पूरञ्चिताप्येतदलङ्क्रियायै
किंवा विधात्रा विहितासि भद्रे ।।५८।।

---

१. क. मा. म' पाठो नास्ति ।
२. क. मा. 'मेका' इत्यधिकः ।
३. क. मा. 'ना' इति पाठः ।
४. क. मा. 'काञ्च' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अलङ्गिरा स्वल्पदृशा समाद्य
गता सहानेन धराधिपेन ।
प्रभूतभूर्ति प्रविलोक्य तत्र
प्रत्येषि मान्तथ्यगिरन्तदानीम् ॥५९॥

एतत्कीर्तिविवर्तमेव मनुमोदुग्धाब्धिगौरीगुरु-
प्रालेयद्युतिकैरवामरधुनीपूराभ्रनागामृतम् ।
किञ्चैतत्प्रपतत्प्रतापशिशवो भ्राजन्ति लोकत्रये
मार्तण्डाम्बुधिमध्यभर्गनयनक्षोणीधरास्यानलाः ॥६०॥

विदर्भजाकूतसुहूतनुन्ना
दासी ततः प्राह सखीं सहास्या ।
एतद्यशोभिः प्रवयोजनानां
केश्यं सितं किं भणितं त्वया न ॥६१॥

तदुक्तिनिर्यत्स्मितशोभितास्या
नरेन्द्रजाता प्रविलोक्य भूपम् ।
कूपं यथा शुभ्रजलं पिपासु-
स्तत्याज[1] निर्व्याजमसौ पराची ॥६२॥

ततः सखी भूपतिं किंवदन्ती-
मेवं वदन्ती परिशुभ्रदन्ती ।
जगाद शृङ्गाररसं स्रवन्ती-
मवन्तिनाथस्य पुरो गतान्ताम् ॥६३॥

अये धरित्रीपुरु[2]हूतपुत्रि !
शृङ्गारसौन्दर्यनिधिं विधेहि ।

---

१. क. मा. 'प' इत्यधिकः पाठः ।
२. क. मा. 'छ' इति पाठः ।

CC-0, Nepal Sanskrit Academy, Kathmandu Collection

एतन्नरेन्द्रस्य मुखारविन्दं
कटाक्षधाराभ्रमरावलीढम् ॥६४॥

एतद्विपक्षक्षितिरक्षिसुन्दरी
दरीस्थितारण्यशरीसरीसृपाद्यः ।
विशोध्यमाना शवरीभिरादरा-
द्दरीयसीं देवलिपिं वृणोत्यलम् ॥६५॥

नालीकनालीककदम्भदम्भ-
दम्भोलिसंशातितवैरिगोत्रः ।
महीमहेन्द्रो विबुधालिसेव्यो
नरो हि तोयं पृथुलायताक्षि ! ॥६६॥

विस्तीर्णवत्थायुगदीर्घबाहुः
कृशावलग्नः पृथुकन्धरोऽसौ ।
विशालनेत्रोऽञ्चितसर्वगात्र-
स्त्वदर्थमेवारचि किं विधात्रा ॥६७॥

प्रफुल्लपद्मं भ्रमरालिनीलं
कलङ्कहीनं विधुमण्डलन्न ।
अश्मश्रुजातं मुखमस्य राज्ञः
केनोपमीयेत सुवर्णवर्णे ॥६८॥

कलङ्कलेखाविधुरं विधोश्चेत्
स्यान्मण्डलं पार्वणमम्बुजाक्षि ? ।
अश्मश्रुजातं मुखमस्य राज्ञः
केनोपमीयेत यथा कथा च ॥६९॥

एनं वसन्ततिलकार्भकगर्भरूपं
त्वां माधवीव धवसंवरणे प्रवृत्ता ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वृत्वा स्वयंवरमहे महिते मनोभू-
केलीधवानजुजवल्लरिवेष्टनेन ।।७०।।

एतत्पुराश्रितमहेश्वरमौलिचन्द्र-
प्रत्यग्नरश्मिविशदे बहुलेऽपि पक्षे ।
सौधाग्रचारुशयना विहरस्व रात्रौ
संप्रेक्षितस्मरविलासमनेन यूना ।।७१।।

जागर्ति तत्र जगतीजनको जनाना-
ञ्चन्द्रार्धमौलिरमृताख्यपदप्रदाता ।
यत्पादपद्ममकरन्दसुधावितृष्णा-
स्त्यक्त्वा गृहादिसुखमुज्जयिनीन्नचोरुम् ।।७२।।

विप्राननाग्निहुतनूप्रजनोपभोग्या
शिप्रानदी प्रवहतेऽस्य पुरेति दीप्रा ।
तन्नीरसं मिलितधीरसमीरसौख्यं
पत्यामुनानुभवतीरनिकुञ्जकेल्याम् ।।७३।।

किन्नो सन्ति सुदन्तिभूमिवलये पुर्य्यः शतन्ता नृपाः
किन्नावन्ति भवन्ति किन्न जयिनो धावन्ति जेतुन्न किम् ।
धन्यावन्तिपुरी भवार्तलसमं यस्याञ्जना मन्वते
धन्योऽगण्यगुणौकगेहमवनीनाथस्तथाप्येष सः ।।७४।।

एतद्भूमिपतेः प्रतापदहनोद्विद्भूपवंशाटवीं
दग्धा तद्वनिता विलोचनगलद्वाराम्प्रवाहैरपि ।
शान्तिन्नैति विभूतिमप्यनुदिनं सन्दीपयत्यद्भुतं
मार्तण्डं परिभूय राजतितरामूर्ध्वाधरस्थाङ्शुकः ।।७५।।

इत्थं सखीमुखचलत्कविता वितापि
भूमीन्द्रजातदनुभूपमिमं विलोक्य ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नाऽसौ मम प्रभविता भवितेति विज्ञा
तत्याज साम्प्रतरला सरलाशयेन ॥७६॥

समुद्गता चन्द्रकलानुकूलं
लावण्यसिन्धुस्थितवीचिमेताम् ।
धृत्वान्यमूर्वीधरमिष्टकाले
वचोऽमृतं साधु ससर्ज भूरि ॥७७॥

तुष्टिर्न ते क्वापि विलोकयते नृपे
तथाप्यसौ पाटलिपुत्रभूपतिः ।
प्रतीक्षतेऽपाङ्गनिदर्शनोपदां
पदान्तरस्थे द्विपदांवरेण्यकः ॥७८॥

अल्पाम्ब जीवनभृता भुवि सन्ति भूपाः
कूपाः परे मुखरदर्दुररावतुष्टाः ।
बन्धुस्समस्तजगतो गुणसिन्धुरेको
यं सेवितं कविगिरा पुरुजीवनाद्याः ॥७९॥

एनद्धरेन्द्रसदसि स्थितधीवराणां
वाग्जालनिश्चलपदाः कवयस्समस्ताः ।
शकान्तिपक्ष्मपि चालयितुन्नयत्ना
द्रष्टुम्मुखान्यपि भवन्ति न शक्तिभाजः ॥८०॥

एतत्पुरो विवदमानसमानमान-
सम्भासमानसुधियामुपमानमेत्य[1] ।
शेषस्तु शेष इति चेदधरे स एवां
गोमान्य एव स गुरुस्तदपेक्षया च ॥८१॥

---

१. क. मा. 'लेकि' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रदीर्घसूत्रैः पृथुवृत्तिसङ्गतै-
निर्णीतलक्ष्यैरुचितार्थवाच्यकैः ।
सद्भाव्ययत्नैस्समितिस्थितस्सदा-
यं सेव्यते शूरजनैश्च सूरिभिः ॥८२॥

जाने चिराय विधिना जगदम्बकम्पि
चिन्तामणिं बलिगृहे दिवि कल्पवृक्षम् ।
संसृज्य तत्प्रतिभटं सृजताऽमुमद्धा
भूमिं विलोक्य नरदैन्यविनाशिहीनाम् ॥८३॥

एतत्पुरीपरिसरं सुपरिष्करोति
गङ्गा भगीरथरथानुपथप्रयाता ।
यां वेद वेदनिपुणो विधिरादरेण
ब्रह्मेति सर्वजनता दययार्द्रवाक्तम् ॥८४॥

तस्यां युवामनुदिनमवनं विधत्ता-
न्धत्ताञ्च तज्जलविभूषितमूर्द्धदेहम् ।
एकं वयः परिणतौ न कदाचिदेवं
युष्मद्वयस्य भविता सुभगे वियोगः ॥८५॥

विज्ञासि विज्ञाप्यमतः परं किं
विद्वान् युवायं धरणीमहेन्द्रः ।
एतत्पुरं पुष्पपुरञ्च रम्य-
मुत्सङ्गगङ्गामलवारिपूतम् ॥८६॥

यदाश्रयात्फल्गुरपीह पूज्या
यत्पादपङ्करुहसन्निधाने ।
प्रदत्तपिण्डैः पितरो लभन्ते
मुक्तिं स देशो स्वगदाधरोऽस्ति ॥८७॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गयाप्रदेशे तनयैः पितृणां
कार्योद्धृतिश्चेद्दशवेदवाक्ये ।
लिङ्गाविवक्षा यजने यथाऽत-
स्साधारणोऽप्येष विधिर्विधिज्ञे ॥८८॥

वाच्यं कीर्तिसुधासिते त्रिभुवने कष्टन्नृणां याति किं
प्रागेकाकिनि कार्य्यबाहुशयनोद्भूतास्यभूमीभुजः ।
शर्वब्रह्मपुरद्विषामपि विपन्निर्गच्छतीत्यद्भुतं
तद्वामाजनकासनानि बहुलान्यासाद्य तुष्यन्ति च ॥८९॥

पाण्डित्यगेहे स्मरचारुदेहे
नेहे न चित्रं रिपुवर्गलेहे ।
भूपे दुरापेऽत्र समीपयाते
तयामयेवामयभाजि मर्त्ये ॥९०॥

आली ततस्तां सविलासगन्त्रीं
शुभ्राम्बरालक्ष्यपयोधराद्या ।
शरद्यथाराजमरालमालां
राजान्तरं पद्मवनन्निनाय ॥९१॥

उवाच सैनामयमङ्गनाथो-
ऽप्यनङ्गनाथो न च यौवनेन ।
अङ्गाङ्गनानङ्गवशं प्रयाति
का नाम नास्याङ्गविलोकनेन ॥९२॥

शूरोऽपि राजकरसंहतिभिः करोति
चित्रं द्विजात्युपकृते कमलोदयञ्च ।
चक्रद्वयञ्च वियुनक्ति न मन्दसूनु-
च्छायाप्रियोऽप्ययमुदारगुणे नरेन्द्रः ॥९३॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शूरोऽपि नो कुवलयं मुकुलीकरोति
 मन्देह देहदहनाय न नह्यते च।
सम्पूर्णराजकरकल्पितकायकान्ति-
 र्भक्ताञ्जनानवति चायमनर्घ्यतोषः ॥६४॥

शौरीं प्रभामनुदिनं विदधात्ययत्नात्
 स्पर्शन्न याति तमसोऽपि कदाचिदेव।
सम्पूर्णमण्डलकरो मृदुना करेण
 राजा मनो हरति चित्रमनङ्ग[1]देहः ॥६५॥

क्षोणीभृताम्प्रभुरसौ न हिमालयः किं
 सौन्दर्यमस्य परिलुम्पति नो हिमानी।
अस्य प्रिया भवितुमर्हति मेनकैव
 नास्यान्तरे विरहतश्च शिवौसदैव ॥६६॥

रत्नाकरस्समकरश्च सदानवारि-
 र्लक्ष्म्याश्रयोऽप्ययममन्दरसानुरागः।
शक्यस्सुरासुरगणैरपि नास्य नाथो
 नेच्छत्यसौ सगरसन्ततिखातवृद्धिम् ॥६७॥

हेमाद्रिरेव धरणीधर एष भद्रै
 र्यत्सेव्यते मृतसुतर्पितनिर्जरौघैः।
नक्षत्रवृन्दमुपरिस्थमुदेति चास्य
 राजा तु पादपतितस्समुदेति चित्रम् ॥६८॥

वाक्त्रम्बुजं श्रयति साधु सरस्वती सा
 सद्राजहंसरुचिमानसमस्य राज्ञः।

---

१. क, ग. नो पुस्तकेः नास्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गौरीतनुर्विजयते धर एव शोणो
  नास्यात्परस्तव वरस्मरतो मतो मे ।।९९।।

अस्मादुद्वलदण्डजव्यतिकरान्निस्सारिता मण्डलात्
कीर्त्या श्यामलिताः प्रतापतनये नाशोषिताः पावकात्।
एकत्रस्थितयोरिमे दसुपलाशोद्गत्समितसङ्गताद्
यान्त्येते परमाणुतामुपगता देहान्तरम्पार्थिवाः ।।१००।।

इत्यङ्गराजगुणवर्णनपक्षपाति
  श्लेषावधानमनसा क्षणमम्बुजाक्ष्या ।
हृत्पद्मसद्मगतहैहयराजचिन्ता-
  विश्लेषसम्भवमघं कथमप्यसाहि ।।१०१।।

अर्जुनं तं मनुते स्म सा तृणं
  विशेषविज्ञापि नरेन्द्रनन्दिनी ।
लावण्यसिन्धावपि रात्रिबान्धवे
  न पद्मिनी तुष्यति केन हेतुना ।।१०२।।

सामालयं मालयमालिवर्या
  सामालयं भूमिपतिं प्रदर्श्य ।
विदर्भजां दर्भदलाग्रबुद्धिं
  सन्दर्भशुद्धां गिरमावभाषे ।।१०३।।

अयं युवा नागपुरस्य नाथः
  प्रफुल्लनीलोत्पलदामकान्तिः ।
आमुक्तमुक्तालप्रयावलाका
  पङ्क्त्योववर्षाजलदो विभाति ? ।।१०४।।

अनेन यूना तव कम्बुकण्ठि
  त्वयैव शोभास्य धराधिपस्य ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तडिद्विलासेन विना न मेघो
मेघं विना भाति तथा तडिन्न ॥१०५॥

प्रतप्तचामीकरचारुमूर्ते-
रिदन्नृपोत्सङ्गसुसङ्गतायाः ।
तव प्रभानीलशिलान्तराल-
प्रत्युप्तहेमद्युतिमेत्वयत्नात् ॥१०६॥

आरामकेलिसमये समयेऽर्थ्यमाण-
स्सम्पादको रुचिरकुञ्जकुटीरकेल्याः ।
एतस्य नर्मसचिवत्वमुपैति भद्रे
श्रीखण्डखण्डवलयो मलयो नगेन्द्रः ॥१०७॥

बाले विलोकयसि तत्र रसालपोता
नेलालतावृततनून् हरिचन्दनानि ।
वासन्तिका परिवृतानि विहारकाले
संश्लिष्य भूपतिमिमं स्मरतुल्यभासम् ॥१०८॥

निर्वर्णयिष्यसि मुदा स्मरपाशकर्ण
तान्दक्षिणाब्धि मिलितामिह ताम्रपर्णीम् ।
या त्वादृशां घनपयोधरलंबिहार-
प्रारम्भणाय जनयत्यतियुक्तमुक्ताः ॥१०९॥

तस्यास्तटे प्रतिभटेऽस्मरविष्टपस्य
द्रष्टासि तन्वि शिवभागवतान् द्विजातीन् ।
यान्बाधते न कलिमित्रजनः कदाचि-
त्कामादिरिद्धतपसा परिशुद्धचित्तान् ॥११०॥

अस्त्येव श्रुतिसम्मतं विधिदिनं यस्मिन्सहस्रं खगाः
कल्पन्ते प्रलयाय तद्दिवसकृत्को वेति चिन्ता नृणाम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रत्यर्थिक्षितिपालवामनयना वैधव्यदीक्षाध्वर-
स्तम्भैतन्नृपबाहुजः शमयते भास्वान्प्रतापाभिधः ॥१११॥

जाग्रत्यस्य यशांसि पारदशशिप्रख्यातिलोकत्रयं
यैर्लिम्पद्भिरिहाभ्रकुम्भिनिवहो राज्ञां गृहे सर्वतः।
कैलासाः प्रतिवर्षमेव मुदिताः शेषा विशेषस्थिताः
पाताले फणिनोऽपि दैवतगणाः सर्वेऽपि शर्वायिताः ॥११२॥

एतन्नृपालविरुदावलिपाठमग्ना-
माली जगाद सहसा सहसा भुजिष्या।
अन्येऽपि भूमिपतयः कवितां त्वदीयां
शुश्रूषवोऽत्र विलसन्ति विलोकयेति ॥११३॥

दासीगिरा प्रकृतभूमिपतौ वितर्षां
ज्ञात्वा विदर्भतनयां विनयान्विताली।
निन्ये महेन्द्रधरणीध्रमहेन्द्रमन्त्रा-
भ्यासन्नृणां रुचिरिवागममाशु बुद्धिम् ॥११४॥

ऊचे[1]ऽथ तामयमयो हृदयोऽरिवर्गे
स्वर्गेऽपि गीतसुयशा अविगीतरूपः।
रूपानुरूपचरितोऽस्ति महेन्द्रनाथो
राजन्वती भवति भूमिरनेन नूनम् ॥११५॥

एतन्नृपालरिपुसौधसितो विमुक्तः
कीरो गिरः किरति पान्थजनैर्विलोक्य।
चिन्तार्पितान्नरपतेः कुशलङ्कुमाराः
नाधीयते किमिति भोजयते न कोऽपि ॥११६॥

---

१. क. मा. 'उचे' इति पाठः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एतत्प्रतापदहनोत्थिततिग्मकीलाः
संशोषयन्त्यसुहृदां पृतनासमुद्रम् ।
वामाविलोचनजलानि विवर्धयन्ति
संरोहयन्त्यपि तृणानि गृहेषु चित्रम् ॥११७॥

एतस्य भूरितरवारिबलौघशस्ते-
ऽरीणाम्प्रतापदहनो भुवनं विधाय ।
दुष्कीर्तिधूममलिनं गृहकोषसेना-
मित्रेषु भस्मवपुषा स्थितिमादधाति ॥११८॥

नालीकमण्येव गुणोज्झितं त्यज-
न्वक्रं गुणाढ्यञ्च शरासनं दधत् ।
गुणप्रियत्वादृजुताञ्च वक्रता-
माधारगान्नो मनुते मनूपमः ॥११९॥

एतस्य क्षितिवासवस्य करुणा क्रोधारुणा वापि दृग्
यन्मर्त्योपनतिद्रुतं स लभते कौपीनवित्तप्रथाम् ।
तद्गेहं कनकप्रबालखचितं बालार्कबिम्बप्रभं
मुक्ताहारविभूषिताखिलजनं सद्योगिसञ्जायते ॥१२०॥

नृत्यद्वाजिसुराजिराजितखुरक्षुण्णक्षितिक्षोदभू-
रेणुव्यूहनिबद्धमेघपटलीछन्नान्तरालाशके ।
भूभृद्वन्धुरसिन्धुरोद्धुरतरप्रत्यर्थिभूमीधरे
शस्त्राशस्त्रिमहाहवे विजयते सोऽयं महेन्द्राधिपः ॥१२१॥

नानाविप्रतिपत्तिपत्तिगहने मत्तर्ककर्काकुले
जाग्रत्पश्चिमपूर्वपक्षगजराट्सम्भारसम्भीषणे ।
वाग्युद्धे विदुषामयं प्रतिदिनं मध्यस्थतामाश्रयन्
शेषाशेषविशेषभाङ् न सहते सत्ये कलेः संस्थितिम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अभ्यर्ण एवास्य पुरस्य वर्ण्यते
महार्णवः शोभनकर्णिवर्णिभिः ।
तत्तीरवानीरसुमञ्जुकुञ्जके
प्रसीद रन्तुं दयितेन साकम् ॥१२३॥

सरस्वतीस्थानमुखारविन्दे
लीलोपधानामभुजे च लक्ष्म्याः ।
सा तत्र दोषं तमगाद्यदस्य
न प्रार्थनामाहतपद्मयोनिः ॥१२४॥

तस्मिन्न सन्तुष्टमनोविलासा
मनो न हासा मनुजेन्द्रकन्या ।
वयस्य यान्यस्य धराधिपस्य
समीपमानीय पुनर्न्यगादि ॥१२५॥

त्वया प्रतिज्ञे यमकारि किंवा
नालोकनीयोऽन्ययुवा मयेति ।
जातो न भेदप्रतियोगितानां
मया ततः खेदमिमं वहामि ॥१२६॥

तवाशयज्ञानमृतेऽप्यवोचं
वदामि चागो न ममास्तु भद्रे ।
पितुर्नियोगाद्गमनं यथा ते
तथानुराजं मम वर्णनञ्च ॥१२७॥

वाञ्छास्ति चेत्पश्य पुरोगतन्नृपं
मनोज्ञजानिर्जितकामरूपकम् ।
प्रकामरूपं भुवि कामरूपकं
स्त्रीकामरूपं प्रभजेदतः परम् ॥१२८॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पितुः पादाघातादसुररिपुवक्षःस्थलगृहं
विहायागाच्छक्रं तमपि मुनिशापेन विजहौ ।
गता पारावारश्चुलुकितममुं वीक्ष्य मुनिना
रमास्त्रस्ताश्चक्रे भुजयुगलमेतस्य निलयम् ॥१२९॥

हित्वा दैत्यरिपोरुरोभृगुपदामृष्टं गता वासवं
दुर्वासं[1] पृथुशाप[2]तापितममुं त्यक्त्वा निकेतार्थिनी ।
प्रापत्सिन्धुमिमञ्च वीक्ष्य मुनिना निश्शेषपीतं रमा
ब्रह्मण्यन्नपदाभिभूतमधुना राजानमेनं श्रिता ॥१३०॥

को[3]दण्डोद्गतचण्डकाण्डदलितप्रत्यर्थिमुण्डावली-
भ्राजत्ताण्डवपण्डिते नरपतावस्मिन्सदा गच्छति ।
युद्धक्षोण्यजिरङ्कुरालकुटिलव्यावृत्तपिङ्गेक्षणा
स्फीतसृङ्मदपाननिर्भररसा सम्मोदते कालिका ॥१३१॥

सोऽयं काण्डविखण्डितारिधरणीपालालिमुण्डोच्छलत्
प्राज्यास्रस्रुतिसिक्तसार्ध्दसमरक्षोणीसुवाटीतटे ?
क्षिप्रक्षिप्तकृपाणभिन्नगजराड्गण्डस्थमुक्तावली-
बीजं कीर्तिलताप्रतापनतये कालेवपत्योजसा ॥१३२॥

क्रन्दत्फेरुरटत्कफेरुनिपतद्गृद्धं द्रवत्कौणपं
नृत्यद्भूतगणं हसद्यमभटं कृत्वारिपूर्णं बलम् ।
प्रस्यातर्जितभानुवाडवबृहद्भानुः प्रतापोत्करः
त्रैलोक्यं तिमिरोज्झितं कलयितुश्चाकल्पमाकल्पते[4] ॥

---

१. 'दुर्वाससम्' इति वक्तव्ये 'दुर्वासम्' इत्यपि महाकविना निर्दिष्टम् तच्च मूलानुसन्धेयमेव ।

२. क. मा. 'लापित' इति पाठः ।

३. क. मा. 'कोदःस्को' इति पाठः ।

४. बीभत्सरसः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्थं सखीवाक्यविलोभिताऽपि
सा तत्र भूपे लुलुभे न विज्ञा ।
शौरिप्रभा केनचिदर्थिताऽपि
न जातु देवान्तरमभ्युपैति ॥१३४॥

तस्मिन् विरागामनुमाय भोज्यां
सा चेष्टयान्यन्नृपतिं प्रणिन्ये ।
आराधनीयप्रतिकूलकार्यं
कर्तुं न शक्नोत्यनुजीविवर्गः ॥१३५॥

प्रदर्श्य तामुत्कलभूमिजानिं
समुत्कलं वाक्यमिदं बभाषे ।
यथा तथा वास्तु नृपान्तरेऽस्मिन्
प्रसीद दृष्टिं वितर प्रसन्ना ॥१३६॥

निर्माय वक्त्रमदसीयमुदग्रकान्ति-
वेधा''' विधुरितं प्रभया विलोक्य ।
नास्य प्रयोजनमिति प्रतिपादयिष्यं-
श्चक्रे कलङ्कमिषतः पुनरुक्तचिह्नम् ॥१३७॥

एतन्मुखे प्रतिभटे प्रतिभोदितेन
द्वेधा विधुं विधुतवर्गमधश्चकार ।
अङ्कस्थरङ्कुमिषतोङ्कनमाविधाय
दोषाकरोयमिति यन्त्यधितासुखान्तः ॥१३८॥

अनर्घ्यसौन्दर्यलतैकशैल-
स्सैलः समायाति न रूपशैलीम् ।
न कामदेवो रिपुवामदेवो
दस्रौ न घस्रे शमुतावमुष्यः १३९॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भवन्तु तावच्छतशोऽपरेऽपि
धराधिपा योग्यतमास्यमुष्य ?
श्रीलस्तनस्थानमृते वनूना-
न्न युज्यते मौक्तिकचारुमाला ॥१४०॥

भागीरथीव भव मौलिविहारिरूपा
गाङ्गेयपीतकुचकुम्भयुगा विभासि ।
पौरस्त्यसिन्धुमिवनाथमिमं विधेहि
देवव्रतङ्कुरु कुलस्थितिकारणञ्च ॥१४१॥

एतत्कार्मुकतो गतः प्रतिदिशं यः कोऽपि वा मार्गणे
लक्ष्यं प्राप्य रसान्तरं प्रविशते नो मुञ्चते तत्फलम् ।
पर्वासाधनभज्यते भ्रमति वा नाशाविमूढो भुवि
धत्ते पक्षसमन्वितस्सरलतान्नैवापराध्यत्यपि ॥१४२॥

एतत्कीर्तिरसाभिलिप्ततनुकश्चामीकरोर्वीधरः
कैलासोदरसोदरस्य पदवीं सम्प्राप्नुयादेव हि ।
वैरिव्रातविशालवंशविपिनप्लोषोद्धतज्वालको
यद्येतत्प्रतपत्प्रतापहुतभुङ्नैवाभवीताखिलम् ॥१४३॥

इत्युत्कलाधीश्वरवर्त्मनोक्त्या
सखी बभाषे परिचारिकान्या ।
एतद्यशोभिः कनकाचलस्य
दुर्वर्णशैलत्वमकारि सत्यम् ॥१४४॥

चेटीगिरा सस्मितमाननाब्ज-
मुन्नीय वैदर्भनरेन्द्रकन्या ।
व्युदास्थदास्थाप्रविधूतदृष्ट्या
विलोक्य तं लोकविभूषणं सा ॥१४५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यशोलताजालनवालवालं
नेपालभूपालमवालशौर्यम् ।
नीताञ्जनीञ्जन्यजनैः सुशक्ति-
ञ्जगज्जयजस्य जगाद साऽली ॥१४६॥

दौत्यन्न कश्चित्कुरुते न काल-
व्यवस्थितिः कापि न चोपदास्ति ।
तथापि शैलीमभिसारिकाया
जयेन्दिरास्मिन् भजते सदैव ॥१४७॥

एतद्द्विषान्दुर्दिनकाल आगते
मूर्द्धोपहारोपदयातितोषिताम् ।
सञ्चारिका कीर्तिरमुष्यशिक्षिता
जयेन्दिरान्तामभिसारयत्यलम् ॥१४८॥

ज्याघातजातकिणमेष बिभर्ति…
बाहुद्वये भुजगराजसमानसारे ।
प्रत्यर्थिभूपतिहठाहृतराज्यलक्ष्मीः
सुश्यामलोलकवरीवलयाभभाजौ ॥१४९॥

दोर्दण्डमण्डलितकार्मुकमात्रमस्य
पश्यन्ति नैव शरसंहतिमोक्षयानम् ।
व्यालूनवैरिशिरसां स्रजमावहन्ति
युद्धक्षितिस्तदनुमापयते नराणाम् ॥१५०॥

उद्यद्भ्रूकुटिभीष्मभालफलकैर्दन्ताग्रदष्टाधरै-
र्व्यालोलायतलोहितेक्षणयुगैस्सन्निर्मितश्मश्रुभिः ।
त्विष्यत्कुण्डलमण्डितैः शरशतैरालूनकण्ठैर्द्विषा-
मेनस्याहवभूमिरास्तृततला संलक्ष्यते मूर्द्धभिः ॥१५१॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

मूलात्लूना कथमपि पुनः सोत्थिता चाप्यकाण्डे
प्राप्ता भङ्गं विनमितशिरस्स्वर्णभङ्गीपिशङ्गि ।
एतेनाजौ द्विरदशिशुना हेलयेवेक्षुयष्टिः
मन्दाक्रान्ता विसृजति रसान्नैकधा वैरिसेना ।।१५३।।

एनं श्रीनाथशर्वद्वयमतिमतुलाखर्वगर्वारिवर्गा-
ग्राहव्यूहाद्गजेन्द्राजरठकमठकाद्वं जयन्तीतरङ्गात् ।
कोदण्डामन्थदण्डात्सुतरलतरवय्याहिवक्षीरवार्द्धेः
सेवैते चन्द्रलक्ष्मौ निरवधिजलधिस्रग्धरायान्धरायाम् ।।

मधुभ्राम्यद्भृङ्गीमधुररवसम्पादितदिशि
विहन्तुश्चेद्ग्रीष्मे हिमशिखरिणीहासुवदने ।
वृणु द्विट्पद्मालीशिशिरमहसं सुन्दरहसन्
त्वमेनं भूपालं समुचितमनङ्गप्रतिकृतिम् ।।१५४।।

प्रालेयाचलपादकाननदरीरध्यस्य निर्यज्झरी-
राशिलष्य क्षितिपालमेनमुदितं शार्दूलविक्रीडितम् ।
पालीनां व्यजनानि लेपि विमुखी ग्रीष्मे प्रवालोत्तरे
तल्पे निर्विश कामकौतुककलानन्दं कलेशानने ।।१५५।।

इदन्नृपगुणोत्कराकलनकाल एवादरात्
समीपसमितार्जुनेदृशमुपादधे भूपजा ।
निजान्तिकसमागतस्त्रितमयान्यदास्था कृता
तिरस्कृतिकला भवेज्जगति कापि पृथ्वी नृणाम् ।।१५६।।

कनकजननभूपं प्राप्य सा क्षेममूर्ति
नरपतिमभिलिषे नेतरं राजपुत्री ।
विकशिनसहकारं माधवे मासि लब्ध्वा
तदितरतरुजाले मालिनीभूतसमत्का ।।१५७।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीमत्कूर्मधराधरेन्द्रवसति प्रख्यातपन्तान्वये
जातः श्रीभवदत्तपण्डितवरः श्रीभार्गवी तत्प्रिया।
तत्सूनोस्सुकृतेः कृतौ 'कविकुलालङ्कारचूडामणिः'
सर्गो द्वादशसंख्यको निरगमच्छ्रीकार्तवीर्योदये ॥१५८॥

इति श्रीसुकृतिदत्तविरचिते कार्तवीर्योदयमहाकाव्ये
स्वयंवरवर्णनन्नाम द्वादशः सर्गः' ॥

२. इति श्रीकिरातक्षत्रियकुलोत्पन्नस्य मेच्यञ्चलपाँचथरलालीखर्कघरडाडाग्रामवास्तव्यदोवालीछाचामलिङराईकुलोद्भूतस्य डा. स्वामिप्रपन्नाचार्यस्य कार्तवीर्योदयसम्पादने द्वादशसर्गस्य टिप्पणीपाठभेदादिकं समाप्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कार्तवीर्योदयमहाकाव्ये

त्रयोदशः सर्गः

चतुर्भुजचतुर्वक्त्रपञ्चवक्त्रादिसंयुतम् ।
प्रत्यूहपटलच्छेदिमहस्ताराभिधन्नुमः ॥१॥

अथार्जुनस्यान्तिकभूमिभागा-
न्तिरश्चलल्लोचनलीलयेष्टम् ।
संसूचयन्तीं कनकप्रभां ता-
मानिन्यिरे तत्र विमानवाहाः ॥२॥

तस्या बभाषे वदनारविन्द-
मासाद्य तत्सन्निधिमायताक्ष्याः ।
ऊर्जान्तिकं प्राप्य सुधांशुबिम्बं
यथाविमुक्तं मुदिरावलीभिः ॥३॥

अपाङ्गपर्य्यन्तमुपेत्य सस्पृहं
तस्यानिवृत्तन्नयनं त्रपावशात् ।
विलोकितुं यादववंशभूषणं
लीलान्दधौ गृह्यकखञ्जनस्थिताम् ॥४॥

सम्प्रेर्य्यमाणोत्कतया तदानी-
न्निरुध्यमानात्त्रपयाक्षिवृत्तिः ।
न प्रस्फुटेनापि मिमील तस्या-
स्सखीवचः श्रोतुमिवावतस्थे ॥५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विमायमेनामनुमायरक्तां
रक्ताङ्घ्रिभागाङ्कृतवीर्यसूनौ ।
ऊचे सखीचन्द्रकलङ्कमज्ञा
सविस्तरम्प्रद्रकलागिरोमू ? ।।६।।

चित्तं पुराणपुरुषस्य यमामनन्ति
यो विप्रराजपदवीमनुलंभितस्य ।
यो राजसूयमकृताकृतपूर्वमन्यै-
र्देवस्स राजति सुधामयरोचिरब्जे ।।७।।

तस्यान्वये प्रचुरराज ऋषौ प्रजातो
राजाययातिरुदभून्मृगयानुयातम् ।
यं भार्गवी प्रवृणुते स्म गृहानुयातः
शर्मिष्ठयापि च कृतो गुणमिष्टया यः ।।८।।

ताभ्यां सह त्रिदशनाथविहारदेशे
द्वीपेषु सप्तसु रसातलमध्यभागे ।
अव्याहतातुलगतिर्विहरन्यथेच्छं
कामोत्सवेन स निनाय समा अनेकाः ।।९।।

ईजेऽनुकल्पपरहितैरविकल्पवादैः
पर्याप्तदक्षिणतमैस्समहामखैश्च ।
साक्षात्स्थितामरवरेषु तदध्वरेषु
वह्निर्जघास मुदितो निजभागमात्रम् ।।१०।।

आदाय यौवनमयन्तनुजस्य भुञ्जैस्
तृप्तिञ्जगाम न यदा विषयेषु विद्वान् ।
ज्ञानासिना दृढतरानपि तान् विलूय्य-
रण्यङ्गतः पदमवाप परैर्दुरापम् ।।११।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तज्ज्येष्ठपुत्रयदुराजकुलप्रसूतो
राजाभवत्कनकभङ्गपिशङ्गकान्तिः ।
यज्ञोत्सवे कनकराशिसहस्रदाता
विक्रान्तविश्रुतयशाः कनकाभिधानः ॥१२॥

यस्मिन् प्रशासति भुवं व्यभिचारिवार्ता-
लङ्कार एव तम एव विरोधिराज्ञा ।
छेदः करस्य न तनौ विषये च दान-
मुद्दान्तहास्तिकमभून्न समृद्धवृन्दम् ॥१३॥

एकेन विक्रमपदेन विनैव याच्ञा
मानोन्नतेन बलिराजरमाविकृष्टा ।
सौकर्यमाश्रितवता द्विपदाम्वरेण
येनोदधारि निखिला वसुधाप्ययत्नात् ॥१४॥

तस्यात्मजः कृतिमतस्सुकृतैकगेहं
श्रीमान्कृताहितजयः कृतवीर्यनामा ।
यस्यावनीवलयजिरमुगतौ किराती
भूयः स्थिताः क्षितिभृतो विजिताः समीपे[1] ॥१५॥

स्वर्णाद्रिचन्दनधरान्तरभूमिभागं
यो ग्राममेकमिव निर्जितवान्मुखेन ।
यस्याध्वरागतपुरन्दरमुख्यदेवै-
र्नास्यारिनैकशरदन्निजलोकसौख्यम् ॥१६॥

प्रङ्गप्रोत्तुङ्गभासा प्रतिदिनमुदयत्कुन्तलोला सभाजा
व्यञ्जत्काञ्चीप्रकामा निहितसुषुमया चन्द्रिकासाम्यभाजा ।

---

१. क. मा. 'कै' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लोकेऽन्यस्मिन्निहापि प्रचलितकथया सार्वभौमार्हया च
नित्यं यस्सेव्यते स्म प्रचुरगुणखनिश्चारुकीर्त्या महिष्या ॥
योध्यास्तांभोधिकल्पां समकरनिलया भ्राजमानप्रवालां
सद्गुहां[1] वाहिनीनां शतमुखमिलितां शीलितां रत्नजातैः ।
चन्द्राश्रीभासमानामनुगतसुधर्मोल्लासितां श्रीमनोज्ञा-
वासं माहिष्मतीति त्रिभुवनविदितां राजधानीम्पुराणीम्[2] ॥
तस्याः प्रान्ते प्रवहति सरिन्नर्मदा कर्मदा च
ज्वालाबालावदनसदृशैः पङ्कजैश्छन्ननीरा ।
तीरारूढाभिनवलतिकाध्वान्तपुञ्जाद्यकुन्तां
यां सेवन्तेऽतरलसरलां मानवाश्चापि वन्याः ॥१९॥
तस्याः शीतांशुकरजनुषः स्पृष्टदृष्टामृतेन
मर्त्यः प्राप्यामृतपदमलन्नामृतं वाञ्छतीति ।
गङ्गां धृत्वा शिरसि गिरिशो नैव तुष्यत्पदं के
शङ्के पङ्के वसतिमकृत श्रेयसे निर्विशङ्के ॥२०॥
मन्दाक्रान्ता[3] तरुणहरिणौ तीरवानीरभूमौ
अम्भस्तृष्णाकुलगजकुलजत्यक्तदानेष्टगन्धा ।
प्रान्तप्रेङ्खच्चपलशफरीसागरिनाल्पपक्षिवृत्ति- (?)
स्फेनस्तोमस्मितयुतमुखीनर्मदानर्मदास्ताम् ॥२१॥
तस्यैषः क्षितिवासवस्य तनुजो दत्तोपदेशाच्चिरात्
आराध्यत्रिदशेशपूजितपदं प्राप्तो रमावल्लभम् ।
एनम्प्राहुरुदग्रदीर्घतपसो विष्णोः करावस्थितं
चक्रं शक्रसपत्नसूदनव (?) पुर्जातं धरागुप्तये ॥२२॥

---

१. क. मा. 'हा' इति पाठः ।
२. स्रग्धराजातिः ।
३. मन्दाक्रान्तावृत्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भ्राजन्तेऽस्य यशांसि शारदशशिप्रख्यानि भूमीतले
  शेषाशेषमुखैरनेकशरदावेषान्नपारायणम् ।
तेषां किङ्करवाणि वर्णनकलामत्यल्पवाणीपरं
  भूमीपान्तरवर्णनानि कल[1]खां सम्माजिवाचं स्विकाम् ।।

प्राप्या सोश्रुतिमातरं गुरुगृहे दान्तो वसञ्जगृहे
  शुश्रूषादिगुणान्वितो मितदिनैर्वेदानखेदानलम् ।
मन्ये वक्त्रचतुष्टये विहरणं सन्तुष्टये नाभवत्
  भारत्या द्रुहिणस्य चास्य वदनं तत्प्राप्य तुष्टिङ्गता ।।

वर्षाणां शतमास्तचैष तपसा तेनातितप्तास्सुराः
  कन्दर्पं ललनावसन्तसहितम्प्राहैषुरस्या श्रमे ।
निर्वातस्थलदीपदीप्तविलसद्विज्ञानतुष्टात्मनि
  क्षोणीभृत्तिलके च कामविशिखा नापेदिरे पौरुषम् ।।

सिद्धिर्बुद्धिमतां वरो विधिरथ प्रातिष्ठिपद्वञ्चितुं
  तारा तस्य गुणोत्करेण सहसा बद्धास्थितास्तत्र च ।
एतस्मिन्पुनरन्तरे कमलभूरागत्य सिद्धान्स्वयं
  दत्ते स्मातितपोबलेन विदुषे कामान्प्रकामम्मुदा[2] ।।

ततस्समावृत्य गृहागताय
  सुताय सम्पन्नमनोरथाय ।
समर्प्य राज्यश्रियमाप्ततोषो
  वनञ्जगामास्य पिता मुमुक्षुः ।।२७।।

ताते गते सुन्दरिते सपत्नीं
  भाव्यां श्रियं प्राप्य प्रजाः प्रकामम् ।

१. क. मा. 'लु' इति पाठः ।
२. शार्दूलजातिः ।

CC-0 Nepal Sanskrit Academy, Kathmandu Collection

संल्लालयन्नेव न मोदते स्म
त्वया विना मन्मथ चापपक्षा ।।२८।।

जिष्णुर्गिरीशो धनदः शुचिश्च
सदागतिः पुण्यजनः प्रचेताः ।
अष्टौ दिगीशा अपि चाप्यनष्ट-
सञ्ज्ञो यमाभाति समः प्रजानाम् ।।२९।।

यथेच्छमस्मै प्रददौ विधाता
रूपाणि शस्त्राणि दिगीश्वराणाम् ।
नरेन्द्रभूशक्रमुखाश्च शब्दा
वचस्त्वमुं वृत्तियुगेन विज्ञाः ।।३०।।

द्वीपां द्विपाधिपगतैः परिपातुमेष
सप्ताधिसप्तहयभा विधिनान्यदेशि ।
मेधातिथिप्रभृतयोऽतिथितां प्रयान्ति
प्राप्ते तिथौ बहुतिथा इदमाहवस्य ।।३१।।

द्वीपस्य चास्य परिपश्यसि राजपङ्क्ति
यामेति काञ्चिवलितं वलितो दरीह ।
सैषार्जुनस्य बलिबन्धनशौर्यभाजो
नित्यं बलिं कवलिताहवते भयेन ।।३२।।

सहस्रकरमोजसा भरिभवन्समितसङ्गतः-
... ... ।
भिनत्ति शतलक्षकं चलितमार्गणैराहवे
भिनत्ति शतलक्षकञ्चलितमार्गणैरेष च ।।३३।।

अव्याहता त्रिभुवनेऽपि गतिर्यतोऽस्य
वत्सा ततो ममदयद द्विजराजवक्त्रे ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रानन्दनन्दनवनेऽप्यवनीवनेऽपि
भोगिप्रभोगवति[1]भोगवतीतटेऽपि ॥३४॥

भावं बधानभविलं भव सावधाना
नानाजनापमयं स्वयमेव वेद ।
हार्दं त्वदीयमभिलक्ष्य विहाय लक्ष्यं
वर्य्योदयार्द्रहृदयो भवति क्षितीशः ॥३५॥

युद्धेऽमुना कुलि[2]शपाणिज[3]यिष्णुवीर्य्ये
सन्दानिते मधुरवाणिधवे स्वकीये ।
मन्दोदरीपरिचलत्कबरीभरेण
सम्मार्ज्जयिष्यति पदे तव भर्तृमुवर्त्यै ॥३६॥

भद्रेऽपराध्यति सिते यदुनन्दनेन
युद्धाजिरे रुचिरगा त्रिदशानने सा ।
त्वत्केशपाशमभिकल्पसखीसमा सं-
स्कर्तामहेन्द्रमहिलामरलोकमाल्यैः ॥३७॥

नैतस्य वर्णनमिदं वरवर्णिनीह
सामस्त्यतो गुणनिकापि गुणस्य नैव ।
भूतार्थकीर्तनमिदं हि यथापनीष-
न्नैतस्य भान्ति चरितानि वचस्सु नृणाम् ॥३८॥

कथाप्रसङ्गेन सखीजनास्या-
द्यन्नाम श्रुत्वोत्कतरासु दीर्घम् ।
निश्श्वाससमामुक्तवती पुरा त्वं
सोऽयं पुरो राजति राजवर्य्यः ॥३९॥

---

१. क. मा. 'स' इत्यधिकः पाठः ।

२. कुलिशः वज्रः पाणौ यस्य स कुलिशपाणि इन्दुः ।

३. क. मा. '[illegible]' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अप्राप्य पञ्चन्दिरचारुपादा-
स्तवाभवन्भानुमयूखकल्पाः ।
इत्वयं पुरस्ते विलसन्करोतु
पीयूषवृष्टेः परिपुष्टिमक्ष्णोः ॥४०॥

भागीरथीशम्भुजटावरुद्धा
कियद्दिनन्मार्गवशादुपेतम् ।
नानाजनस्थानमहीधरौघं
विलङ्घ्य रत्नाकरमागतासि ॥४१॥

अलं ह्रिया बन्धुरगात्रयष्टिः
प्रोष्ठीविलासेन विलोचनेन ।
विलोक्य भूलोकमहेन्द्रमेनं
वृणीष्व पद्मेव पयोधिशय्यम् ॥४२॥

इत्थं सखीरितवचः प्रतिपद्य सद्यः
प्रोत्फुल्लपुष्करपलाशविलासभाजा ।
दृष्ट्या त्रपां समवधूय कथञ्चिदेवा
कन्न्या दिदृक्षितवती कनकान्वयन्तम् ॥४३॥

तस्याः प्रियास्य सविधं प्रचलन्कटाक्षो
मार्गेऽर्जुनस्य च दृशा मिलितोदयासीत् ।
तद्भावितन्मिथुनपञ्चशरोत्सवेषु
संसूचनामकृत किं विपरीतकेलेः ॥४४॥

तस्याः प्रियास्यं प्रतिप्रस्थितायाः-
स्त्रपान्तरायेण निवर्तितायाः ।
प्रोत्साहितायाः स्मरमन्त्रिणा च
दृशो विलासा विविधा अभूवन् ॥४५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निर्वर्त्य निर्वर्त्य निरोधकर्त्री-
स्त्रपा सखीं कामभटः कथञ्चित् ।
निस्साध्य तस्याः पुनरागमाय
प्रस्थापयामास दृशं प्रियास्ये ॥४६॥

प्रियास्य चन्द्रार्चितचारुचन्द्रिका-
श्चक्षुश्चकोरेण चलाचलेन सा ।
निपीय रोमाञ्चकुलाङ्कुलच्छलाद्-
बभार भारोदयमुत्थितं हृदि ॥४७॥

तच्चारुदृष्टिशफरी प्रविगाह्य कामं
सौन्दर्यसारसरसि प्रियवक्त्रबिम्बे ।
सञ्जातशैत्यभरजाड्यमिवाप सद्यो
ह्रीयन्त्रणा मुकुलितत्वमथ क्षणेन ॥४८॥

रोमाञ्चकञ्चुकित[1]मञ्जुलगात्रयष्टेः
प्रस्वेदबिन्दुकितपाणिपयोजमध्ये ।
तस्यास्सखी विनिदधेऽवसरस्य विज्ञा
भ्राम्यन्मधुव्रतवधूकमधूकमालाम् ॥४९॥

सुरभिसमयलक्ष्मीश्चारुमन्दारपोते
गिरमिव मधुमाद्यत्षट्पदानां मनोज्ञाम् ।
कथमपि चलिताभ्यां व्रीड[2]यासौ भुजाभ्याम्
अधिगलमथ मालामर्जुनस्य न्यधत्त[3] ॥५०॥

तदनुसुरविमुक्ता पुष्पवृष्टिः पपात
क्षितिपतिशिरसि द्राक्सौर[4]भामोदिताशा ।

---

१. क. मा. 'त' नास्ति ।

२. क. मा. 'द्व' इति पाठः ।

३. मालिनीजातिः ।

४. क. मा. 'क्षौ' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जगुरमरपुरन्ध्यो नर्तिषुर्मेनकाद्याः
तुतुषुरखिललोका दध्वनुर्भूरिभेर्य्यः ॥५१॥

उरसि समधिरूढां श्लिष्टकण्ठां स्रवन्तीं
मधुरमधुमधूकाबद्धमालान्दधानः ।
शयनमिलितकान्ताकल्पितं वैपरीत्यं
कुसुमविशिखकेलावस्मरद्विस्मृतं सः ॥५२॥

अभिनवदलदूर्वावर्गसंसर्गसौम्या-
मधुविकचमधूकस्रग्बभौ सा तदानीम् ।
सुचिरसपरिपृक्ता कीर्तिमालेव तस्याः
कुसुमविशिखशिल्पादाहिता तस्य वत्से ॥५३॥

समन्तादुत्तालैर्जयजयरवैस्साधुवचनैः
नृपाणामन्येषां श्रवणपटले क्लिश्यति मुहुः ।
स्वसारं तां युक्तामभिमतवरेण प्रमुदितः
गृहं क्षेमाश्रित्ये परिणयकृते भूपतिसुतः[1] ॥५४॥

श्रीमत्कूर्मधराधरेन्द्रवसति प्रख्यातसन्तानवये
जातश्रीभवदत्तपण्डितवरः श्रीभार्गवी तत्प्रिया ।
तत्सूनोस्सुकृतेस्त्रयोदशतया गण्योऽगमत्सर्गकः
काव्येऽस्मिन् कृतवीर्यसूनुचरिते मन्दारमालानुजे ॥५५॥

इति श्रीसुकृतिदत्तविरचिते कार्तवीर्योदयमहाकाव्ये
कार्तवीर्य्योदयवर्णनन्नाम त्रयोदशः सर्गः[2] ॥

---

१. शिखरिणीजातिः ।

२. इति श्रीकिरातक्षत्रियकुलोत्पन्नस्य मेच्यञ्चलपाँचथरलालीखर्क-बरुडाडाग्रामवास्तव्यदोवालीछाचामलिङराईकुलोद्भूतस्य डा. स्वामिप्रपन्नाचार्यस्य कार्तवीर्योदयसम्पादने त्रयोदशसर्गस्य टिप्पणीपाठभेदादिकं समाप्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कार्तवीर्योदयमहाकाव्ये

चतुर्दशः सर्गः

तारिणीपदपयोजमुज्ज्वलं
सेव्यमानमनिशं शिवादिभिः ।
दुस्तरादुरितवारिराशित-
स्तारकं भवतु नः स्मृतं हृदि ॥१॥

अथ व्रजन् राजपथेन राजा
श्वश्वा शचीवान्वितचन्द्रबाहुः ।
विलोकयामास विशेषशोभां
विदर्भभूमीपतिराजधानीम् ॥२॥

प्रत्यालयं पूर्णघटाभिराम-
द्वारप्रदेशोल्लसदीक्षुदण्डाम् ।
गन्धोदकासिक्तविशालशाला-
मुत्सञ्जिताभ्रङ्कषकेतुमालाम् ॥३॥

तयोर्दिदृक्षा कुतुकागतानां
पुराङ्गनानान्नयनैश्च वक्त्रैः ।
प्रफुल्लनीलोत्पलपुण्डरीक-
कासारनीकाशगवाक्षजालाम् ॥४॥

अकृत्रिमाभेषु च कृत्रिमेषु
पदार्थसार्थेषु कृतप्रतीत्या ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कथोत्सुकान्देश्यजनान्विमुग्धा-[1]
नुच्चैर्हसत्पेशलनागरौघाम् ॥५॥

विवाहशोभाकरसंविधाभि-
र्विकाशिताम्पुण्यसुशीलयुक्ताम् ।
श्रियाः सखीभिर्वनिताभिरिद्धा-
म्भूमिष्ठवैकुण्ठपुरीमिवान्याम्[2] ॥६॥

वधूवरालोकनसत्वराणा-
ङ्गवाक्षभूमिं सहसाऽऽयतीनाम् ।
पुराङ्गनानां विधुतान्यकृत्या-
श्चेष्टा बभूवुर्विविधास्तदानीम् ॥७॥

आदर्शमाधाय कराम्बुजाते
सिन्दूरबिन्दू दधती ललाटे ।
काचिद्दिदृक्षावशगा मृगाक्षी
तथैव वातायनभूमिमापत् ॥८॥

संस्कारलग्ना कवरीभरस्य
सखीकरेणायतपक्ष्मलाक्षी ।
आछिद्यतं स्कन्धतले वहन्ती
सोत्सेधसौधस्थलमापदन्या ॥९॥

विशालशाटीं परिधाय तूर्णं
प्रावारमग्रे[3] परिधातुकामा ।

१. क. मा. 'गु' नास्ति ।
२. पञ्चभिरादिक्रियाकुलकम् ।
३. क. मा. 'ग्यू' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हस्ते निधायैव तमाजगाम[1]
  त्वरापरालोकनमार्गमन्या ॥१०॥
आसञ्ज्य मञ्जीरमनघ्यमद्धा
  वासञ्जयन्तीमपरश्च तञ्च ।
सखीं विधूयाश्रु विधूयमास्या (?)
  जालान्तिकं प्राप तदान्यबाला ॥११॥
ग्रैवेयकासञ्जनतत्पराया
  उद्ग्रीविकोत्थानवती पुरन्ध्री ।
सख्याः करौ साभरणौ चिराय
  तयोर्दिदृक्षा रसतश्चकार ॥१२॥
आभोक्तुकामा विमले गलेऽन्या
  मुक्तालतान्मौक्तिकगौरगात्री ।
हस्तेन धृत्वैव जया[2]न्वितेन
  तदा तदालोकनमार्गमार्गात् ॥१३॥
अपूर्वकौतूहलचुम्बिचेता-
  स्तद्दर्शने दर्शनयोग्यरूपा ।
एकत्र गण्डे कृतपत्रलेखा
  वेषार्द्धशेषैव पराजगाम ॥१४॥
त्विष्यद्भिरासां वदनैर्विभाता
  जालावतीप्रोन्नतसौधसंस्था ।
तदोपमीयेत यदाभ्रवीथी
  भवेत्सहस्रेन्दुविराजमाना ॥१५॥

---

१. क. मा. 'तमात्तगाम' इति पाठः ।
२. क. मा. 'मा' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अयं युवा मन्मथनव्यदेहो
रतिर्नवीना कनकप्रभेयम् ।
वियोज्य संयोजनमाशु तेने
धाताद्य शृङ्गाररसस्य पुष्पे ।।१६।।

अर्द्धाङ्गदाम्पत्यविरागभाजौ
गौरीगिरीशाविमकौ प्रजातौ ।
न चेत्कथं कामरती जयिष्णू
लीलाविलासेन तनू प्रधत्त ।।१७।।

सत्यं वरोऽयं पुरुषोत्तमोऽस्ति
राजानुजा पद्मकरा रमेयम् ।
ऐश्वर्यवृद्ध्यर्थमिदं बुधानां
संयोजनं कल्पितमेनयोश्च ।।१८।।

यथा तथा वा मनसो पथासौ
कथा यथा जातजनस्य किन्नु ।
एनङ्गते यं प्रतिभाति गङ्गा
प्रेम्णागता दक्षिणसिन्धुराजम् ।।१९।।

विशेषविज्ञानविधानभूतौ
वधूवरौ द्वावपि नूनमेतौ ।
नोचेदपत्यानि नराधिपानां
विहाय भूयांसि कथं मिलेताम् ।।२०।।

एतद्द्वयीसृष्टिविधानविज्ञ-
स्साधारणो नैव विधिर्यदस्य ।
सृष्टौ प्रतिद्वन्द्विपदार्थमस्या
नालोचयामः शृणुमो न कान्त्या ।।२१।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अहो किमस्माभिरकार्य्यगण्यं
पुण्यं पुराजन्मनि येन जातम् ।
वधूवरालोकनमेतदेत-
द्भूवान्तरस्याप्यतिसौख्यदायि ॥२२॥

पवित्रितं वंशयुगञ्च जन्या
लोकत्रयं सच्चरितैर्युगेन ।
चक्षुःसहस्रञ्च विलोकनाना-
मनेन कान्त्या कृतलोकशान्त्या ॥२३॥

नादर्शि येषान्नयनैस्स्वरूप-
न्नाकर्णि कर्णैश्च चरित्रजातम् ।
एतद्युगस्येषदपीह तेषां
किन्तैर्मुधा वक्त्रसरोजभारैः ॥२४॥

पौराङ्गनानां वचनान्यमूनि
शृण्वन् वरः कर्णसुधा न भाति ।
वध्वा सममभोजनरेन्द्रसौधं
सम्प्राप माङ्गल्यविधान[1]पूर्णम् ॥२५॥

भोज्याविधूता धरणीभुजोऽन्ये
स्वयंवरादायति भव्यकृत्यम् ।
विचारयन्तो मिलितास्तदानी-
मुत्तस्थुरीर्ष्याकलुषैर्मनोभिः ॥२६॥

तेऽन्योन्यमासाद्य निवेशयाता
व्यत्यस्तचित्रा विधिवाञ्छितेन ।

१. क. मा. 'विघात' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अमन्त्रयन्नर्जुनमार्गरोध-
म्भोज्याम्भुजिष्या[1]मिव भोक्तुकामाः ॥२७॥
प्रस्थानवाञ्छा अपि ते तदानीं
वैदर्भसौजन्यनिमन्त्रणाभ्याम् ।
अन्तस्स्थिरे कोशगतासिकल्पा
बहिः प्रसत्याऽवसरप्रतीक्षाः ॥२८॥

माहिष्मतीशोऽपररात्रभागे
मौहूर्तिकादिष्टविवाहवेलाम् ।
प्रतीक्षमाणस्स्वजनैश्च जन्यै-
रुद्वाहयज्ञक्षितिमाससाद ॥२९॥

विध्युक्तपूर्वाङ्गविधिं विधाय
विधातृकल्पेन पुरोधसासौ ।
विदर्भभूमिपतिरर्हणार्थं
वरस्य तस्याथ ययौ विनीतः ॥३०॥

प्रत्युप्तरत्नद्युतिराजि राज-
सिंहासने न्यस्य नरेन्द्रसिंहम् ।
तं ग्राहयामास यथोक्तमर्घ्यं
कन्यापितासौ मधु[2]पर्कमेवम् ॥३१॥

महाधनानाहतवस्त्रयुग्मं
सम्बन्धिदत्तं परिधाय रेजे ।

---

१. क. मा. 'व्य' इति पाठ ।

२. पयोदधिमधुघृतसम्मिश्रणान्मधुपर्को भवति । तच्च विशिष्टातिथेयं कल्प्यते । न तु आमिषादिपरिकल्पनं युक्तम् । आम्नायमानविरहात् । 'मधुपर्कं दधिमधुघृतमपिहितं कांस्ये कांस्येन' (पा. गृ. सू. १।३।५) 'मधुपर्कं कांस्यपात्रस्थं दधिमधुघृतं कांस्यपात्रेणाच्छादितम्' (हरिहरभाष्यम् १।३।५)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गङ्गातरङ्गद्वयसम्परीतो
रत्नाचलप्रस्थ इवार्जुनोऽसौ ॥३२॥

व्यालोलहारावलिवल्गुकण्ठो
रत्नप्रभाभासुरतुङ्गमौलिः ।
सद्राजहंसाङ्कदुकूलधारी
वरस्तदा सातिशयं विरेजे ॥३३॥

शुद्धान्तनारीनयनैकलक्ष्यं
वृत्वापतित्वेन तमात्मजायाः ।
संवेशयामास सजन्यवर्गं
कृताशनन्नूत्नविशालसौधे ॥३४॥

भ्राता कनीयान्कनकप्रभाया॰
प्रभासिभि॰ पौरजनै॰ परीतः ।
जन्योपहासार्थमथाजगाम
तदेव सौधं महितं महोभिः ॥३५॥

बहिः शिलालेपनपीतवर्णा-
मन्तःश्रवद्गैरिकचूर्णरागाम् ।
प्रवालताम्बूलपुटीं विनीत॰
कश्चिद्ददौ जन्यजनाय पौरः ॥३६॥

ध[1]रोऽपरो धूर्त्तरसे विभाव्य
कस्तूरिकासौरभवासितानि ।
उद्वेगखण्डानि ददज्जनेभ्य-
स्समस्तमुद्वेगमलं ददौ च ॥३७॥

---

१. क, मा. 'धू' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

किं रोचते ते वद मातुलानी
　किम्मातुलो वेति मुहुर्नियुक्तः ।
मुग्धो वदज्जन्यजनो द्वयम्मेऽ-
　भिरोचते किन्नु तदस्ति दूरे ॥३८॥

सुधासमं शर्करयान्वितञ्च
　रम्यं दधीदन्नमृषाऽऽशु भुङ्क्ष्व ।
इतीरयन्नागरकस्तदत्त्
　श्चक्रे रसज्ञोषणभेदमात्रम् ॥३९॥

कश्चिद्द्विजं काञ्चनकोशविष्टरे
　स्वैरन्निवेश्योपजहास पौरकः ।
कुशासने यन्निरतस्समेखलो-
　ऽक्षमालयोदीर्णकरस्तथेति ॥४०॥

प्रजा रजो वो विषये प्रमुख्यतां
　प्रयाति किन्नेति वधो नियोजितः ।
नाजा रजो वो विषये प्रमुख्यतां
　प्रायाति किन्नेति जगाद जन्यकः ॥४१॥

यौष्माकदेशे वय एव सर्वे
　वाञ्छन्ति किंवार्जुनमेव नूत्नम् ।
इतीरितो जन्यबुधोपवादीन्
　मन्ये वयोनश्च विदर्भयोगे ॥४२॥

प्राप्नोसि नाके न पुरं समानं
　दिष्ट्येति जन्यः परिदृश्य[1]मानः ।

---

१. क. मा. 'स्य' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्राप्नोसिनाऽनेन पुरं त्वदीय-
मितीरयन्दर्शयते स्म खड्गम् ॥४३॥

प्रलापयस्त्वं कृपणानसेव ?
आहेति पृष्टो वरपक्षविद्वान् ।
प्रापामराजाधिपतुल्यबुद्ध्या
वामाविलासात्मभृतावकल्पान् ॥४४॥

गतस्य गेहं तव जन्यकान्ता
रतिस्मृतिं सन्तनुतान्पुरेव ।
इतीरितोऽसौ पुरजम्बभाषे
कान्तारतान्ते सदनञ्च धत्ताम् ॥४५॥

मेषो वृषो वावबलग्नकं कि-
ञ्ज्योतिर्विदेवं परिपृष्ट ऊचे ।
द्वयं त्वमेवासि न वेत्सि किं स्व-
मलग्नकान्वेषणमत्र युक्तम् ॥४६॥

कवेस्सुरासेवनमर्हमेनम्प्रा-
स्यन्यजश्चेति कविः प्रलब्धः ।
प्रवेस्तृणासेवनमर्हमास्तां
कवेस्सुरासेवनमर्हमूचे ॥४७॥

इदं पुरं कीदृगिहातिभाग्या-
त्समागतस्त्वं क इति ब्रुवन्तम् ।
द्विपात्पुरश्चेदमनुप्रविष्टो
हंसोऽहमित्थन्निपुणो बभाण ॥४८॥

प्रभूतभूतप्रियताप्रिया ते
तच्चिह्नया काठर्यमिदं प्रतीमः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्यक्षिपोऽक्षेप्यवलोपयुक्तं
लब्धा पतिं त्वां विजहातु दुःखम् ।।४९।।

प्रहेलिकाक्षेपवचो विलासै-
र्वक्रोक्तिभेदैर्वरगूह्यसङ्गम् ।
अचिक्षिपुः पौरजना विदग्धा-
स्सोऽप्याक्षिपत्तान्प्रतिभाबलेन ।।५०।।

अत्रान्तरे मातृमहाः कुमारीं
शुद्धान्तभूमिं समधिश्रयन्तीम् ।
विभूषितामप्यतिहृद्यभासा
व्यभूषयद्बाह्यपदार्थसार्थैः ।।५१।।

तत्केशपाशो विहितो भवान्या
नानामणिप्रोतविभूषणेन ।
सुरेन्द्रचापेन यथावभासे
वाय्वीरितो वार्षिकमेघखण्डः ।।५२।।

मत्तोऽसि सौभाग्यविशेषभोगा-
लिपीकृतास्या विधिना नवेति ।
दिदृक्षयेवं तदलीकभागे
ललाटिकां साधु शची बबन्ध ।।५३।।

नव्यश्रुतेः कर्तुरहर्गणेशा-
च्छ्रुतप्रभावा श्रुतियुग्मकेन ।
सावित्रिका तच्छ्रुतिगं व्यधत्त
वज्रप्रभाभासुरतालपत्रम् ।।५४।।

ललन्तिका चारुगले ललास
कुमारपत्या निहिता कुमार्याः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भर्तुः करावस्थितपाञ्चजन्ये
न्यस्ताश्रिया पङ्कजमालिकेव ।।५५।।

पद्मास्वपद्माहृतगुत्सगुच्छ-
मत्यच्छमस्यान्यधिता सुकण्ठे ।
बभ्राज सा तेन सुधांशुवक्त्रा
नक्षत्रवृन्देन शरन्निशेव ।।५६।।

कथञ्चिदालक्ष्य कटिप्रदेशे
काञ्चीकलापं कलयाञ्चकार ।
तनूनपातो दयिता तदस्य
विस्पष्टमाह स्मरघोषणीयम् ।।५७।।

सखीजनासञ्जितमञ्जुशिञ्ज-
न्मञ्जीरखञ्जीकृतहंसरावा ।
सा हंसकौपादयुगेन्यधत्त
व्यधत्त चात्राम्बुजबुद्धिदार्घम् ।।५८।।

जयाचलन्मीनजयातिदक्षे
नेत्रे तदीये समनक्तमध्या ।
दिग्धेषु योगान्मदनो विजेतु-
न्माहिष्मतीशं प्रभवेदितीव ।।५९।।

सिन्दूरबिन्दुर्विजयार्पितोऽस्या
विभूषयामास मुखारविन्दम् ।
भालार्द्धचन्द्रस्य समग्रणाय
समागतस्सौर इवांशुखण्डः ।।६०।।

एवं सखीमातृगणेन साधु
प्रसाधिता सा सुतरां दिदीपे ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रागेव हृद्येन्दुकला शिवस्यो-
त्तमाङ्गसङ्गा किमु वर्णनीया ॥६१॥

अथ प्रशस्तेऽभ्युदिते मुहूर्ते
हस्तेऽभिशस्ते गलहस्तिते च ।
प्राकारयामास पुरोहितेन
भोजोऽर्ज्जुनं दारसुतादियुक्तः ॥६२॥

श्रुतिस्मृतिप्रोक्तविधानविज्ञः
स्मरन्विधातुर्वचनं सुतोक्तम् ।
ददौ स तस्मै पुरुषोत्तमाय
पद्मां स्वसद्मोद्भवमात्रभिन्नम् ॥६३॥

भोजार्पितञ्चारुवधूकराब्जं
गृह्णन्स दक्षेण करेण रेजे ।
स्पृशन् प्रवालेन वसन्तनीतं
वासन्तिकापुष्पमिवाम्रखोतः ॥६४॥

प्रत्यग्ररोमाञ्चितकण्टकेद्धा
भुजाग्रनालं शनकैः स्पृशन्सः ।
वधूशयातास्रकुशेशयं प्र-
स्वेदार्द्रमामोदत राजहंसः ॥६५॥

करेण लाक्षारससोदरेण
काले रसाभोगकरेण कल्पे ।
सा पद्मिनीस्पृष्टतनूर्बभूव
प्रभाकरेण स्फुटपङ्कजास्या ॥६६॥

चित्तञ्च ... तञ्चिरसम्भृतञ्च
समर्पणीयञ्जगदीश्वराय ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एवं विदन् कुण्डिननाकनाथ-
स्तद्यौतकत्वेन ददौ तदानीम् ॥६७॥

वधूवरद्वन्द्वमिदं प्रदत्तं
विदर्भराजेन युगं प्रसन्नम् ।
अभूरिकालेन विमोचनाय
देयस्य दातुश्च समन्वगृह्णात् ॥६८॥

प्रतीक्षते स्मान्वहमेव यस्य
सिध्यष्टकं प्रेमकटाक्षपातम् ।
वधूवरद्वन्द्वमिदं सुदायं
विदर्भराजानुजिघृक्षयादात् ॥६९॥

गावो गजा वाजिगणाश्चदासी-
दासं सुवर्णं मणिवस्त्रजातम् ।
पृथ्वी च पृथ्वीरमणीकृतंत-
द्विदर्भराजेन नशक्यसंख्यम् ॥७०॥

पत्न्या नवीनं विरचय्य नाम
गौर्य्यादिनामानि पृणन्स ताभिः ।
कृतप्रसादो वनितासमेत-
स्ततो बहिर्यागभुवं प्रपेदे ॥७१॥

पुरोधसा गौतमनन्दनेन
सन्तर्पितं योजकनाम वह्निम् ।
निषेदतुस्तौ विधिना प्रणम्य
समीपदेशेऽस्य तदाज्ञयैव ॥७२॥

गौर्य्यादिबद्धाञ्चलचेलयुग्मं
युग्मत्तदस्पत्तिकगम्बभासे ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मेरोस्सनीदन्नियतिप्रबद्ध-
स्स्वल्पंशसन्ध्यं रजनीदिनं वा ॥७३॥

वधूवराक्षीणि परस्परास्य-
शोभासरोऽन्तर्विनिमज्य गाढम् ।
कथञ्चिदुत्तीर्य विधेर्नियोगा-
त्प्रापेदिरे व्रीडकृतातिजाड्यम् ॥७४॥

प्रदक्षिणं विक्रममाण एव
वध्वाग्निमध्यन्मखभूमिभागम् ।
जयश्रिया दीप्तसुमेरुमध्यं
काम्यन्निवोर्विवलयं विरेजे ॥७५॥

गुरुप्रमोदो हृतचारुजिह्वे
प्रसन्नकान्तावथ वीतिहोत्रे ।
पुरोहितश्चोत्तरकालयोग्या-
द्विधेर्विधानाज्जुहुवाञ्चकार ॥७६॥

पुरोधसासौ शमिजानियुक्तया
शमीपलाशैः समिता व्यमिद्धे ।
आत्रार्थितानञ्जलिनाशुलाजां-
स्तत्याज गत्या जयिनीकरेणोः ॥७७॥

स्वयम्प्रदत्ताञ्जनकाविभिश्च
तां खञ्ज[1]नोत्सेकविभञ्जनाक्षीम् ।
प्रदक्षिणज्वालकरं प्रसार्य्य
मुमोदतोऽग्निश्च ददेऽर्जुनाय ॥७८॥

---

१ क. मा. 'खज' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वरस्य तस्याः शिरसि प्रणम्य
स्थितः करो राजतराजपुत्र्याः ।
सुधर्मजासङ्गितरङ्गभङ्गि-
स्थितं यथा रक्तपयोजगुच्छम् ॥७९॥

सरोजकोशाभमुरोजमाप्ता
तस्या उरः स्पर्शनिदेशिमन्त्रम् ।
विचारयामास विशेषविज्ञो
यथार्थतस्स्वार्थपरत्वमेव ॥८०॥

स्थिराभवास्येव पदान्वितेन
मन्त्रेण भर्त्राऽभिनिधीयमाना ।
आकल्पमद्य ध्रुवशैलशैली-
शिक्षापरं सा विधिमन्वमंस्त ॥८१॥

क्व कल्पवाताहतितूलतुल्याः
शैलाः क्व धातुर्वयसाप्यचाल्यम् ।
पतिव्रतानाञ्चरितं तथापि
न चोदनाचोद्य सहाञ्च[1]तीनाम् ॥८२॥

आचारतः प्राप्तमिमौ सुगव्यं
सक्षौद्रमक्षुद्रगुणौ सहात्ताम् ।
स्मरन्ति चोद्वाहविधौ हि सन्धिं
स्त्रीपुंसयोरार्षविचारविज्ञाः ॥८३॥

विलोकयेति ध्रुवमीरिता सा
भर्त्रा सुरुच्या प्रहितीकृतं ताम् ।

---

१. क, मा. 'श्च' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परं दृशानुत्तमसोदरञ्च
प्रैक्षिष्ट चिरेण न तद्गतेन ॥८४॥

अङ्गुष्ठमादाय पदो वरेण
नीतोत्तरे सप्तपदानि बाला ।
सप्ताङ्गराज्यं तव पादपद्मा-
क्रान्तं ममेति स्फुटसूचितेव ॥८५॥

पूर्णाहुतिप्रीतकृशानुहेति
स्पर्शोद्गता लोहितकेशरी तौ ।
उत्तुङ्गसिंहासनमाश्रयन्तौ
स्वीचक्रतुस्सेचनचित्रकादि: ॥८६॥

पुरोधसाऽन्यैर्विबुधैर्विदर्भ-
क्षोणीभुजा बन्धुमता सतीभिः ।
आशीर्वचोभिस्सहसम्प्रयुक्तां
तौ जगृहाते तिलकक्रियान्द्वौ ॥८७॥

यज्ञावसाने जनकेन बद्धा
वरेण चास्पर्शितया द्विजेभ्यः ।
यथा ह्यमन्यन्त तृणाय लक्ष्म्या
ते राजराजञ्च सुराधिराजम् ॥८८॥

निरन्तरायं दुहितुर्विवाह-
मित्थं समाप्याथ विदर्भराजः ।
जन्याञ्जनान्भोजयितुन्प्रविक्ष-
द्वेश्यान्नृपानर्चयितुञ्च भृत्यान् ॥८९॥

आनिन्यिरे जन्यजना विशाला
महारसालामथ सूदवर्गैः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तारुण्यघस्त्रं विषयप्रभोग-
भूमिं यथा कान्ततरां युवानः ॥६०॥

शाल्योदनं मोदनमिन्द्रियाणां
रूपं घृतस्क्र[1]त्यनुरूपरूपम् ।
रामाकरोद्वर्तितमुग्धदुग्धं
शाकं सुपाकञ्च जजक्षुरेते ॥६१॥

सार्व्वरसमान्तं सम्यरिसर्पिमांसं
सुधाधिकन्दाधिकमाधिहारि ।
तक्रयञ्च नव्यन्नवनीतमेते
विनीतनीतं समितं समाश्नन् ॥६२॥

बालाकरालोलितलौल्यकारि-
तुलाय जायादधिसम्प्रणीताम् ।
प्रास्वादमास्वादमिमे रसाला
रसालसां दृष्टिमभिप्रपन्नाः ॥६३॥

घृतैकपूरे कमलस्य कूरे
सुधांशुगौरे हृदयैकचौरे ।
ते भुक्तिनस्ते मनजे मनेन
स्वच्छन्दमामोदमविन्दताद्धा ॥६४॥

अबालबालाच्च सपत्नजाया
पयस्सरस्तीरमुपेत्य केचित् ।
सिताचलच्छायवृतं सुखेन
भुजिक्रियां मिष्टतरां प्रचक्रुः ॥६५॥

---

१. क. मा. 'क्र' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

घृतस्य दध्नो मधुनश्च कुल्या
तुल्या नदीभिः प्रतिरोधहीनाः ।
प्राभारवाहं वरसभ्यवर्ग
आपायमापायमलन्ननन्द ॥९६॥

अर्कातपे वत्सरसाधितेन
तैलोकटौ साधुनिमज्जितेन ।
सुरीसुपीतिं भजता च सन्धा-
नेनोपदंशान्त्यघसन्पुनस्ते ॥९७॥

विहाय वैहायसदुर्लभन्तत्
पथस्थलोडूकगणन्नवीनम् ।
आकन्दरं भङ्कुतिचिन्नराणां
साधारणीवस्तुषु नैव वाञ्छा ॥९८॥

केचिद्धूटित्रे क्वथिते च केचि-
त्सन्धानिते केचन केऽपि मार्गे ।
मात्स्ये परे छागलकेऽपि मैषे
स रेमिरे ते तरले यथेच्छम् ॥९९॥

एवं पुरोजन्यजनाश्च पौरा-
स्ते भोजयित्वा विविधान्नजातैः ।
देश्यान्नृपानार्चिषुरच्छरत्नै-
र्भोजोपदिष्टा मनुजा विशिष्टाः ॥१००॥

युद्धाशयादेश्य नृपेषु भोजं
सम्मान्यमार्गं स्वकमाश्रयत्सु ।
माहिष्मतीशः प्रियया समेतः
प्राप्तप्रमोदः श्वशुरात्प्रतस्थे ॥१०१॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विजित्य सर्वान्नृपतीन्स मार्गे
महासुजालेन महानुभावः।
कृपाप्रदत्ता सुमहीतलैस्तै-
रनाहुतः स्वां पुरमाप जिष्णुः ॥१०२॥

अध्यास्य तामुत्तमराजधानी-
न्दिनैः कियद्भिश्च विसृज्य भूपान्।
तया श्रिया नन्दितमानसोऽसौ
रेमे हरिर्भक्तदयावतीर्णः ॥१०३॥

अन्याश्च धन्याः शतशो बभूव
वरप्रिया भूपतिवर्यकन्याः।
सर्वावरोधस्य ललाममेका
तथापि वैदर्भसुता बभूव ॥१०४॥

ग्रीष्मे प्रियाभिर्जलकेलिमिच्छन्
रेवाङ्कदाचिद्विजगाह ईशः।
नहोस्सहस्रप्रतिरुद्धभङ्गा
सोमात्मजाभूत्प्रतिकूलवृत्तिः ॥१०५॥

अत्रान्तरे सर्वदिगीश्वराणा-
ञ्जयेन सम्प्राप्तमदस्तरस्वी।
भूमौ विचिन्वन्प्रतिवीरमाशु
माहिष्मतीं प्राप दशाननोऽपि ॥१०६॥

श्रुत्वार्ऽजुनन्तोयविहारशीलं
पुलस्त्यनप्ता सह मन्त्रिवर्गः।
रेवां समासाद्य कृताप्लवोऽभू-
त्तीरे तदीये शिवपूजनोत्कः ॥१०७॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पूजोपहारन्धनदानुजस्य[1]
जहार रेवाप्रतिकूलगन्त्री ।
सा भर्त्तिसता तेन समाचचक्षे
माहिष्मतीशेन कृतन्तदागः ॥१०८॥

श्रुत्वाऽस्नपानामधिपोऽपि जाल्मो[2]
मत्वाऽर्जुनं स्त्रीसभगं प्रमत्तम् ।
सुजय्यमेवाभिससार योद्धु-
न्न तामसानां हि विवेकिचित्तम् ॥१०९॥

तमाह्वता प्रह्वमतिस्तदाह्वा-
मुच्चार्य्य रक्षोगणसार्वभौमः ।
सङ्कल्पमात्रागतसर्वशस्त्रो
माहिष्मतीशोऽपि ययौ रणाय ॥११०॥

तदाशुके वापि न शक्यरोधो
मुदा बलौघैः परिवार्य्यमाणः ।
समुन्नतं भारतखण्डशोभो
दशाननस्संयुयुधेऽर्जुनश्च ॥१११॥

महेन्द्रदन्तावलदन्तकुन्त-
प्रहारभारव्रणमूर्त्तवक्षाः ।
आमूललूनोन्नतमूर्द्धतिर्यक्-
रक्तप्रतिक्षालितशम्भुपादः ॥११२॥

दम्भोलिसञ्जातकिणांसकूट-
क्षणताश्रुगस्तोसमनाथपाणिः (?)

---

१. धनद ० कुवेरस्तस्यानुजो रावणः ।

२. अस्रपाणां राक्षसानामधिपो रक्षकः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हैला समुत्क्षिप्तमहेशशैला
प्रशान्तकण्डूकभुजाकदम्बः ॥११३॥
दिगीशमौलिस्थलराजमान-
मन्दारमालाभनिदेशतोऽपि ।
दशाननो दीनदशामनायि-
स्फुरन्महास्त्रप्रकरेण तेन[1] ॥११४॥

प्रहेतिसन्निर्मितदारुणाहवे
समिद्धतेजाः सुहृदापिगन्ते ।
प्रणीतभूतिश्च विरोधिकोप-
प्रकाशहृद्वह्निरिवार्जुनोऽभूत् ॥११५॥

धरावलम्बं शिथिलैः कराग्रैः
कुर्वन्स्खलन्निर्गलिताम्बरान्तः ।
संयुक्तचक्रेक्षणजातभीतिः
कल्पेन्दुकल्पो ददृशे दशास्यः ॥११६॥

विच्छि[2]न्न शास्त्रार्थकलां क्षणेन
प्रयोगसंहारविधावनीशम् ।
निगृह्य वादीव बुधावभास-
ङ्गुणेन निन्ये वशमर्जुनस्तम् ॥११७॥

शुकं यथा गृह्यकमाप्ततोषः
शुकान्वितं तं प्रविधाय राजा ।
पुनर्विहृत्याम्भसि नर्मदायाः
प्रत्याययौ दारयुतः पुरीं स्वम् ॥११८॥

---

१. विशेषकम् ।
२. क. मा. 'छि' पाठो नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वारस्थसन्दानितयातुराज[1]-
मुखावलिदैन्यश्वसितावलिभिः ।
ग्रीष्मस्य शिष्टानि दिनानि तस्य
जातानि शैत्यादतिशैशिराणि ॥११९॥

तप्तुर्दशान्तां विषमां पुलस्त्यः
श्रुत्वार्थिनां कल्पतरुन्तमागात् ।
तमेव भिक्षां प्रतिलब्धुकामो
राजापि तस्येष्टमसौ ददौ तम् ॥१२०॥

प्रणिपत्य पदारविन्दयो-
र्दशवक्त्रे सपितामहे गते ।
नवपाटलशौचघस्रका
अपि राज्ञा प्रविसर्जिताऽश्वा ॥१२१॥

दशमुखदमनप्रशस्तिरेवं
दिवि भुवि चाप्रथतास्य भूमिजानेः ।
शरपदधनयुक्तरान्तरालो-
दितरजनीकरदीधितिः प्रकाशा ॥१२२॥

अदशास्य दशास्य दुर्दशास्य
प्रथमायाजनि बाहुवीर्यतश्च ।
विदधे भुवनत्रयेऽपि सा
विलसत्क्षेमपरम्परामपराम् ॥१२३॥

श्रीमत्कूर्मधराधरेन्द्रवसति प्रख्यातपन्तान्वये
जातः श्रीभवदत्तपण्डितवरः श्रीभार्गवी तत्प्रिया ।

---

१. यातुराज;—रावणः इत्यर्थः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

काव्ये तत्तनयस्य चार्जुनगुणैर्भव्येति नव्ये गतः
सर्गस्साधु चतुर्दशोहि विलसच्छन्दःप्रबन्धानुजे ॥१२४॥

इति श्रीसुकृतिदत्तविरचिते कार्तवीर्योदयमहाकाव्ये
कार्तवीर्य्यविवाहो रावणदर्पभङ्गो
नाम चतुर्दशः सर्गः[1] ॥

---

१. इति श्रीकिरातक्षत्रियकुलोत्पन्नस्य मेच्यञ्चलपाँचथरलालीखर्कः
मस्डाडाग्रामवास्तव्यदोवालीछाचामलिङराईकुलोद्भूतस्य डा. स्वामिप्रपन्नाचार्यस्य
कार्तवीर्योदयमहाकाव्ये चतुर्दशसर्गस्य टिप्पणीपाठभेदादिकं समाप्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कार्तवीर्योदयमहाकाव्ये

पञ्चदशः सर्गः

श्रीताराचरणाम्भोजपरागकणिकां मम ।
प्रत्यूहव्यूहशान्त्यै मध्ये मौलिसमागताम् ॥१॥

अथ तस्य नरेशस्य सुखासीनस्य पत्तने ।
सेवाशयेव शमिता वर्षाहर्षावहा नृणाम् ॥२॥

शुचिरागतभर्तारं मेनिरे शुचिरागताः ।
विमानगामिनमिव नितम्बिन्यो विमानगाः ॥३॥

कु[1]टजं कूटजं फुल्लं वियुक्तञ्च वियुक्तकम् ।
वी[2]क्ष्यात्मानं मानवत्यो रुरुदुः पुरुदुःखतः ॥४॥

नव[3]प्ररूढैः हंसितैश्शालिभिः परिशीलितम् ।
नवप्ररूढैः केदारकोनाशौ वी[4]क्ष्य रेमिरे ॥५॥

गुणवत्क्षेत्रसम्भूता यष्टिका इव षष्ठिकाः ।
सन्दृश्यते स्म दृश्यन्ते दृश्यन्ते नभवत्स्थलम् ॥६॥

केदारैः कलमारूढा सौगन्धिकसुगन्धिके ।
निर्वाति वातेव चमूरामोदञ्जनमोदनम् ॥७॥

---

१. क. मा. 'कू' इति पाठः ।
२. क. मा. 'त्रि' इति पाठः ।
३. क. मा. 'व' नास्ति ।
४. क. मा. 'वि' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नवनी यवनी भ्राम्यत्पवनोपवनोज्वलाः ।
हरितैः परितश्शस्यैर्हरितः प्रचकाशिरे ॥८॥

वनीयकाय भृङ्गाय नवनीपवनी ददौ ।
पांशुला रज एवासौ मधुपोऽपि व्यतुष्यत ॥९॥

उत्क्षिप्य पिच्छं स्वच्छन्दं शिखी शाखिशिखागतः ।
ननर्त्तानर्त्तरावेण घनाघनघनोन्मदः ॥१०॥

धारासारालीनवृक्कन्दलच्छन्नमहीरुहम् ।
नवकन्दलसंशोभिघनमम्बु[1]भिहाबभौ ॥११॥

सदम्भः पङ्कमालिन्यं सरोगत्वमवापयत् ।
स्थाने चित्रं कदम्बानां स्तोकस्नेहो बभूव यत् ॥१२॥

दध्वनुर्मेघमुरजा ननर्त च पलानटी ।
जगुः कलं मधुकरा नीलकण्ठोऽन्वशिक्षयत् ॥१३॥

रोमाञ्चितन्नवतृणैस्सरोमाञ्चितमाबभौ ।
वर्षासखया वपुः श्लिष्टन्धराख्याश्चिरकालतः ॥१४॥

चपलाक्ष्यो नितम्बिन्यो विलसत्कान्तिकाननाः ।
कामं ववर्षिरे वर्षा घनपीनपयोधराः ॥१५॥

नभो गजेन्द्रकलभाश्चतुर्विकलभावनाः ।
नभो गजेहालकभाः कलभाविगिरो वधूः ॥१६॥

पतत्त्रीणां कान्तरुतो मारुतस्तरुतो ववौ ।
तेनापविद्धाः पथिका हरिणा हरिणा यथा ॥१७॥

नीरजक्ष्मातलं पद्माकरश्चाच्छन्नीरजः ।
मदृश्यतालसत्तारं लसत्तारं वधूमुखम् ॥१८॥

---

१. क. मा. 'घनम्ब' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समानेन समानेन रसमानेन मन्द्रकम् ।
कलत्रेणातपत्रेण तापन्नापेदिरे तदा ॥१९॥

सकलं विकलं विप्रयुक्तं मिथुनमम्बुजे ।
तस्य वर्षति वर्षतौ वासरोऽपि स्म वर्षति ॥२०॥

रसालसालसदृशं तमालं छायया जनाः ।
रसालसालसदृशं वधूश्चेह सिषेविरे ॥२१॥

परित्यक्ताः कविवरैर्नीरसस्य मनोहराः ।
अल्पज्ञकवितावर्षाः प्राज्यासारास्समा बभुः ॥२२॥

वन्दीकृत्य विवस्वन्तं भुञ्जानामधिरूढकम् ।
पतत्पयोधरां सद्यो गतरूपश्रियं तथा ॥२३॥

कृष्णाम्बरां विरजसं प्रावृषं प्रचुरद्रवाम् ।
शरन्नवागता शुभ्राम्बरालक्ष्य पयोधरा ॥२४॥

बन्धूकबन्धू रराज[1] पङ्कसङ्करवर्जिता ।
अलङ्कृताहंसकाद्यैर्द्विजेतुं सारसान्विता ॥२५॥

विशेषकम् ।

भुवः पङ्कं दिवोमेघं कालुष्यं वारिणोऽमलम् ।
शरज्जहार सहसा नीहारं हरितामपि ॥२६॥

घनान्धकूपान्तर्गं विततैः रश्मिरज्जुभिः ।
उज्जहार शरद्वाला तृषाधातुं गतातपात् ॥२७॥

वितत्य पक्षन्नृत्यन्तो घनारब्धोऽघमा अपि ।
शिखिनो निर्जिता हंसैर्मुक्ताहारपरिच्छदैः ॥२८॥

---

१. क. मा. 'ररजा' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कालम्बितमहाशाखाञ्छिखिनश्चागमाकराम् ।
स्थाने हंसाः शुद्धपक्षाः प्रजिग्युः सारसङ्गताः ॥२९॥

स्फुरच्चन्द्रकलास्यञ्च गिरिशोभारतश्रुतः ।
वशीकृतो नीलकण्ठस्तदा हंसेन सङ्गतः ॥३०॥

सारसारावसरसां सरसीं सारसान्विताम् ।
ससार सारमासाराऽसारसंसारसारिणी ॥३१॥

बन्धूकबन्धूरराजो मिलितालिगणास्तदा ।
सुरसारथिसम्भिन्नतमाः कल्प इवाबभौ ॥३२॥

हरित्सरिद्वभौ तुल्यं विशदाकाशभूषिता ।
विशदाविशदारामारामारामा च दीर्घिका ॥३३॥

सहस्रकरजातेन पङ्कशोषपटीयसा ।
पूष्णोऽर्जुनस्य युगपत्प्रतापेन विजृम्भितम् ॥३४॥

शारदेशारदेवाति शारदामोदसारदे ।
चित्रं समीरे हंसोऽपि सरजः पद्मिनीङ्गतः ॥३५॥

अपि मित्रकरस्पर्शप्रोद्भिन्ननवकण्टकाम् ।
आस्वादितरसां भृङ्गैर्जहौ हंसो न पद्मिनीम् ॥३६॥

पद्मिनीराजहंसोऽद्धा परागस्थग[1]ताननाम् ।
बलाच्चकार सन्दष्टाधरपल्लविनीमहो ॥३७॥

विद्युद्विलसितं प्रायान्घनारम्भान्दिवस्तले ।
विचार्याकालिकान्काले तूष्णीं तस्थुः कलापिनः ॥३८॥

केदारेषु फलानम्रशालिसन्दर्शनोत्सुकाः ।
स्वनबन्धुरमध्येषु केदारेषु न रेमिरे ॥३९॥

---

१. क. मा 'णि' इति पाठः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हरित्पत्रमयी दीर्घा किंशुकास्याशुकावलिः ।
शरल्लक्ष्मीप्रवेशस्य तोरणस्रगिवाबभौ ॥४०॥

प्रासेवितसुधाहाला बालिकाशालिपालिका ।
रसालसारसालाधो जगावविकलं कलम् ॥४१॥

चञ्चत्तारावली चार्वी सूक्ष्मोत्थितपयोधरा ।
कान्ताभवद्युवप्रीत्यै शरच्चन्द्रविमलाम्बरा ॥४२॥

समायुक्तशरन्नव्यपद्मखण्डश्रियं व्यधात् ।
समायुक्तशरन्नव्यव्यधानं पद्ममात्मभूः ॥४३॥

प्रमण्डयन्महीलोकमभवन्निर्मलाम्बरः ।
प्रप्रसन्नश्चार्जुनारिः शरत्कालश्च सम्बभौ ॥४४॥

अनात्तशिखिसञ्चारस्सहस्रकरतापितः ।
घनागमात्पयः प्रीतः कलाविवजनोऽभवत् ॥४५॥

विशालवहं विलसत्तिलकं प्रांशुवंशकम् ।
राज्यलक्ष्मीशरल्लक्ष्मीश्शुभं यादवमाश्रिता ॥४६॥

विलसत्करवीरेऽभूत्पृथौ बाणे ध्रुवे रमा ।
यादवे साश्रिता तत्र काले शोभितमालके ॥४७॥

प्रजार्जुनस्य च शरद्विकसत्पृथुकानना ।
समीचीनांशुकतति बिभ्रती सममाबभौ ॥४८॥

हंसहासाकाशवासाबन्धूकाधरधारिणीम् ।
जह्रे चित्तं शरद्वाला ललिता पद्ममालया ॥४९॥

पुरोद्याने विहरतः शरत्काले महीपतेः ।
कामिनीभिस्समभवत्कामः सिन्धुजलप्लवे ॥५०॥

अथावरोधसहितो निरोधरहितो भुवि ।
विहर्तुं सागरतटं प्रपेदे कृतवीर्यजः ॥५१॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शुद्धान्तसहितोऽप्येष: शुद्धान्तरहितः सदा ।
शुद्धान्तरभुवं प्रेक्ष्य रिरंसुस्समजायत ॥५२॥

तरङ्गहस्तविन्यस्तः शङ्खार्धानर्घ्यरत्नकः ।
सिन्धुस्तमर्चयामास स्वबन्धुविधुबान्धवम् ॥५३॥

निशाविसृमरानेकविधुदीधितिसन्निभम् ।
चिक्षेप पदयोस्तस्य समुद्रः फेनचन्दनम् ॥५४॥

उच्छलल्लोककल्लोललीलान्दोलितमौक्तिकैः ।
अक्षतैरक्षतैस्स्वयं तमानर्च सरित्पतिः ॥५५॥

स्वं गन्तुं गतरङ्गाग्रसंगरिगल्लवंगकैः ।
सुमनोभिश्च सुमनोभिर्वन्द्यं स समार्चिचत् ॥५६॥

तोयार्थितो यदघटाधूपैर्विद्युत्प्रदीपितैः ।
निवेदितेनामृतेन सपर्यां समपूजयत् ॥५७॥

ततो विधुसमज्ञस्य विज्ञस्यास्य समानया ।
यथारुचि स्त्रियां सिन्धुर्गाधतामन्वगाहत ॥५८॥

नितम्बद्वयसेक्कापि वक्षो दध्ने जले नृपः ।
स्वाभिस्ताभिर्मृगाक्षीभिर्निर्जहार हरन्मनः ॥५९॥

सहस्रबाहोरेतस्य करालम्बननिर्भयाः ।
प्रवाललतिकाभास्ताः पोप्लूयन्ते स्म सागरे ॥६०॥

मुखारविन्दैरेतासां प्रोत्तरत्केशशैवलैः ।
प्रचलन्नेत्रशफरैश्शोभां रत्नाकरो दधौ ॥६१॥

पोप्लूयमाना कनकप्रभादर्शिसखीगणैः ।
लसल्लावण्यसलिले सौधाजिरगता यथा ॥६२॥

---

१. क, ख. 'छे' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उन्मोचयत्केशपाशमाचुम्बद्गण्डभित्तिका ।
प्राभृशन्तिलकङ्गात्रं स्पर्शाद्रोमाञ्चयन्मुहुः ॥६३॥

शाटीं विनीविम्बिदधत्केशपाशं समाकृषत् ।
तासाञ्जलक्षितिभुजा सेहे क्लीवमितीव किम् ॥६४॥

युग्मम् ।

एतासां विहरन्तीनां वदनैः प्रतिबिम्बितैः ।
प्रत्नैकविधुहीनोऽपि शतचन्द्रोऽम्बुधी[1]कृतः ॥६५॥

विदर्भभूभुवा लक्ष्यास्सखीभिश्चाप्सरोगणैः ।
अर्थिकल्पद्रुम[2]त्वेन पूर्वावस्थाङ्गतोऽम्बुधिः ॥६६॥

कमले कमलं दृष्ट्वा विमले कमलाभुवः ।
कमलाक्षी निजास्यस्य नर्कमाकमलङ्कृतम् ॥६७॥

ततोऽमन्दरसावेशोऽवलिवासवसन्ततः ।
व्यालोडयज्जलनिधिं स्वयञ्च पुरुषोत्तमः ॥६८॥

सहस्रबाहुना तेन मुहुरालोडितोऽम्बुधिः ।
ररास बलिवासस्थान्बोधयन्निव भीतितः ॥६९॥

उच्चलल्लोलकल्लोलप्रोच्छलत्तिमिचक्रकम् ।
वराहवपुषा पुंसा तेन व्यालोलितोऽम्बुधिः ॥७०॥

भृङ्गनेत्राः भृङ्गसंस्थैरासिञ्चंल्लोहितोदकैः ।
तथा यथा स्रवद्धातुस्समन्दर इवाबभौ ॥७१॥

आसेचनामधिगतस्तासां वर्णोदकैर्नृपः ।
भृङ्गाररसभृङ्गारस्तदासेचनकोऽभवत् ॥७२॥

---

१. क. मा. 'धि' इति पाठः ।
२. क. मा. 'ण' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तरङ्गहस्तैरादम्य ह्रावमाना वरस्त्रियः ।
तस्य हस्तेऽर्पयन्सिन्धुः कुक्कदत्वमगात्तदा ॥७३॥

प्रामृष्टतिलकञ्चापि प्रस्फुरत्तिलकं भ्रुवोः ।
मध्ये प्रियास्यं पश्यन्स लुलुभे धरणीपतिः ॥७४॥

सविशेषं वपुस्तासां वारिणा निर्विशेषकम् ।
पश्यन् हारीविहारी स मुदमापदपापधीः ॥७५॥

लुप्तालङ्करणं वार्भिस्तासां वदनपङ्कजम् ।
अलुप्तालङ्करणकं मुदस्तस्याप्लवभ्रमम् ॥७६॥

उच्चावचागमोर्मीणां विहारपरिकर्षितः ।
विद्यार्थीव क्षितिपतिस्सद्बुद्धिप्रमदान्वितः ॥७७॥

प्रासाद्य तटभूभागममान्तं प्रतिपल्लवम् ।
सुक्षापसंप्रस्तपत्रः क्षणमात्रं विचक्षणः ॥७८॥

युग्मम् ।

अथालञ्चक्रिरे कान्ता कान्तारक्रीडनोत्सुकाः ।
निद्राङ्गतस्य तस्याशु सखीभिस्सज्जसाधनैः ॥७९॥

मुक्तालङ्कारमामुक्तालङ्कारमपि तद्वपुः ।
मुक्तनिद्राय रुरुचे लङ्कालङ्कारमोचिने ॥८०॥

कलास्वविकलाचन्द्रकलाकलमथालपत् ।
प्रभोः पुरुषसिंहेन चित्तोदारदरीजुषा ॥८१॥

आक्रान्तद्विपिनाथेन सिंहमध्यञ्च यौवनम् ।
विहर्तुं सागरतटाटव्यां प्रकटवाञ्छितम् ॥८२॥

युग्मम् ।

भूतिविज्ञापनाप्रीतो वाहिनीशतसङ्गमे ।
नारिकेलीयुते क्वापि बाजपूरविराजिते ॥८३॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विटपानमितादासीस्तरुणीश्चापि विभ्रति ।
उदीर्णकरवीराढ्ये विलसत्तालशालके ॥८४॥

आश्रिताभीष्टशाखाग्रद्विजमञ्जुविराविणि ।
विलसत्सर्वतोभद्रे राजादनसमन्विते ॥८५॥

आश्लिष्य बालतनयान्कण्टकोद्भिन्ननागरे ।
उद्धूतपोतसंघर्षक्षपयिष्णुसुधीवरे ॥८६॥

तुङ्गवार्योघसम्बन्धविलसत्सिन्धुराविते ।
निहर्तुमारभत सः सिन्धुतीरे पुरे यथा[१] ॥८७॥

क्वचित्कुञ्जे क्वचिद्वृक्षच्छायायां क्वापि सैकते ।
क्वचिन्नदीनां सम्भेदे व्यहार्षीद्वनितासखः ॥८८॥

स्वयमालूय पुष्पाणि पल्लवानि च भूरुहाम् ।
तासामुत्तंसनविधिश्चक्रे शक्रेण सन्निभः ॥८९॥

स्वायत्तचेतसां तासां क्रीडन्तीनामितस्ततः ।
कनकप्रभयाश्लिष्टो नृपो नर्मगिरोऽश्रृणोत् ॥९०॥

आलोक्यालिकुचं राजालिकुचन्ते पचेलिमम् ।
स्मरति स्मरतीहाग्रे स्मरती व्रततिक्षणम् ॥९१॥

इत्युक्त्वाह क्षितिमिलत्स्वयमश्व[२]त्थपत्रकम् ।
राज्ञःकृते त्वमुत्थाप्य वदेति नृपभोगिनी ॥९२॥

युग्मम् ।

अप्राप्तचन्द्रचूडाञ्च श्रीफलं सौरभोल्लसत् ।
व्यर्थमेतदिति प्राह काचित्काञ्चिन्नृपाग्रतः ॥९३॥

---

१. पञ्चभिरन्वयक्रियाकुलकम् ।

२. क. मा. 'स्व' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अपराग[1]मयं भृङ्गो मल्लिकाकलिकां कथम् ।
यूथिकासु सरागासु सतीष्वप्यभिवाञ्छति ॥९४॥
व्याहरन्तीमिति प्राह कलिकाकेलिकामधुक् ।
अन्तान्ता रजसा बाह्या रजसा यूथिकेतिनः ॥९५॥

युग्मम् ।

आमृष्टगण्डशैलञ्च प्रस्फुरत्तिलकाञ्जनम् ।
अधुना मधुना त्यक्तं शोभते नाटवीमुखम् ॥९६॥

वदन्तीमिति तामाह सहस्रकरसङ्गतः ।
कनकप्रभयैवाद्य दीप्यते धरणीतले ॥९७॥

अजातप्रा[2]प्याप्यलिना खण्डिताधरपल्लवा ।
कृतालतालतानेन त्वयाप्यनुमतं कथम् ॥९८॥

इति व्याहरमाणां तां खण्डिताधरपल्लवाः ।
त्वयाप्यनुमताः सोढा मयेति व्यहरत्परा ॥९९॥

युग्मम् ।

राज्ञः कलाद्य दयिता लक्ष्यते रजतप्रभा ।
तथापि सन्तापततिरिति वक्ति स्म काचन ॥१००॥

न भाति विद्रुमच्छायोऽखण्डितोऽधर एष नः ।
वयस्यामिति काप्याह वाग्विदग्धा नृपान्तिके ॥१०१॥

आधावन्ती रयात्काश्चिल्लाजमृ[3]ष्टा वदन्नृपम् ।
विषमेषु निघातेन स्खलितास्मि नितम्बतः ॥१०२॥

---

१. 'अपरागामयं' इति पाठः ।
२. क. मा. 'अ' नास्ति ।
३. क. मा. 'भृ' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कण्टकोद्भिन्नसर्वाङ्गी रजसापि हितेक्षणा ।
पतितालम्बनं युक्तं समर्थस्य तवेति च ॥१०३॥
युग्मम् ।

प्रसार्य्य कल्लोलभुजान्महादरसमन्वितः ।
लावण्यरसनिर्णारि मुखं सम्मुखमादधत् ॥१०४॥
स्रवन्तीश्शतशोऽभ्यर्णे यदाश्लिष्यसि चार्णव ।
ततो दक्षिणता युक्ता त्वय्यि नान्यत्र चोत्तरे ॥१०५॥
वाहिनीशतसेव्येऽपि समुद्रे पीतिदक्षिणा ।
लक्षीकृत्य पयोराशिमूचे माहिष्मतीपतिम् ॥१०६॥
विशेषकम् ।

अथ तासां वचो भङ्ग्या पुनरुक्तं मनोरथम् ।
योगी संयोगत[१] कर्तुं सफलं बहुधाऽभवत् ॥१०७॥
यावद्रामं प्रकटितास्तावत्यो मूर्तयोऽमुना ।
नैतच्चित्रं भगवति नैकब्रह्माण्डकर्तरि ॥१०८॥
रणरत्नाढ्यमञ्जीरं क्वणत्कनककङ्कणम् ।
चलत्काञ्चीकलकलं सङ्कुचन्नेत्रपङ्कजम् ॥१०९॥
मिलन् शीत्कारवदनं प्रेङ्खद्धारकरम्बितम् ।
वान्तसलिलकधम्मिल्लतल्लजं सल्लयान्वितम् ॥११०॥
कपोतपोतभणितानुकुर्वन्मणितोज्ज्वलम् ।
प्रवाञ्चच्चू[२]चुककुचबन्धनाद्वाहुवल्लरि ॥१११॥
खिद्यन्मध्येन् त्रुटन्नीविस्विद्यद्वक्त्रच्चलत्कचम् ।
धृष्णुवृज्जघनं रिङ्खन्नितम्बपृथुविम्बकम् ॥११२॥

---

१. क. मा. 'त' इति पाठः ।

२. क. मा. 'अवाञ्चञ्चु' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रगल्भमानकरजमधमानोपचारकम् ।
बहिर्विहसमानालिप्रेङ्खमाणभुजिष्यकम् ॥११३॥

प्रेक्षमाणा नरवधूस्पृहितं प्रावृतत्ततः ।
सुरतं सुरतंत्रस्य तस्य ताभिरनारतम्[1] ॥११४॥

वात्स्यायनादिमुनिभिस्सूत्रिता ये रत्यु[2]त्सवाः ।
तद्गाध्य[3]भूतास्तास्वासन्नृपतेः स्मरकेलयः ॥११५॥

कन्दर्पदर्पशमनं तासां कृत्वाशुचिर्नृपः ।
स्वात्मानुभवसन्तुष्टो यथापूर्वमनास्थितः ॥११६॥

समुद्रकेलिस्वच्छन्दोच्छलदूर्मिविघट्टनात् ।
विप्लावितपुरा या तु नागा योद्धुमथागमन् ॥११७॥

सन्नद्धमागतं वीक्ष्य तद्बलन्नागरक्षसाम् ।
अवरोधावरुद्धोऽपि सज्ज एव बभूव सः ॥११८॥

योगप्रभावसम्पन्ननानाशस्त्रास्त्रमूर्तिकः ।
निधाय क्वापि महिषी रणक्षोणीमवातरत् ॥११९॥

प्रबलान्वित आराध्य काममेष महीपतिः ।
बलान्वितश्च वामेभ्योऽपराद्धुं समुपागमत् ॥१२०॥

यातुधानान्सुराबध्यान्सिन्धुमध्यान्तरस्थितान् ।
नागांश्चायमण्डश्यागाञ्जिघांसुस्सक्रुधापतन् ॥१२१॥

यावन्तः क्रोधवन्तस्ते सन्त आयान्त ईक्षिताः ।
सन्नद्धाबद्धतूणीरस्तावद्धा ददृशेऽर्जुनः ॥१२२॥

---

१. षड्भिरन्त्यक्रियाकुलकम् ।
२. क. मा. 'तो' इति पाठः ।
३. क. मा. 'ध्य' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आकृष्टकरवालं तदबलानामितस्ततः ।
रसावेशवशाधीरं सन्दष्टदशनच्छदम् ॥१२३॥

समालिष्टकुचेष्टश्चद्र वङ्घ्रीरुजनान्तरम् ।
उद्घाटिताम्बरद्वारं संमीलितमुखद्वयम् ॥१२४॥

कामप्रकृष्टकोदण्डक्षिप्तसुमनोगणम् ।
खरप्रहारनखरं गोत्रस्खलनभीतिकृत् ॥१२५॥

सुरताभोगसिद्ध्यर्थकबन्धशतसङ्गतम् ।
तस्यासीत्समरन्तत्र स्मरयुद्धमिवापरम् ॥१२६॥

कलापकम् ।

दशार्द्धशतकोदण्डदण्डयत्काण्डखण्डिताः ।
दशार्द्धतामस्य गता रिपवो दुर्दशार्दिताः ॥१२७॥

असोढ[1]मार्गणगणं स्वल्पं धावदितस्ततः ।
द्विषां बलं विप्रधनं तु राज्ञाऽहो कथं कृतम् ॥१२८॥

कृत्वा रक्षोगणं गृद्ध्रभक्षं स कृतरक्षकः ।
भ्रमराणां प्रदुद्राव काद्रवेयवरूथिनीम् ॥१२९॥

सौपर्णास्त्रप्रयोगेण विध्वस्ते फणिनां गणे ।
जीवग्राहमगृह्णात्स कर्कोटकतनूभुवम् ॥१३०॥

पुररक्षा प्रतिश्रुत्या निर्मुच्यात्मानमाशु सः ।
प्रणम्य भूपतेः पादौ पुरीं माहिष्मतीमगात् ॥१३१॥

सुमनो गणनिर्मुक्तसुमनस्सुमना नृपः ।
जयश्रिया प्रियास्थानं प्रापदापद्विनाशनः ॥१३२॥

---

१. क मा. 'ठ' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्यतीत्य शारददिनान्येवं सिन्धुविहारतः ।
ऋतेऽग्र्यमहिषीम्पत्नीः प्राहिणोत्स्वाम्पुरीन्नृपः ॥१३३॥
द्वीपान्तरविहारेऽपि प्रार्थितः प्रियया प्रभुः ।
प्लाक्षादिद्वीपषट्केऽपि स गन्तुं मन आदधे ॥१३४॥
ततो विधिनियोगेन सर्वत्र गतिमद्रथम् ।
आरुह्य लवणाम्भोधिमुत्तीर्णः प्रिययान्वितः ॥१३५॥
पारे समुद्रं प्लक्षोपलक्षितं द्वीपमादरात् ।
द्वीपाधिपतिगामिन्या तया पश्यन्ननन्द सः ॥१३६॥
उत्तुङ्गप्लक्षशाखाग्रजटादोलावलम्बतः ।
प्रेङ्खोलितावधूयुक्तास्तयोश्चक्रुश्च विस्मयम् ॥१३७॥
तन्मूलमध्यवसति वह्निमासाद्य दम्पती ।
प्रदक्षिणं परिक्रान्ता च स्मृष्टं पाणिपीडनम् ॥१३८॥
रसालरसमासाद्य रसिकस्तत्र वारिधौ ।
प्रियाधराधारसुधाधरन्तो बहुमन्यतः ॥१३९॥
मेघमाले लसन्मेघमाले प्रालेयधारिणी ।
नक्षत्रमालेव वधूश्शुशुभे प्रियसंयुता ॥१४०॥
सुभद्रवर्षे साविन्त्री पवित्रितमहीतले ।
विहरन्तौ सुभद्रन्तौ प्रापतुः प्रख्यदर्शनौ ॥१४१॥
अपक्षपातिनो हंसान् पतङ्गान् वीक्ष्य तत्र तौ ।
मानसौकसमानीय ख्यापयामासतुर्मुदा ॥१४२॥
पौरान्सौरान् रागचौरान्सर्वान्वीक्ष्य वधूवरौ ।
अमन्यतामयं देशः शूरभक्त इति द्विधा ॥१४३॥
द्विड्वीवधासप्तजिह्वस्य पुरो माहिष्मतीपतेः ।
इध्मजिह्वो नृपो जातः सह आह्वानमात्रतः ॥१४४॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शाल्मलिप्रस्फुरत्तूलतूलिकासदृशे ततः ।
द्वीपे समीपे ग्रामे वा लीलया तौ प्रजग्मतुः ॥१४५॥

रममाणा रमणके रमणी रमणेन सा ।
रमणीयमणिश्रेणीभूषणा रुरुचेतराम् ॥१४६॥

मृदुशाल्मलितूलाढ्यं कुलायं हातुमक्षमम् ।
प्रदर्शतां शाल्मलिं तौ हरिपादाब्जलाञ्छनम् ॥१४७॥

सारस्वतरसोत्तुङ्ग वीचीनिर्णिक्तमानसौ ।
अपिसारं स्वतरसा प्लावमेतौ प्रचक्रतुः ॥१४८॥

वामदेवोत्तुङ्गशृङ्गं पुष्परिङ्गितभृङ्गकम् ।
आरुह्य कामदेवन्तौ भेजाते कतिवासरान् ॥१४९॥

दृष्ट्वा श्रुतधरांस्तत्र वर्णाञ्छ्रुतिधरानिभौ ।
द्वीपान्तरश्रुतान्नेत्रैर्धृतवन्तौ च तद्गुणान् ॥१५०॥

सुरार्णवोच्छलद्वीचिविकटायितमुत्कटम् ।
वीक्ष्य राजा स्मरत्प्रौढ राज्ञी विभ्रमवीक्षितम् ॥१५१॥

सोमदैवतके तत्र द्वीपे सोममुखी वधूः ।
सौरनक्तं व्रतमिव चक्रे नक्तं व्रतं समम् ॥१५२॥

यज्ञबाहुस्समावध्य बहुबाहुजकुञ्जरम् ।
आहूतमात्र आगत्य भेजे भगवतः कलाम् ॥१५३॥

कुशलैः कोविदैर्युक्ते कुशद्वीपे निरङ्कुशौ ।
कुशेशयदलासौ तौ कौशल्येन प्रजग्मतुः ॥१५४॥

हिरण्यरेतसैकेनवसुना तौ समर्पितौ ।
हिरण्यरेतसान्येन वसुना प्रापितौ वरम् ॥१५५॥

वसुदानादिदेशांस्तान्मधुकूल्यादिसंयुतान् ।
चरन्तौ स्मरतः स्मेतौ यज्ञदेशाग्निजानलम् ॥१५६॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नदेवहूतिजनितो नापि कर्दमसङ्गतः।
मौनव्रतधरस्ताभ्यां ददृशे कपिलोद्भुतः ॥१५७॥

घृतोदधिरस[1]युतान् स्निग्धानिव जनानिमान्।
विहायसा विहायैतौ क्रौञ्चद्वीपं प्रजग्मतुः ॥१५८॥

कुमारशक्तिसम्भिन्नः क्रौञ्चस्तस्माद्विहायसः।
प्रौढशक्तिधरान्नैकसेनानीभिर्निषेविताम् ॥१५९॥

मेघपृष्ठे महीशक्रं शतकोटिलसत्करम्।
धृतपृष्टो गतः प्रष्टः स्पष्टमाचष्ट सौहृदम् ॥१६०॥

उद्वेल्लदुग्धजलधितरङ्गानां महीपतिः।
धावत्प्रियाकटाक्षाणां विशेषं तत्र वेद न ॥१६१॥

ननन्द नन्दनोद्देशे चलच्छिवमरुद्गणे।
वसुप्रभा भास्वरे सा क्षितिवासवमानिनी ॥१६२॥

स्नातवाऽभयायामभया पुरुषा ऋषभा अपि।
जलदैवतकाश्चक्रुर्विस्मयञ्जगतीपतेः ॥१६३॥

दृष्ट्वा मार्गीसमासन्नां प्रियाञ्च विमलाम्बराम्।
प्रस्फुरत्पादकटकामादायागान्नृपोऽन्यतः ॥१६४॥

गजपाकप्रियः शाकस्तत्र नाकमलङ्कृतः।
विपाक इव पुण्यस्य दाकस्यास्य मुदेऽभवत् ॥१६५॥

युद्धातिथेरर्जुनस्य तत्र मेधातिथिर्नृपः।
विद्यार्थिनस्तिथिरिव प्रथमो नेप्सितं ददौ ॥१६६॥

सत्यव्रतास्तत्र जना मनोभवविहारिणः।
अनघास्पर्शमात्रेण तेन दृष्टाः स्वसन्निभाः ॥१६७॥

---

1. क. मा. 'युत्या' इति पाठः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रलम्बपादसम्बद्धस्तत्र शुक्लाम्बरावृतः ।
अपक्षपाती कुरुषु बलभद्रो विलोकितः ॥१६८॥

नित्यार्चितेन मरुता सौहार्दातिशयादिव ।
चिरमत्यक्तवपुषस्तत्र लोका विलोकिताः ॥१६९॥

अवशिष्टं ततो द्वीपं विलोकितुमिमौ गतौ ।
वैहायसेन तेनैव रथेनाप्तमनोरथौ ॥१७०॥

तौ नेमतुर्भवितनम्रौ पुष्करे पुष्करासनम् ।
स्वनिर्माणातिशिल्पेन प्रशंसन्तं स्वकं भुजम् ॥१७१॥

निर्विशेषे द्युलोकस्य सविशेषं विजह्रतुः ।
लालितौ क्षेमवचसा तौ तत्र विधिनान्वहम् ॥१७२॥

सूर्यस्यन्दनचक्रांको भूधरो मानसोत्तरः ।
तत्र दृष्टस्तयोश्चक्रे विस्मयं मानसोत्तरम् ॥१७३॥

तच्छृङ्गस्थपुरावासा वासवप्रमुखाः सुराः ।
अवतीर्य तयोश्चक्रुः सभाजनविधिं मुदा ॥१७४॥

मिष्टोदके जलनिधौ गरिष्टौ गुणसम्पदा ।
प्रष्ठीभवद्वीतिहोत्रविशिष्टौ तौ विजह्रतुः ॥१७५॥

ददाति कर्मशमेति तत्र श्रद्धालवो जनाः ।
मीमांसामांसलधियस्ताभ्यां दृष्टा बहिर्दृशा ॥१७६॥

अर्थकामद्वयीवर्षे तत्र वर्षद्वये द्वयी ।
द्वयी सा वीतिहोत्रीयवीतिस्थित्या चरत्सुखम् ॥१७७॥

अनुमान्य विधिं लोका लोकालोकातितत्परौ ।
ततस्सुरगजावासं शैलं तावुपजग्मतुः ॥१७८॥

आरुह्योत्तुङ्गशृङ्गाग्रात्तस्य मारुतरंहसौ ।
स्वाभ्यां पुराणसूरिभ्यां समायुङ्क्त स्म सादरौ ॥१७९॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ततोऽनुशिष्ठिमायैंतौ विहरन्ताविततस्ततः ।
वस्वोकशारापतये स्पृहयाञ्चक्रतुर्नतौ ॥१८०॥
एकत्र प्रस्फुरज्ज्योतिः परत्र तिमिरावृतः ।
निबद्धो गुणदोषाभ्यां प्रबन्ध इव सेक्षितः ॥१८१॥
आदर्शादादर्शतले गजालिमिव तद्युगम् ।
तत्तुङ्गशिखरारूढं सप्तद्वीपवतीं क्षितिम् ॥१८२॥
पश्यन्नेदीयसीमेकामपराञ्च दवीयसीम् ।
राजा ननन्द पुरतः स्फुरिताङ्कनकप्रभाम् ॥१८३॥
नेदीयस्या समायुक्तस्त्यक्त्वा गम्यां दवीयसीम् ।
परावृत्तः कम्बुकण्ठो जम्बूद्वीपागमाय सः ॥१८४॥
हैमनः पवमानो भूविमानं बहुमानयोः ।
सौधमानमयोदाह तयोः कीर्त्या समानतः ॥१८५॥
द्वीपान्तरस्थलीवार्तामन्योऽन्यवदनोद्धताम् ।
प्राकर्णयन्तावन्योऽन्यां प्रेम्णान्यवृत्ततामुभौ ॥१८६॥
कियद्भिरेव दिवसैर्गतौ जयविमानगौ ।
प्राप्तौ लवणमम्भोधिं प्रवणं मन्मथो यथा ॥१८७॥
स्वावासद्वीपखण्डेक्षावाञ्छया प्रियर्थितः ।
अनिलावृतमार्गेण सम्प्राप्तोऽसाविलावृतम् ॥१८८॥
शिवाप्रीतिकरेणात्र शिवेनाप्यशिवं कृतम् ।
पुंसामयन्न विषयो विशेषज्ञो घनस्वनम् ॥१८९॥
जम्बूद्वीपमहापद्मकर्णिकात्वेन वर्णितः ।
निर्वर्णितोऽमरगिरिस्ताभ्यामाकर्णितः पुरा ॥१९०॥
अचलीभूतकनकप्रभाञ्च कनकप्रभाम् ।
चलाञ्च पश्यन्नुपरिस्थां मेने गुणाधिकाम् ॥१९१॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुरावासापि सुमनः कृतशोभापि चादिमा ।
भूरिनिर्जरसंबद्धकटको द्वयपयोधरा ॥१९२॥

सदाग्रहवती चान्यथा केशवे शशिभूषिता ।
अदुश्च्यवनभोगेति राज्ञा बहुमता किमु ॥१९३॥

युग्मम् ।

विलसद्धीरकचितं कटकं स्वर्णभासुरम् ।
सुमेरोश्च प्रियायाश्च सममाभान्नृपं प्रति ॥१९४॥

ततः प्रियां सुरगिरिशोभालोलविलोचनाम् ।
विलोक्य नृपतिः प्राह श्लिष्टाङ्गां विलसत्पदाम् ॥१९५॥

अयं कामीव गिरिराट् कान्तारागाप्तिपेशलः ।
पृथुसज्जघनश्चास्य शृङ्गं तव वपुर्यथा ॥१९६॥

सुरालयोऽप्यतिशुचिः कुलीनोऽपि समुन्नतः ।
मेरुर्नमेरुयुक्तोऽपि सूर्ययुक् च बुधान्वितः ॥१९७॥

पूर्वोक्तगिरीणां सूर्येण क्रियतेऽसौ प्रदक्षिणः ।
पश्चिमाऽसौ सौख्यभूमिर्वर्षाणामुत्तरस्थिता ॥१९८॥

अयं गिरीशोऽस्य मूर्ध्नि रमतेऽमरवाहिनी ।
आस्ते सदा पिनाकीहेश्वरो विबुधसंस्तुतः ॥१९९॥

सुरसेव्यो गिरीशोऽयं कृततारावलम्बनः ।
भ्राजच्छिखण्डिजन्मापि कथन्न गुरुतां व्रजेत् ॥२००॥

तव वागिव धार्येयं सुवर्णघटिता स्थली ।
अनुभूत्यै सुकृतिनोममेवप्रसितं मनः ॥२०१॥

नवग्रहोऽप्ययं तन्वि सर्वदैवानवग्रहः ।
अष्टलोकाधिपोऽनष्टलोकाधिप इति स्मृतः ॥२०२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लब्धाख्यानारते जन्म भारतश्रवणादितः ।
सुकृतश्रेणिनिःश्रेण्याजनारोहस्थलं त्रिदम् ॥२०३॥
एतत्पूर्वादिकाष्ठास्थपुराधीशाः सुरा अमी ।
सभाजयन्ते मा पश्य मन्दारकुसुमोत्करैः ॥२०४॥
एतस्योपरि धन्यानां विशेषसुखसम्विदे ।
तन्वङ्गि वर्तते स्थानं स्वर्गादेर्लक्षताङ्गतम् ॥२०५॥
सत्यलोकादयो लोका एतच्छृङ्गे प्रकल्पिताः ।
गतिर्यत्र महर्षीणां तपसा भावितात्मनाम् ॥२०६॥
कैलासहिमशैलाख्यदशनो गिरिकुञ्जरः ।
अयमेतस्य कलभा हेमकूटादयोऽद्रयः ॥२०७॥
विशालेऽपि च वाग्जाले माति नातिमहद्यशः ।
यस्य पश्य यशस्यस्य नमस्कारपरः स्तवः ॥२०८॥
इति वादिन एवास्य विमानं छन्दसा व्रजत् ।
विहाय शिवमात्रेण सपूरुषमिलावृतम् ॥२०९॥
अथोत्तरेषु कुरुषु समुत्तरदिशं क्षणात् ।
नियुक्तरुत्तरशिवस्तयोः प्रीतिं परां व्यधात् ॥२१०॥
रसातलात्समुद्धृत्य योदूढा रसतोरसा ।
स्तूयमानं तथा तत्र वराहं तौ प्रणेमतुः ॥२११॥
अकृत्रिमा वपुश्शोभा जीवनश्चाप्यकर्षणम् ।
अयत्नसाध्या भोगाश्च ताभ्यान्तत्र निरीक्षितम् ॥२१२॥
अत्रत्ययोषितामन्ते सकृद्धर्मधृतिस्थितिम् ।
प्रशशंस जगर्हे च सा तारुण्यार्भकप्रिया ॥२१३॥
समायुतायुषस्तत्र ताभ्यां समयुतायुषः ।
दृष्टा दम्पतयः पृष्टाः प्रणयादेव भाषितैः ॥२१४॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कृतं त्रेतोपासनौ तौ तत्र त्रेतायुगस्थितिम् ।
भद्राप्लवेनाति भद्रावनवभूतां कियद्दिनम् ।।२१५।।

स्वर्गशैवस्थलीमेतामुपभुज्य यथा रुचिः ।
जहौ प्रियान्वितो राजा योगीव विषयस्थितिम् ।।२१६।।

ततः शिशिरवातासौ परिनर्तितकेतुना ।
केतुमाले विमानेन प्राप्तौ तां वभु सेतुना ।।२१७।।

इलावृतात्पश्चिमतस्तन्मर्यादागिरिः स्थितः ।
न्यषेवि माल्यवान्ताभ्यामरुद्रुममाल्यवान् ।।२१८।।

रमारमणकामेन कामरूपं दधद्धरिः ।
दर्शनं प्रददौ ताभ्यां स्तूयमानस्सदा श्रिया ।।२१९।।

तत्र स्वप्रत्नरूपास्त्रतेजोदलितगर्भके ।
निरर्भके तवारेमे राजा प्रत्यक्षदर्पकः ।।२२०।।

दृष्टापि चक्षुषा चक्षुराक्षिपत्येव किल्विषम् ।
इत्याचचक्षुर्मुनय इति तौ तत्र सस्नतुः ।।२२१।।

गन्धमादनमर्यादं भद्राश्वमथ जग्मतुः ।
तौ तत्र भद्रश्रवसाविष्टरश्रवसं गतौ ।।२२२।।

अज्ञानध्वान्तपटलीभानुर्भानावुदग्गते ।
हयग्रीवो हरिस्तत्र तयोरक्षिपथङ्गतः ।।२२३।।

सीतां समीतां मुनिभिरानीतां ब्रह्मसंसदः ।
आप्लवेतामिमौ प्राप्य तत्र मन्त्रवदुत्सुकौ ।।२२४।।

तौ दुष्प्रधर्षौ सामर्षैर्जनैरार्षमतानुगौ ।
सहर्षमतिवर्षञ्च हरिवर्षमितौ ततः ।।२२५।।

उत्फुल्लकह्लारवनमासाद्यैव मधुव्रतः ।
प्रह्लादमाह्लादमगात्तत्र प्राप्य महीपतिः ।।२२६।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सहते नैव भूतानि सजानिर्नृहरिङ्गतः ।
प्राप्तवांश्च तदालोकं तदालोकद्वये सुखम् ।।२२७।।

चञ्चन्नखरदुर्दर्शचपेटनखरस्पृशा ।
श्रीनृसिंहे नतौ प्रेम्णा परिस्वज्य विसर्जितौ ।।२२८।।

ततः किम्पुरुषावासं वर्षवर्षं तमीप्सितम् ।
कीनाश इव वर्षन्तं सतर्षन्नृपतिर्गतः ।।२२९।।

अञ्जनानन्दनस्तत्र भक्तकिल्बिषगञ्जनः ।
ताभ्यां समागतः सञ्ज्ञा सूर्याभ्यामिव काश्यपिः ।।२३०।।

राजराजार्चनस्थाने यत्ने सान्निध्यमेषतम् ।
प्रतिशुश्राव राजापि गुरुणा तस्य सन्निधिम् ।।२३१।।

ततः कल्पान्तरोद्भूतं कौसल्यानन्दवर्धनम् ।
सीतासमेतं श्रीरामं भेजाते भक्तिभावितौ ।।२३२।।

तुरङ्गवदनाः काश्चित्तु रङ्गतनवः पराः ।
समानदेहैः पतिभिस्संयुतास्तत्र योषितः ।।२३३।।

आश्लेषं चुम्बनमपि स्पृहयन्तः परस्पर[1]म् ।
राज्ञा राज्ञीविनोदार्थं दर्शिताः कौतुकेन च ।।२३४।।

युग्मम् ।

नातिप्रियजनावासं हासन्तन्वानमीक्षताम् ।
तत्याज निर्व्याजमेव राजा तं जायया पुनः ।।२३५।।

उत्तीर्णौ तौ क्षणादेव रम्यकं रम्यकन्दरम् ।
पवमानसमानेन विमानेन विमानगौ ।।२३६।।

---

१. क. मा. ०रम् इति पाठः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सत्यसत्यव्रतेनासन् सत्यासत्ये गिरस्तयोः ।
स मेने बहुमाने तौ स मेनेह पथा स्थितः ॥२३७॥

विहृत्य कल्पजलधौ चिरम्भिरवधौ हरिः ।
विश्राम्यन्निव तत्रैष्टिताभ्यां मत्स्यवपुर्धरः ॥२३८॥

प्रकृत्या निर्निमेषेण श्रवत्प्रेमाश्रुविप्रुषा ।
विलोकयञ्चक्षुषा सादनुमेने तयोर्गमम् ॥२३९॥

अथ प्रतस्थे भूशक्रो[१]ऽचक्रेणापि पथा प्रियाम् ।
सन्दिदर्शयिषुर्मेरोर्विष्कम्भधरणी धराम् ॥२४०॥

विहारमन्दिरं देवस्त्रीणामारुह्य मन्दरम् ।
कन्दरं कञ्चिदध्यासाभ्शृणोद् गीतं सुकन्धरम् ॥२४१॥

रसालसदृशा तत्र रसालतरुमुन्नतम् ।
वरशालप्रांशुदेहस्तरसाऽलमगान्नृपः ॥२४२॥

विचित्रचैत्रप्रारम्भे शलाटुकरटिप्रभम् ।
पश्यन्ती तस्य महिषी मेने न नियतम्पदम् ॥२४३॥

कम्रास्त्ररसनिर्यातरसानायातसन्निधिः ।
अरुणोदानदीनाभ्यां पीता नेत्रैः करैरपि ॥२४४॥

विगाह्य दुग्धसरसि मुग्धौ मन्दरसानुगे ।
ननन्दतुर्नन्दने तौ चैत्रेऽमन्दरसानुगे ॥२४५॥

ततः शच्यर्चितौ तत्रामन्दमन्दारहारतः ।
विहाय मन्दरधरं मेरुमन्दरमीयतु ॥२४६॥

द्वीपाभिख्यकरो जम्बूवृक्षस्तत्र निरीक्षितुम् ।
यत्प्रसूनरसोद्भूता जम्बूर्नाम महानदी ॥२४७॥

---

१. क. मा. 'को' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तदीयजलसेकेन तदद्वयमुदुज्वलम् ।
अभवन् कनकं प्रोक्षि कनकप्रभयादरात् ॥२४८॥
अथ चैत्ररथारूढौ चैत्रिकोत्सवतत्परौ ।
रेजतुश्चित्रवेषौ तौ चित्राचन्द्रमसाविव ॥२४९॥
तत्र चैत्रवनोद्याने स्तवैश्श्रवणसुन्दरैः ।
किन्नराणामिमौ प्रीतौ मधुकुण्डमुपेयतुः ॥२५०॥
मधुकालोपभोग्यन्ताद्दिव्यम्मधुवधूरियम् ।
पीत्वा प्रियेण सहिता सौपार्श्वं पार्श्वमागमत् ॥२५१॥
तत्र व्यानपरीणाहमधुधाराप्रवाहितम् ।
कदम्बद्रुममासाद्य तौ विश्रममुपागतौ ॥२५२॥
आस्वादनीयमास्वाद्य तत इक्षुरसा जलम् ।
वैभ्राजके कतिदिनं व्यभ्राजेतामिमौ सुखम् ॥२५३॥
तत उत्तीर्य कुमुदं महान्यग्रोधशाखिनः ।
छायायां विलसत्कायच्छायच्छायौ निषेदतुः ॥२५४॥
तदुद्भूतनदामान्तावभीप्सितविहायितम् ।
मेनाते बहुनो सिद्धिः प्रार्थ्यमानपदाम्बुजौ ॥२५५॥
आरुह्य सर्वतोभद्रमाक्रीडं सुरयोषिताम् ।
शेषं वसन्तं विविधक्रीडाभिस्तौ व्यतीयतुः ॥२५६॥
एवं परीत्य भूगोलं प्रियया प्रियदर्शनः ।
परावृत्तो नरपतिः खण्डे भरतपालिते ॥२५७॥
ततोऽचिरेण कालुष्यस दनङ्गन्धमादनम् ।
तौ प्राप्य धर्मतनयौ देवदेवाववन्दताम् ॥२५८॥
अथ तत्र भवांस्तत्र भवन्नारदपारदः ।
प्रतिवातौ प्रचक्रे तौ रसायननियोगतः ॥२५९॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आलोक्य लोकान्कृपया यद्ब्रह्म द्रवताङ्गतम् ।
तत्रैवालकनन्दायां सस्नतुस्तौ यथाविधि ॥२६०॥

ततो वाराणसीमेत्य विश्वेश्वरविभूषिताम् ।
वितेरतुर्धनं भूरि स्नात्वाधिमणिकर्णिकम् ॥२६१॥

तावानन्दवनं प्राप्य तीर्थयात्राप्रसङ्गतः ।
व्यत्ययातां सुदीर्घाणि निदाघाहानि दम्पती ॥२६२॥

ततो नवरताश्लिष्टतुङ्गपीनपयोधरा ।
प्रमोदाय नृपस्यासीत्प्रावृट् च कनकप्रभा ॥२६३॥

सितासितसरिद्भेदसम्भेदेऽप्यवगाह्य तौ ।
कल्पान्तशिशुगोविन्दावासं ददृशतुर्वटम् ॥२६४॥

अन्यानि भारतस्थानि तीर्थान्यनुसरन्नसौ ।
प्रातिवाहितयान्वर्षाः पत्न्या हर्षादनुद्रुतः ॥२६५॥

समागतमिमं श्रुत्वा पौरामात्याः समागतम् ।
समागतश्चक्रुराशु समानेतुं समागतम् ॥२६६॥

एवं समस्तवसुधावलयं परीत्य
क्षोणीशमौलिमणिचुम्बितपादपीठः ।
स्निग्धाप्तपौरसचिवैरनुगम्यमानः
माहिष्मतीम्पुरमवापदसौ सदारः ॥२६७॥

सन्मङ्गल्यविधावधानमनसो विप्रान्पवित्रान्पुर-
स्कृत्योपायनपाणिपौरनिचये स्निग्धां दधानौ दृशम् ।
शृण्वन्तौ मधुराणि वारवनितागीतानि वीणास्वनैः
सौधं क्षेमम'वीक्षतां कतिपयैराप्तैस्समं दम्पती ॥२६८॥

---

१. क. मा. 'वि' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीमत्कूर्मधराधरेन्द्रवसति प्रख्यातपन्तान्वये
जातश्रीभवदत्तपण्डितवरः श्रीभार्गवी तत्प्रिया।
सर्गः पञ्चदशः समाप्तिमगमत्तत्सूनुना निर्मिते
काव्येऽस्मिन् कृतवीर्यसूनुचरिते तारापदाब्जार्पिते ॥२६९॥

इति श्रीसुकृतिदत्तविरचिते कार्तवीर्योदयमहाकाव्ये
प्रावृट्शरद्वर्णनं समुद्रविहारसप्तद्वीपविहार-
वर्णनन्नाम पञ्चदशः सर्गः[1] ॥

---

१. इति श्रीकिरातक्षत्रियकुलोत्पन्नस्य मेच्यञ्चलपाँचथरलालीखकं-घरडाँडाग्रामवास्तव्यदोवालीछाचामलिङराईकुलोद्भूतस्य डा. स्वामिप्रपन्नाचार्यस्य कार्तवीर्योदयसम्पादने पञ्चदशसर्गस्य टिप्पणीपाठभेदादिकं समाप्तम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कार्तवीर्योदयमहाकाव्ये

षोडशः सर्गः

यदीयकरुणाझरीपृषतमात्रमासादितं
सदाऽप्रतिहतेच्छया हरिहरौ चरीकर्ति च ।
ममोदरदरीदरेदरविकाशितेत्थादरात्
समस्तजनतारिणीपदयुगं दरीदृश्यताम् ॥१॥

मन्वाद्युदीरितपथेन महीमहीनां
तस्मिन्प्रशासति नृपे सति मर्त्यलोकः ।
धीरो यथा चरमसर्गमुपेत्य नाना-
च्छन्दःप्रपूर्तिमकरोदकरोधमेन ॥२॥

आतेनिरे सर्वविशो विशोधिता
बहिःसदान्तश्च महीक्षितामुना ।
वर्णाश्रमाचारनिषेवणोद्भवाः
पुण्याख्यसोपानपरम्पराःपराः ॥३॥

कदाप्यकार्यस्मरणोत्सुकाःप्रजा
विदन्नसौ योगबलेन भूपतिः ।
सहस्रबाहुर्हृतचापसायको
जहार पापस्य मनस्यपि स्थितिम् ॥४॥

प्रागभावपरिपालनन्नृणां
पातकस्य विदधन्महीपतिः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

देहधारिभिरलङ्घ्यशासनो
नित्यकर्मसदृशो निरीक्षितः ॥५॥

निरीतिभीतिस्थितिशालिराज्यं
निर्भोगिदं शं गतरोगदेहम् ।
सबालगेहं सुरलोककल्पम्
आकल्पकीर्तेः प्रबभूव तस्य ॥६॥

दुराग्रहाच्छक्रकृतेऽप्यवग्रहे
नवग्रहे कुप्यति चानवग्रहान् ।
वर्षन्स भूरीणि[1] जलानि मानवान्
निजप्रभावेण चकार भूपतिः ॥७॥

वह्निस्वरूपेण पपाच सोऽन्नं
पर्जन्यरूपेण ववर्ष काले ।
वायुस्वरूपेण जहार खेदं
प्रकाशयामास स पुष्पवन्तौ ॥८॥

स्नेहं वितन्वन्निरुपाधिरूपं
सम्प्रीणयन्सूनृतवाक्यजातैः ।
भयं सभञ्जन्नखिलप्रजानां
पिता च पुत्रश्च पतिश्च जज्ञे ॥९॥

कृष्टाभिघातो विविधौषधीषु
शूलस्थितिः शङ्करहस्त आस्त ।
वृत्तिर्नृणां विग्रहयुक् च शास्त्रे
तस्मिन्नृते चाद्रिषु गण्डमाला ॥१०॥

---

१. क. म. 'नि' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्मितोत्तरं भाषितमीक्षितञ्च
कृपाप्रवाहप्रसृतं प्रजासु ।
धर्मोपदेशव्यपदेशनञ्च
निर्व्याजमेतस्य बुधप्रवर्ण्यम् ॥११॥

आमन्त्रिवर्गादपि चाश्वपाकाद्
यथायथं साधु कृतौ नियुक्तः ।
तेन प्रतेने सुकृतन्नृलोकः
राजापि षष्ठांशमवाप तस्य ॥१२॥

शुद्धस्य मुक्तस्य परात्मनोऽस्य
षष्ठांशलिप्सा न निमित्तमासीत् ।
नियोजने साधु कृतौ नराणां
तद्बुद्धिधीर्षैव परन्निमित्तम् ॥१३॥

निराकृतो वर्णगणादवर्ण-
संस्थापितो मुख्यतयापि तत्र ।
विशेषविज्ञेन कथन्नृपेण
मन्येऽक्षरत्वेन सपद्यते स्म ॥१४॥

यो मातृकागामितया प्रसिद्ध-
मञ्चागमज्ञैरपि दुस्त्यजस्त्र ।
अवर्णमेनं स्वरभिन्नभिन्नम्
अन्विष्य विक्षन्निजघान वर्णे ॥१५॥

स्थाने कृतव्याकरणस्स राजा-
नाख्यातमङ्गं विनिधाय कञ्चित् ।
न्यहन्त पादाग्रगतं समस्त-
माख्यातमेघादियुतं विचार्य ॥१६॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वण्टं विधित्सन्मुनिराददे यन्
मूर्द्धन्यशब्दन्न पदान्तभाजम् ।
राजा स तद्गौरवमीक्षमाणो
व्यवाहरद्धीरतरो यथा स्वम् ॥१७॥

मूर्द्धन्यतामेष नयन्पदान्त-
स्थितं सवर्णं पदपूर्वभागे ।
भितन्नुदन्तं प्रथमोपसर्ग-
न्तद्धीनयन्बा[1]ह्किवाग्विरूढः ॥१८॥

तस्मिन्नृपे शासति धर्मतः क्ष्मा-
मवृष्टिरावृष्टिरपि प्रजानाम् ।
दुःखे सुखे मूषकमोचकत्व-
मकार्यचिन्तासु जगाम तासाम् ॥१९॥

विशालभानां शलभाः प्रजानां
शुकाः शुकं कार्यकृताञ्च चक्रम् ।
चक्रा[2]वतारेण सदा विनाना-
न्नोपद्रवाय प्रबभूवुरीयत् ॥२०॥

धर्मार्थकामाननुवेलमित्थं
परस्पराबाधितमाभजन्सः ।
चक्रे प्रजास्स्वात्समशीलभाजो
धर्मावनायैव हि सोऽवतीर्णः ॥२१॥

---

१. अत्र 'बाहिक' शब्द ईककि कृते 'बाहीक' इति प्रसिद्धः । कविना चात्र ह्रस्वः प्रयोगः कृतः । तात्पर्यान्तरेण भाव्यम् । पुङ्गवत्वेन विवक्षितो वा वहधातोः ठकि रूपम् ।

२. कार्तवीर्येणेत्यर्थः । कार्तवीर्यो हि हरेश्चक्रावतारत्वेन ख्यातः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सप्तार्णव......मेखलनस्य राज्यं
मित्राणि वासवमुखा विवि¹धा महिष्यः ।
क्षीरोदजात्र नवमूर्तय एव सम्पद्
स्पृह्याधनाधिपतिनापि किमूनमासीत् ॥२२॥

किन्नो वनीय²कगणोऽवनिनाथ केन्द्रात्
अस्मादवाप मनसेक्षितमप्यलभ्यम् ।
को वावनीपतिरपि प्रतिकूलचेता-
भेत्ता बभूव मरणे रविमण्डलस्य ॥२३॥

एकस्स एव भुवनेषु भवन्नुदात्तः
प्राचो रिपून्न्यहनदाश्रितसुप्रतीकाम् ।
तत्कालभूपतिगणे सति शिष्टताप्तः
सोऽयं सदा भवतु नैव कथं बलीयान् ॥२४॥

अस्यैवमैश्वर्यपरम्पराणां
दिने दिने भोक्तुरधीश्वरस्य ।
वीराः प्रवीरा यदुराजवंश-
स्यासन्करीरास्तनयास्सहस्रम् ॥२५॥

एका द्वितीया चतुरः स्म सूते
सुतांस्त्रयीवर्णविधीनिवास्य ।
क्षेमङ्करान्पञ्चजनेषु विष्णो
यां षष्ठमूर्तिर्न शशाक हन्तुम् ॥२६॥

चत्वार एतेऽम्बुधयो यथोर्मि
महीमहेन्द्रस्य गभीरसत्त्वाः ।

---

१. क. मा. 'बु' इति पाठः ।
२. वणिक्समूह इत्यर्थः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सपक्षगोत्रावनशीलभाजः
 समाश्लिषन्मानसवृत्तिधारात् ।।२७।।

धात्रीकरासञ्जितमञ्जुवेषा-
 नस्पष्टवर्णं वदतस्तनूजान् ।
उत्सङ्ग आधाय निमीलिताक्षः
 स्पृशत्कराग्रैर्मुमुदेतरां सः ।।२८।।

एवं पितॄणामृणतस्तनूजै-
 रार्षादृणाच्छैशव एव मुक्तः ।
सद्विद्यया देव-ऋणावशेषं
 महाध्वरैः शोधितुमैच्छदेषः ।।२९।।

नवद्वयद्वीपपवित्र[1]भूमयः
 ततो नृपस्यास्य पुरोहितादिभिः ।
सुवर्णसीताङ्कितसीरकर्षणैः
 समीकृता अध्वरकर्मसिद्धये ।।३०।।

ता आस्तृता हाटकजेष्टकागणै-
 रारोपितास्तत्र च विद्रुमोद्भवाः ।
यूपे निबद्धं शरदभ्रसुन्दरं
 मुक्तामयं तत्र वितानमद्भुतम् ।।३१।।

वाटश्च शृङ्गाटककुड्यकं ना
 न हाटकीयं घटितं तदध्वरे ।
मुक्ताविमुक्ताक्षतकर्मसिद्धये
 मुक्तानमुक्तान्विदधे मनोरथैः ।।३२।।

---

१. क. मा. 'क्षि' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वीपेषु सप्तस्वपि सन्नियोजिता
नराधिपास्तेन निमन्त्रितास्तदा ।
आज्ञां तदीयां शिरसा समावहन्
उपायनान्यौष्टुकवाडवादिभिः ॥३३॥

विशन्स तस्याध्वरकोशगेहं
राजन्यकानामुपहारभारः ।
नोद्रेचयामास पयःप्रवाहः
सरिद्वराणामिव सिन्धुमध्यम् ॥३४॥

अथागता यज्ञविधानकोविदाः
परस्सहस्रायुत[1] ये[2] निमन्त्रिताः ।
दिवो धरण्या वसुधातलादपि
प्रैक्षं तदन्तेन पुरस्कृता नृपम् ॥३५॥

ततो नृपेणाभरणाम्बरादिभिः
वृतास्सहाङ्गश्रुतिमार्गकोविदाः ।
आत्रेयमुख्या मुनयो यथायथं
प्रारेभिरे कर्म यथोदिते दिने ॥३६॥

यज्ञीयदीक्षां समधिश्रितो नृपः
स कृत्तिवासाः कुशमेखलावृतः ।
स दण्डपाणिर्मृगश्रृङ्गसंयुतः
जितासनो मेध्यमितासनो बभौ ॥३७॥

ज्येष्ठा गरिष्ठा गुणसम्पदापि
प्रेष्ठा श्रविष्ठेव मनोज्ञरूपाः ।

---

१. क. मा. 'च' इति पाठः ।
२. क. मा. 'यो' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वावातिकाभिर्विधुतेन तेन
सहासिधाराव्रतमाचचार ॥३८॥

तौ दम्पती यज्ञफलस्य सिद्धौ
शमे दमे चानुपमे प्र[1]वीणौ।
गुरूपदिष्टं व्रतमाचरन्तौ
गौरीगिरीशाविव तेपतुः प्राक् ॥३९॥

कल्पा[2]तिक[3]ल्पैः परिकल्पिते च
विकल्पवादोऽप्यनुकल्पवादः।
न च क्लृपेनाप्यपशब्दशङ्का
शब्दस्मृतिज्ञैस्सहिते सदस्यैः ॥४०॥

औदुम्बरी सर्वत एव वेष्ट्या
द्वीप ऽ प्रदेय ऽ प्रतिषूपमेवम्।
लोपः श्रुतेर्मूलमितीरितं यत्
मी[4]मांसकैरांशिकदोषविद्भिः ॥४१॥

श्रुत्यप्रमाणत्वकरो हि लोभः
जनस्य यष्टुर[5]नुयाजकानाम्।
नि[6]वारयामासुरिति प्रगल्भाः
ते स्थूललक्ष्यस्य सदस्यताप्ताः ॥४२॥

---

१. क. मा. 'व्रविणौ' इति पाठः।

२. क. मा. 'पे' इति पाठः।

३. कल्प्यते समर्थ्यते यागप्रयोगोऽत्रेति व्युत्पत्तेः, आश्वलायनापस्तम्बबोधायनादिसूत्राणामनुरूपमेवानुष्ठितमिति। कल्पसूत्रं हि मन्त्रविनियोगेन क्रत्वनुष्ठानमुपदिश्योपकरोति। (ज्ञ. भा. पृ. ५०)

४. मीमांसा — पूजितविचारः।

५. क. मा. 'मं' इति पाठः।

६. क. मा. 'निर्द्वा' इति पाठः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

येऽप्यर्थ[1]वादाः श्रु[2]तिषूदिताङ्गैः
अथौघसाध्यान्प्रविधाय तांश्च ।
अनर्थवादान्समचीक्लृपंस्ते
सभ्यानवेन्द्रस्य महार्थराशेः ॥४३॥

सपौर्ण[3]मासः परिपूर्णकामः
दर्शञ्च चक्रे जनवासनीयः ।
सो[4]मञ्च सौम्यस्स्वयमेव मेध्योऽ-
श्व[5]मेधसङ्घञ्च निरन्तरायम् ॥४४॥

सवाजपे[6]यं लसवाजपेयं
ध्यायन्ति चक्रे कृतवीर्यसूनुः ।

---

१. स्तुतिनिन्दापरकं वाक्यमर्थवादः ।

२. निरपेक्षो रवः श्रुतिः ।

३. 'पूर्णमास' शब्दे 'मास' शब्दस्य 'चन्द्र' इत्यर्थः । स पूर्यते यस्मिन् तत् अहः पूर्णमासः । 'दर्श' शब्दस्यामार्थः । दर्शश्च पूर्णमासश्च दर्शपूर्णमासौ । दर्शपूर्णमासावधिकृत्य क्रियमाणो यागः (बौ. श्रौ. सू. भू. पृ. ३२) । तथात्र पूर्णिमायां प्रधानयागेषु अग्निः, विष्णुः, प्राजापत्यः, अग्नीषोमेषु–अन्यतमा चेति देवताः । दर्शे च–अग्निः, इन्दुः, इन्द्राग्नी वेति देवताः (अ. लो. पृ. ६०) तत्रापि प्रकृतिविकृतिभेदेन यागस्य बहुप्रकारत्वं विवक्षितम् । प्रकर्षेणाङ्गोपदेशो यत्र क्रियते सा प्रकृतिः । प्रकृतेर्भागत्रयमग्निहोत्रम्, इष्टिः, सोमश्च । विकृतेरपि विविधभेदास्सन्ति । 'सुवर्गाय हि लोकाय दर्शपूर्णमासाविज्यते' (तै. सं. २।२।४।४) । काव्यप्रसङ्गे कार्तवीर्येणापि वैदिकान्येव कर्माणि विहितानीति ।

४. 'सोम' शब्दः क्षीरिण्यां लतायां रूढः । अभिषचनीयाख्यः कश्चन सोमयागः । तत्र सोमलताया उपयोगः । (अ. लो. पृ. ४०)

५. अश्वमेधोऽपि यज्ञविशेषः । मीमांसातथशतपथादिषु बहुलप्रकारेण व्याख्यातम् ।

६. 'अन्नं वै वाजः' अत्र 'वाज' शब्दोऽन्ननामसु पठितम् । पातुं योग्यं पेयं । वाजस्य पेयं वाजपेयं । वाजपेयं प्रयुज्यते यत्र स वाजपेययागो यज्ञो वा । 'शरदि वाजपेयेन स्वाराज्यकामो यजेत' (मी. द. १०पा. ७ सू. ५१ शा. भा.) ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सपुण्डरीकाक्षनिविष्टचेताः
सत्पुण्डरीकाण्यमितानि चक्रे ॥४५॥

स विश्व[1]जिद्विश्वजिताप्ययष्ट
दत्त्वापि सर्वस्वमसौ प्रपूर्णः ।
सङ्कल्पमात्रागतकोशवास-
कृतप्रतिज्ञाकरवित्तजातैः ॥४६॥

आहूतमस्याध्वरभागभुक्त्यै
समागतं दैवतवृन्दमद्धा ।
निवेदितं भक्तिमता नृपेण
प्रत्यक्षतस्स्वस्वमवाशमागम् ॥४७॥

अयुतं प्रददौ युतस्सपत्न्या
शतलक्ष्यप्रभिदेष लक्षकञ्च ।
शतकोटिकरप्रियश्च कोटिं
प्रति विप्रं सर्वपर्वपूर्तिषु द्राक् ॥४८॥

यथाकथञ्चित्परिमार्जितार्था-
वसानभाजः प्रथमार्द्ध एव ।
साटोपशब्दै रुचितार्थहीनैः
प्रपूरिताः केवलमुत्तरार्द्धे ॥४९॥

नृपान्नराणां कृतवो निबन्धा-
धीरान्तराणां विलसन्तु नाम ।
आरम्भणादा च समापनाच्चा-
व्युच्छिन्नरम्यार्थपरम्पराभिः ॥५०॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१. विश्वजित् प्रसिद्धयागविशेषः ।

दिने दिने वृद्धियुताभिरिद्धाः
श्रीकार्तवीर्यस्य कवीश्वरस्य ।
यज्ञा निबन्धाः शतशः प्रयान्तु
द्वीपेषु सप्तस्वपि केन साम्यम् ।।५१।।

विशेषकम् ।

यज्ञावसाने सहधर्मपत्न्या
सस्नौ स गङ्गादिसरिद्वरासु ।
विश्राणयामास च कोशजातं
द्विजातये वैश्रवणोपमेयः ।।५२।।

एवं प्रतिद्वीपमसौ व्यधत्त
विधातृकल्पैर्मुनिभिः परीतः ।
निरन्तरायानमितान्स यज्ञान्
यज्ञेश्वरप्रीणनमात्रकामः ।।५३।।

श्रौतान्स्मृतिस्थानपि सप्ततन्तून्
एवं स तन्वन्नृपतिः कदाचित् ।
सम्प्राथितो भूसुरदेहभाजा
सुराननेनेति रहः प्रपेदे ।।५४।।

अनारतावृत्तभवक्रतूनां
हव्याचलन्पादविहीनशक्ते ।
ममौषधं देहि समग्रभूमी
पदाशनं शक्तियुतस्ततः स्याम् ।।५५।।

युग्मम् ।

द्वीपेषु सप्तस्वपि वर्तमानम्
अप्राणिजातं प्रतिभुङक्ष्व सर्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न ते निरोद्धा भवितेति राजा
तमादिदेशाप्रतिमप्रभावः ॥५६॥

एवन्नृपाज्ञामधिगत्य जि[1]ह्वा
प्रसार्य सप्ताप्यकृशः कृशानुः ।
ग्रामान्निवेशान्पुरपत्तनानि
वनानि चादग्ध विहायसासून् ॥५७॥

उद्भूतधूमापिहितान्तरिक्षं
दन्दह्यमाना[2]खिलवस्तुजातम् ।
आर्तस्वराक्रन्दनशेषजन्तु
युगान्तवत्प्रैक्षि जगत्तदानीम् ॥५८॥

सर्वाम्महीम्प्रोषति वीतिहोत्रे
समीप्सितं कोऽपि किमपि वस्तु ।
वचो जगाद क्षितिपोऽपि सेहे
नासाध्यसिद्धौ यतते हि धीरः ॥५९॥

प्रदाय भिक्षामिति बा[3]हू ये स ?
सप्तार्णवद्वीपवतीन्धरित्रीम् ।
पुनर्यथापूर्वमिमाञ्च चक्रे
योगप्रभावत्किमसाध्यमस्य ॥६०॥

एवं स दैव्यादृणतो विमुच्य
सुरैस्समग्रैरपि भूसुरैश्च[4] ।

---

१. क. मा. 'हि' इति पाठः ।
२. क. मा 'विल' इति पाठः ।
३. क. मा. 'व' पाठः ।
४. भूसुरा ब्राह्मणास्तै ब्राह्मणैरित्यर्थः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आशीर्वरौघैरभिनन्द्यमानः
प्रत्याजगाम स्वपुरीं स राजा ॥६१॥
राजाधिराजविरुदावलिराजमानः
मानोन्नतो नतसमस्तनृपानुयातः ।
दत्तादिभिर्मुनिवरैश्च सभाज्यमानः
भेजे सभां दयितया सहकार्तवीर्य्यः ॥६२॥

हेमाद्रिशृङ्गमिव तुङ्गतरं विचित्रं
सिंहासनं समधिरोहति राजसिंहः ।
वामे प्रभञ्जन[1]सुतस्थितिमाप पार्श्वे
दक्षे गुरुश्च पुरतः कनकप्रभा स्तः ॥६३॥

अष्टासु दिक्षु जयशब्दमघोषयन्तः
क्षेमङ्करीप्रमुखशक्तियुताश्च वीराः ।
बाह्ये पुरन्दरमुखा विबुधास्सहस्राः
श्रीराजराजशुभचिन्तनतो व्यराजन् ॥६४॥

तद्बाह्यतो धरणिमण्डलपालपाली
माहिष्मतीशपदभक्तिभ[2]रावनम्रा ।
कल्पान्तवर्धितमहोदधितुल्यदोषं
तद्बाह्यतस्समसदच्चतुरङ्गसैन्यम् ॥६५॥
भासा दिनेशस्य दिने दिनेऽभू-
देवं नरेन्द्रस्य सभास्थितिस्सा ।
ध्यायन्ति यां कल्मषनाशनाय
भक्ता विरक्ता विषये परस्मिन् ॥६६॥

---

१. प्रभञ्जनो नाम वायुस्तस्य सुतो हनुमानित्यर्थः ।
२. क. मा. 'म' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कदाचिदग्रे सदसो विराजन्
बुधानमात्यान्विबुधान्प्रजाश्च ।
विलोकयन्स्नेहरसार्द्रदृष्ट्या
वृष्ट्यामृतस्येव गिरान्वशात्स: ॥६७॥

अस्त्येकमेवाखिललोकवल्ली
कन्दं पदन्नात्र विवादमार्गः ।
अशक्यनिर्माणमिदं यदन्यैः
त्रैलोक्यपत्न्यः परिपश्यतैव ॥६८॥

नानापि तन्नो यदनेककर्तृ-
जगद्यदि स्यान्नियतन्नहि स्यात् ।
स्पर्द्धाविवादैरथवाऽनवस्था
जायेत लोकस्य तथाऽव्यवस्था ॥६९॥

अचेतनन्तद्यदि त्वित्थ सृष्टिः
विशः कृमीणामिव चेतनानाम् ।
ईक्षा[1]न्विता सृष्टिमुदाहरन्ती
युक्तिश्रुतिश्चापि विरुध्यतेऽद्धा ॥७०॥

अचेतनं कर्म तथा प्रधानं
पिल्वादि वा कर्तृ ततो न वित्थ ।
क्रियानसौ विक्रियते निरंशः
क्रियां प्रकृत्येति तु तुल्यदोषम् ॥७१॥

---

१. ईक्षापूर्वकजगज्जन्मादिकारणं ब्रह्मैव न तु प्रधानमिति । अयमेव कवेराशयः प्रतीयते । एनकस्य विषयस्य विशदविचारः वेदान्तनयभूषणग्रन्थे (वे. न. भू. १. अ. १।१।५) द्रष्टव्यः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तच्चेतनं क[1]र्तृ जगत्त्रयस्य
  नित्यञ्च न व्यापकमभ्युपेयम् ।
तत्तन्तुवत्स्थाद्यदिमेयनाशि-
  क्वचित्कदाचित्प्रभवेद्भवोऽपि ।।७२।।

अजन्मनाशोऽस्ति भवप्रवाहः
  न लीयतेऽपि प्रलये पुरेव ।
यद्वासनारूपमिमन्निरोद्धु-
  मीष्टे न शिष्टेऽपि हरौ नृणां सः ।।७३।।

रज्जौ भुजङ्गप्रतिभेव सृष्टिः
  समीहितैवास्ति सदा परस्मिन् ।
न मुच्यते किं प्रलयैकचिन्ता
  सदाभ्रराजीव कथा समाना ।।७४।।

आत्मायमानन्दमयस्सनातनः
  प्रियः शरीरेन्द्रियचित्तभिन्नः ।
न भिद्यते कारणतो हि कार्यं
  को वा घटं वेत्ति मृदो विभिन्नम् ।।७५।।

यत्कारणञ्चेतनमामनन्ति
  तदेव कार्यं जगदभ्युपेतः ।
सदेव मा[2]याकृतनामरूपैः
  आविर्भवत्येतदवाप्य कालम् ।।७६।।

---

१. उपादानगोचरापरोक्षकृतिमत्वं कर्तृत्वम् । तच्चाचेतने न सम्भवति ।

२. या=मा नास्ति सा माया । तया कृतन्नामरूपादिकञ्जगदिति । अस्ति, भाति, प्रियनामरूपात्मके प्रपञ्चे यदेव नयनगोचरीभवति तन्मायाकृतनामरूपात्मकैः पदार्थैरित्यर्थः । अत एव 'अनादित्वे सति भावते सति ज्ञाननिवर्त्यत्वं' लक्षणमुक्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सतस्सदुत्पत्तिरितीह मार्गः
पुतोऽसदुत्पत्तिरिति स्वमार्गः ।
सर्वत्र सर्वार्थिजना प्रवृत्तोः
तैलस्य यत्नात्सिकतास्वलाभात् ॥७७॥

उत्पादिका यत्र च यस्य शक्तिः
तदेव तत्कारणमुच्यते चेत् ।
स्याच्छक्तिशक्तिश्च ततोऽनवस्था
सत्कार्यवादो यदि नैव सा स्यात् ॥७८॥

शक्तिर्न भिन्ना समवायिहेतोः
पृथङ् न केनाप्यनुभूयते यत् ।
पृथङ्नभात्ङ्कुथमस्तु भिन्नं
तद्व्यक्तिभेदो नहि तत्र लोके ॥७९॥

श्रुतिप्रसिद्धा विविधास्ति शक्तिः
त्रिलोकगेहस्थपतौ परेशे ।
एकत्वमप्यागममार्गरूढं
विरुध्यते नोक्तपथानुसारात् ॥८०॥

श्रुतिस्मृतिभ्यां प्रतिकूलगामी
'त[२]र्कोऽप्रतिष्ठां' लभते निकृष्टः ।
तत्सम्मतार्थप्रतिशोधहेतुः
तर्को विशिष्टां लभते प्रतिष्ठाम् ॥८१॥

---

१. 'पुतः' इति जैनानां दार्शनिकसिद्धान्तः । ते हि 'पुद्गल' द्वारा सकल-सृष्टिमामनन्ति । पुद्गलास्तिकायः षोढा, पृथिव्यादीनि चत्वारि भूतानि स्थावर-जङ्गमञ्चेति । अत एवाक्षता पुता न सदुत्पद्यत इति कवेराशयः । विस्तरेण (वेदान्तनयभूषण पृ. १८५) द्रष्टव्यम् ।

२. सूत्रमिदन्निर्मितं पाराशर्येण व्यासेन । [illegible]म् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्व्यणुकः प्रथमं प्रजायते
परमाणुद्वययोगतः कथम् ।
क्रियया हि विना न योजना
परमाण्वोः कृतिमन्तरा न सा ॥८२॥

कृतीश्वरमायादि ध्रुवा-
वतनस्यात्प्रलयः कदाचन (?)
यदि जन्मयुता तदा कथ-
न्नियतौ सृष्टिलयौ विभाव्यताम् ॥८३॥

अथ जीवगता कृतिस्तदा
नहि सिध्येन्नरकादिदुःखदम् ।
न तदा मतिरस्ति जीवगा
न च वाञ्छास्ति कुतस्तरां कृतिः ॥८४॥

निरंशपिल्वोर्यदि योग इष्टः
विलक्षणस्स्यात् द्व्यणुकऽप्रपञ्चः ।
अथांशवत्त्वं यदि पीलुजातेः
गतावतास्याः परमाणुतापि ॥८५॥

गुणस्तु शुक्लादिरुपैति कार्ये
पीलोः प्रमाणन्नहि कात्र युक्तिः ।
निर्युक्तिकोऽयं परमाणुवादः
परेऽपि वादास्सदृशा अनेन ॥८६॥

स्मराम्यहं तत्पुरतोऽनुभूतं
कृतं मया चेत्यनुसन्दधानः ।

---

१. पीलुवादी वैशेषिकः पिठरपरमाणुवादी नैयायिकः । (वै. न. भू. १७१–१८१) द्रष्टव्यः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वैना[1]शिको नासिकया विहीनः
प्रपान्नधत्तोऽनुभवापलापी ॥८७॥
प्र[2]त्यक्षस्य प्रमाणं वदन्तः
प्रामाण्यञ्च स्वोक्तिषु स्थापयन्तः ।
शोकामोदोपवित्रकातो दधाना
वृद्धोक्षास्ते नैव सम्भावणीयाः ॥८८॥

विव[3]र्तमानञ्जगदीश्वरे त-
दनाद्यविद्याकृतविभ्रमेण ।
विद्याविलासेन विचार्यमाण-
माभात्यधिष्ठानविशेषरूपम् ॥८९॥

सन्तः पुरुषार्थचतुष्टयं यद्
वदन्ति तत्राप्यमृतं प्रधानम् ।
उत्कर्षनाशाप्रतियोगितायाः
तत्सिद्धये तत्प्रयतेत विद्वान् ॥९०॥

वदन्ति तन्नित्यसुख[4]प्रकाशं
केचित्तथात्यन्तिकदुःखना[5]शम् ।

---

१. बौद्धानामेकदेशी । (वे. न. भू. १८१–१८४) द्रष्टव्यः ।

२. क. मा. 'प' इति पाठः ।

३. विवर्तवादिनोऽद्वैतवेदान्तिनः । अधिष्ठानविपरीतरूपेण वर्तत इति विवर्तः । परञ्च 'विवर्त' शब्दस्य परिणामार्थोऽपि लभ्यते । प्रकृते च 'विवर्तमान' शब्दस्य परिणममानञ्जगदित्यर्थकरणे कविवरस्य तात्पर्यमवगम्यते । तत्र पूर्वरूपा-परित्यागेन–असत्यनानाकारप्रतिभासो विवर्तः, यथा शुक्तिशकले कलधौतस्य, रज्जौ काकोदरप्रतीतिः । पूर्वरूपपरित्यागे सति नानाकारप्रतिभासः परिणामः, यथा क्षीरस्य दधि प्रतिभासः (क्र. भा. भू पृ. १३७) ।

४. नित्यसुखप्रकाश इति भाट्टा अभ्युपयन्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

५. आत्यन्तिकदुःखनाशः कापिला अभ्युपगच्छन्ति ।

सदा चिदानन्दमयस्वरूपा-
वाप्ति वयं मुक्तिमुदाह[1]रामः ।।६१।।

न कर्मणा न प्रजया न वित्तैः
सा प्राप्यते तत्त्वधियं विहाय ।
ऐक्यावगाहि प्रमितिः परस्य
जीवस्य सा तत्र निदानभूता ।।६२।।

श्रुतिस्मृतिभ्यां प्रतिबोधितायाः
तदेकतायाश्च सदातनायाः ।
का हेतुता तत्त्वधियीति चोद्यन्-
नाज्ञानभूभेदविभेदहेतौ ।।६३।।

बन्धो विमुक्तिश्च नवास्तवौनृ[2]णां
स्वप्नेक्षितद्वीपिभयञ्च्युती यथा ।
एवं विधा तत्त्वमतिश्च कीर्तिता
विनाश्यभिन्नत्वधियं विनश्यति ।।६४।।

अवाप्यते मुक्तिरसौ सदास्थिताऽ-
पूर्वेव विद्वद्भिरविद्ययोज्झितैः ।
स्वकण्ठगविस्मृतभूषणस्य हि
प्राप्तिः परोक्त्या प्रथितास्ति भूतले ।।६५।।

वर्णाश्रमाचारविधानशुद्धाः
श्रुत्वा श्रुतिभ्योऽप्रतिकूलतर्कैः ।
निश्चित्य चात्मानमभिन्नमीशाद्
ध्यायन्ति धन्याः सततं विमुक्त्यै ।।६६।।

---

१. ग्रन्थकारस्तु– अद्वयानन्दसमयमभ्युपयते ।
२. क. मा. 'तृ' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वेत्तुश्च वेद्यस्य विदो विभागविद्
न विद्यते यत्र विदिश्रुतौ श्रुता ।
आनन्दसन्दोहरवनीजनिस्सा ?
सा मुक्त्यवस्थाऽखिलदुःखनाशिनी ॥९७॥

श्रेयोभिरन्यैर्जलबुद्बुदाभैः
उपक्रिया का परमार्थदुःखैः ।
निःश्रेयसन्नित्यमनोमजध्वं
नास्मात्परं श्रेय उदाहरन्ति ॥९८॥

इत्थं सदःस्थाननुशास्य सर्वान्
प्रेमप्ररूढाश्च परम्पराभिः ।
तेषां सहैवावनिपालमौलि-
रुत्तस्थिवान् भोजसुतासमेतः ॥९९॥

इति नरपतिरत्नादात्तमोक्षोपदेशे
मननमिव विधातुं भास्वता देववृन्दे ।
गतवति सुविविक्तन्देशमानन्दभाजौ
विधुकरविशदान्ताञ्चन्द्रशालाङ्गतौ तौ ॥१००॥

प्रथमपतितभासा चान्द्रमस्याति शुभ्रम्
द्विरदरदकृतं तौ मञ्चमारुह्य तुङ्गम् ।
स पुलकभुजवल्लीवेल्लिताङ्गौ क्रमेण
जगदतुरिति वाचं शीतरश्मिप्रशंसाम् ॥१०१॥

प्राचीवारवधूनिशामुखकृतालङ्कारसन्दर्शनः
वृत्तादर्शविमर्शकारणमिदं विम्वं सु[1]धांशोरलम् ।

---

१. क. मा. शु इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लोकालोकधराधरावधिधराप्रोत्तुङ्गमभ्रोर्ध्वग-
स्त्वत्कीर्तिव्रततिप्रसूनविलसद्गुच्छायते एवच्छतः ।।१०२।।

चञ्चूचुञ्चुचकोरचारुचरितप्राप्तात्पपीतप्रभ-
प्रत्यग्रोदितशीतरश्मिनिकरं तन्वङ्गिबिम्बं विधोः ।
तृष्यद्भूपकुलेक्षणक्षणसुखापीतोन्मिलत्केशर-
क्षोदोद्वर्तनपाणिपीडनमहस्तद्वक्त्रवद् दृश्यते ।।१०३।।

मित्रेऽदर्शनताङ्गते मधुकरव्रातार्भकाच्छादितो-
त्सङ्गां तत्करसङ्गसौख्यविरहात्सङ्कोचितां पद्मिनीम् ।
राजायं प्रतिबिम्बित ः प्रतिगतस्तद्वासतोयाशये
गोभिर्हृद्यतमाभिरदुहृदयत ः प्राश्वासयन्वर्तते ।।१०४।।

भ्रष्टे स्वामिनि वारुणीचरणतस्साद्धं वसूनां गणैः
मीलत्यत्र कपाटपाटववती दीना सती पद्मिनी ।
राजानं पतितं पदेऽपि न मुखं सन्दर्शयन्ती स्फुटं
मध्ये धन्यतमेत्यगण्यमहिमश्रीभोजकन्ये भुवि ।।१०५।।

एतस्मिन्ननुरज्यते प्रतिदिनं सा रोहिणीभान्विता
राजायं सरसान्तरो वितनुते नक्षत्रवृन्दे दयाम् ।
सन्तापं हरते नृणां मृदुकरैर्दत्तो बुधेभ्योऽमृतं
स्वाच्छन्द्यातिलसत्तमो रिपुगणं हंत्येषतुल्यस्त्वया ।।१०६।।

एनं क्षीरसमुद्रमन्मथभवं हैयङ्गवीनन्नवं
त्रैलोक्योद्धरणोल्लसद्व्यतिकरश्रान्तस्य विष्णोः पदे ।
श्रीलक्ष्मीपितृधवो भयान्वयहिता संल्लापयत्यादरा-
द'द्रौ सत्कुलजातपङ्कजदृशामौचित्यमेतन्मतम् ।।१०७।।

---

१. क. मा. 'द्रा' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एतत्पीयूषभानोरुदरदरमिलन्मैल्य[1]मालोक्यते य-
स्त[2]द्रंकुं प्राहुरेके सलिलनिधिभवं पङ्कमन्ये कलङ्कम् ।
केचिद्भूच्छायमन्ये रजनिजनितम॰पीतमाचक्षते च
तत्त्वं वैमत्यधुर्य्यैबुधमतमतिमानार्य्यपुत्रो ब्रवीतु ।।१०८।।

शृङ्गाराम्भोधिमध्योच्छलदमलतरालोलकल्लोलमाला
कल्पापाङ्गावलोकेशवधरहृदये नीलिमालक्ष्यते यः ।
तं मन्येऽहं त्वदीयाननधृतसुषमा निर्जितस्यास्य नित्यं
सन्तप्ता[3]ग्निप्रभूताद्भुतविधुतरयोः धूमधूमाञ्जनाङ्कम् ।।

स्यात्सम्भावनया प्रभूततमया पङ्कादिशङ्काविदां
चन्द्राङ्के मम चेतसि त्ववरता[4]त्वेकैव सम्भावना ।
त्वद्वैरिक्षितिपालवामनयनावैचल्यदुःखक्षणा-
क्षिप्तप्रेक्षणमार्गणव्रणकिणो जागर्ति सोमोदरे ।।११०।।

आसीत्पूर्वमिदं भृतञ्च सुधयाऽमत्रं विधोर्मण्डलं
त्वद्वक्त्रं विरचय्य तच्च विजहौ पीयूषरिक्तं विधिः ।
तस्मिन्नलग्नसुधालवादनरसादद्यापि नैवोज्झति
मध्यन्तस्य पिपीलिकान्वयपुरीरङ्कादिशङ्काकुटी ।।१११।।

एतल्लोमसमुद्रमध्यविचलड्डिण्डीरपिण्डप्रभं
रात्रिश्यामलतावदातकुसुमस्वच्छन्दगुच्छोपमम् ।
पूर्वाशावदनारविन्दमिलितश्रीखण्डबिन्दूज्वलं
बिम्बश्चान्द्रमसं तनोति नयनानन्दन्तृणां पश्यताम् ।।११२।।

---

१. क. मा. 'मिलत्तैल्प' इति पाठः।
२. क. मा. 'त' इति पाठः।
३. क. मा. 'पा' इति पाठः।
४. क. मा. 'त' इति पाठः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

घत्ताम्नाम तुलाभवत्वतितरां शीतो बलक्षोऽपि वा
यातु स्थाणुशिवस्य चन्दनपदं सम्मार्ष्टुताद्य[1]न्नृणाम् ।
कर्पूरः शशिवत्तथापि तनुते किं प्रेक्षकप्रेक्षणे
सान्द्रानन्दसुकन्दनूतनसुधानिस्पन्दसन्दोहकम् ॥११३॥

चित्रेणैकेन दग्धानयममृतकरैर्जीवयत्येव लोकान्
चित्रश्चैकं प्रदग्धं मृतमपि नयनज्वालया त्र्यंबकस्य ।
तातत्वादत्रिनेत्रं श्रयति च शिरसि स्थानदत्वात्त्रिनेत्रं
स्नेहं धत्तो बुधेऽसावपि विबुधगणे चन्द्रमाश्चित्तवृत्तः ॥

दीव्यद्भिर्ऋक्षसङ्घैरपिहितमहसं भानुमालासटालं
प्रोद्दामध्वान्तमत्तद्विरददलनतᳵकीर्णताराविभारम् ।
पौरन्दर्य्याश्च दर्य्यामुदितमुदितमाकाशकान्तारचारे
पश्यावश्यावलोकं शिशिरकरकरिद्वेषणाश्चारुगात्रि ॥११५॥

सर्वज्ञो पुंविकलमदधादादराद्युत्तमाङ्गे
क्षीणो भद्रान्तिथिमनुगतो भद्रदोऽसौ नराणाम् ।
दत्वा शूरᳵकरचयममुं वर्द्धयन्त्येव शश्वत्
स्थाने राजा हरति हृदयं स्वैर्गुणैर्जन्मभाजाम् ॥११६॥

मन्दाक्रान्ताक्षितिरतिशुचिर्जायतेऽनेन राज्ञा
पूर्णः पूर्णातिथिमतिवसुर्मोदते वासमेत्य ।
दक्षोऽप्यस्मै स्मरति सुखनीर्भूरिशोऽग्रेऽपवृङ्क्ते
नव्यात्केन क्षितिपतिसुते वर्णनीयो हिमांशुः ॥११७॥

सुधाम्भोधेर्जन्मत्रितनयशिरश्चारुवसतिः
स्वसा पद्मादेवी सुरपतितरुश्चावरभवः ।

---

1. क. मा. 'प' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परे विष्णोस्सङ्गो ध्रुवविहितगत्याप्यनुदिनं
बुधः पुत्रश्चन्द्रप्रकटितमिदन्तेऽस्ति सुकृतेः ॥११८॥

विराजो राजायं भवति हृदयं लोकवपुषः
त्रिनेत्रोऽप्येतेनेक्षणमतियुतः पङ्कजभवः ।
प्रवाप्यैनं शङ्काम्निजपतनगामौज्झत ततः
गिरां पारे तारेश्वरमहिमवृत्तं विलसति ॥११९॥

समुद्रादुत्पन्नास्सुरसुरभिकल्पद्रुमहरि-
प्रियापीयूषाद्याः किमुपकृतमेतैर्वद भुवः ।
अयन्तु स्वच्छन्दोच्छलदमृतशीतेन वपुषा
महीतापापायप्रतिदिनमुदीतः प्रकुरुते ॥१२०॥

समाने जन्यत्वेऽप्युपकृतिकलाशाम्यमिह नो
यतः पद्माकल्पद्रुमसुरभिमुख्या जलधिजाः ।
सुराणां सौख्यन्ते विदधति सुधांशुः पुनरयं
त्रिलोक्या सन्तापं हरति...घस्रं समुदितः ॥१२१॥

मानव्याधिविनाशनाय गिरिशे कैलासवासस्थल-
क्षोणीमीलितमस्तके प्रतिफलद्भूयस्तनूसङ्गतः ।
गौर्या मानसमच्छयन्मुकुलयन्पादाम्बुजं लोचनं
सोत्कण्ठं विदधच्चकोरशिशुकं तायाच्चिरंस्वः शशी ॥

ऊर्ध्वप्रेङ्खबुदञ्चितस्मितमितस्वेदार्द्रगण्डोन्मिषत्
तत्कालोचितभाविभातवदनादर्शशिशधोरांसकः ।
विश्लिष्यत्कबरीतमस्ततिमिलच्छैलेन्द्रपुत्र्या नख-
च्छेदभ्रान्तिकरस्तव...विरत क्षेमं सुधादीधितिः ॥१२३॥

---

१. तन्यर्हिस्मर्थं । 'ये विभाषा' विकल्पेनात्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

या दत्तोऽमृतमर्थिने बुधगणायायासलेशं विना
चैतद्भूरि[1]रसाब्धवाङ्कविकलन्नाम्नापि पुष्णाति या ।
या प्राप्ता फणिहारमौलिपदवीं यास्ते त्रिनेत्राश्रिता
श्रीतारेश्वरमूर्तिरस्तु जगतां क्षेमाय सा सर्वदा ॥१२४॥

इति शशधरं प्रत्याश्नाता ऽ परस्परभारतीः
प्रमुदिततरं शृण्वन्तौ तौ सुखेन हि दम्पती ।
ललितललिताश्चान्यां वार्तामुदाररसोदयं
समभिदधतौ क्षेमं लक्षं समासु विजह्नतुः ॥१२५॥

श्रीमत्कूर्मधराधरेन्द्रवसति प्रख्यातपन्तान्वये
जातः श्रीभवदत्तपण्डितवरः श्रीभार्गवी तत्प्रिया ।
लेभाते सुकृतिं सुतन्निजमतेस्संशुद्ध एतत्कृते
काव्ये श्रीकृतवीर्यसूनुचरिते सर्गो गतः षोडशः ॥१२६॥

इति श्रीसुकृतिदत्तविरचिते कार्तवीर्योदयमहाकाव्ये
षोडशः सर्गः[2] ॥

---

१. क. मा. 'चोतत्' इति पाठः ।

२. इति श्रीकिरातक्षत्रियकुलोत्पन्नस्य मेच्यञ्चलपांचथरलालीखर्कं वरडांडाग्रामवास्तव्यदोवालीछाचामलिङराईकुलोद्भूतस्य डा. स्वामिप्रपन्नाचार्यस्य कार्तवीर्योदयसम्पादने षोडशसर्गस्य टिप्पणीपाठभेदादिकं समाप्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कार्तवीर्योदयमहाकाव्ये

सप्तदशः सर्गः

विद्याकुशेशयवनीचरराजहंसे
शंसन्सुवादिगणवादविहीनदंशे ।
कूर्माचलाभिजनके वसुपन्तवंशे
जातो रमापतिरिति प्रथितस्सुधीन्द्रः ॥१॥

कृष्णातटे प्रतिभटेऽमरविष्टपस्या-
पत्यैष पर्वतनरेन्द्रगुरुर्बभूव ।
संस्था[1]पयच्च हृदि सौधवरेऽपि लक्ष्मी-
नारायणौ विपुलभावनया स विद्वान् ॥२॥

तस्यात्मजौ सकलशास्त्रमतप्रवीणौ
ज्येष्ठस्तयोस्समभवद्धरिरामसञ्ज्ञः ।
कृष्णारुणान्तरबुधान्प्रतिराजसंसन्-
निर्जित्य दिग्विजयकौतुकमाततोद्यः ॥३॥

तस्यावरोऽप्यनवरो नवरोपितः किं
कल्पद्रुमो भुवि गुणैः शिवरामनामा ।
श्रीकीर्तिबम्बनृपतेर्गुरुतामवाप्तः
दैन्यञ्जहार कलिदुःखितमानवानाम् ॥४॥

---

१. कः मा. 'असमापयन्' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तद्दृष्टिगोचरमितस्य जनस्य शश्वत्
क्षुत्क्षामताऽवसनता जडताप्यपैति ।
यावद्वपुर्धृतिदधौ व्रतमेवमेष
दिक्प्रान्तविश्रुतशरच्छशिकल्पकीर्तिः ॥५॥

तस्यात्मजाजननताः शिवराम आद्यः
तस्यानुजः पृथुयशा भवदत्तशर्मा ।
तत्पश्चिमः कृतिमतः खलु रुद्रदत्तः
सर्वैस्समा निगदिता विधिविष्णुशर्वैः ॥६॥

तेषामुदग्रगुणगुम्फितकीर्तिकुन्द-
स्रक्तोरणावलिविकाशितदिङ्मुखानाम् ।
शास्त्रारविन्दविलसद्रसचञ्चरीको
रेजेतराम्बुधवरो भवदत्तशर्मा ॥७॥

नागाधीशवचोविचारविशदे गङ्गेश्वरोक्ताम्बुधौ
मन्थाद्रिप्रतिमे च तत्र युगले स्वान्तं स[1]मालम्बिते ।
साहित्यामृतकुण्डमीनसदृशे सांख्यैकसंख्यान्विते
नेपालक्षितिपालपूजितपदे का नेह विद्या स्थिता ॥८॥

सन्दिग्धे विषयेऽपि वादिरहिते पूर्वेऽपि पक्षे तथा
येनोट्टङ्कितमाकलय्य विलसद्राद्धान्तमूर्वीधरः ।
नागो मूर्द्धविधूननं स्म कुरुते यच्छायया[2]द्यापि तत्
संस्कारेण करोति किं मुहुरसौ भूकम्पकृत्कम्पनम् ॥९॥

केचिद्व्याकरणेऽनवद्यविदका वेदान्तिवन्द्याः परे
सांख्ये केऽपि सुसंस्थिताः कतिपये न्याये परे नाटके ।

---

१. 'व्य' इति पाठो मूले ।
२. क. मा. 'धा' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तत्तच्छास्त्रसुधानिधिप्रमथनेऽमन्दादरो मन्दरः[1]
मन्दारो भुवि मन्दकोदरदरो हारस्स एकोऽभवत् ॥

आराध्य सौग[2]तनया तनयानवापत्
सत्कर्मणा गतनयान्वितयान्विताश्च ।
लोकद्वयेऽपि चतुरश्चतुरः पुमर्थान्
किम्बद्धमर्त्यवपुषो वपुषो वृषस्य ॥११॥

ज्येष्ठो न्यायविदग्रणीः[3] समभवच्छ्रीव्यासदत्ताभिधः
साहित्याम्बुधिपारगस्तदनुजः श्रीदत्तनामा कविः ।
ज्योतिश्शास्त्रविदांवरस्तदनुजो ज्वालादिदत्तो गुणै-
स्तत्पत्याधि जघन्यजोऽस्मि सुकृतिस्तेषामतिस्वल्पधीः ॥१२॥

ताते याते जलधि[4]तनयानाथलोकं सशोकां
सायङ्कोकी सदृशकविताम्ना[5]विताम्नन्यपुत्रैः ।
अम्बां दृष्ट्वा सरसहृदयो वत्सराद्वाददानाम्
आयत्नैस्तद्वनतपरो वृद्धतामस्मि यातः ॥१३॥

ताते नारायणपदगते कीर्तिरम्बात्रिलोकीं
शास्त्रप्रौढीसरसकविताबादितायामथासीत् (?) ।

---

१. क. मा. 'मन्दरः' पाठो नास्ति ।

२. 'सौगतनयेत्यत्र तनयान्-अवापदित्युक्तौ सुगततन्त्रमतमवलम्ब्य पुत्रान् जनयामास-इत्यर्थोऽवगम्यते । परञ्च परम्पराप्रवर्तमानसहितसाधनबाधनमपि न जिहासतीति ।

३. क. मा. 'णोः' इति पाठः ।

४. जलधेस्समुद्रस्य तनया=पुत्रीति जलधितनया, तां नाथत इति जलधितनयानाथः विष्णुः । जलधितनयानाथस्य लोकः = वैकुण्ठलोकस्तं वैकुण्ठलोकं ताते=पितरि याते गत इत्यर्थः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

५. णु स्तुतौ स्ताविता=नाविता समानार्थः ।

श्रीतारायाश्चरणकृपया पालयन्तास्समस्ताः
काव्य'न्नव्यं व्यरचयमहं कार्तवीर्योदयाख्यम् ॥१४॥

पुराणच्छायन्नो भवति न च वात्स्यायनकथा
भृतन्न क्लिष्टार्थंन्न च विरहितश्चित्रचरितैः ।
कथापौर्वापर्य्यच्युतमपि न शब्दस्मृतिकथा
प्रथामात्रन्नैतद् व्यवहरति किं' काव्यमहह ॥१५॥

भङ्गश्लेषप्रचुरमुदयद्बह्वनुप्रासपद्यं
धीरोदात्तस्मृतिगदितलसन्नायकं पूर्ण[3]भङ्गैः ।
वीर[4]प्रायाखिलरसयुतन्नातिसंक्षिप्तसर्गं
प्रायो व्यङ्ग्यप्रकटितचमत्कारसारप्रचारम् ॥१६॥

युग्मम् ।

फणिपतिभणितिप्रविष्टचेता
उदनयवाचि विशारदः स्मृतिज्ञः ।
भरतवचनभारतोक्तिविज्ञो
मम कृतिदर्शनमातनोतु विद्वान् ॥१७॥

कतिपयपदयोजनासु वाच-
स्पतिरनुयातु तुलाङ्गुरोः प्रसादात् ।
अहमिव न निबन्धगाढबन्धे
प्रभुरयमस्ति सुरक्षितोक्षितरसः ॥१८॥

---

१. 'काम्य' इति मूलपाठः ।
२. क. मा. 'वा' इति पाठः ।
३. क. मा. 'माङ्गैः' इति पाठः ।
४. क. मा. 'प्राग्प्राखि' इति पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नलिनपुलिननाकुजन्मभाजो
तव कवयो विहरन्तु देववाचा ।
कलियुगजनुषाङ्गिरः कवीनां
सूक्तिरसौ मनुते जरत्तृणानि ॥१९॥

नासूयामो वयमिह बुधा मत्सरत्यक्तविज्ञाः
श्रीहर्षोक्तिस्सहृदयहृदां हर्षवर्षन्तनोतु ।
तुल्या हीना मम भणिति वा यादृशी वास्ति तस्याः (?)
सत्यं सत्यन्निगदत तथा नानृतात्पापमन्यत् ॥२०॥

क्वचित्किञ्चिच्छैलीमनुभजतु मे नाम कविता
बुधां प्राचीनानां भवति व किमुच्छिष्टमियता ।
यतस्सन्तो धन्या जगदुपकृते शीतलगवी
प्रचारं कुर्वन्तो विदधति सुधांशोरनुगतिम् ॥२१॥

प्रौढप्रकारो ज्वलति प्रदीपे-
ऽप्युद्योतमात्रे मणिदीधितौ च ।
क्लिश्यन्ति ये नो जडसङ्गसौख्या-
न्कवीनिमान्को मनुते न तादृक् ॥२२॥

लोमप्रायान् प्रचुररजसोदभ्रभृङ्गारसारान्
प्रज्ञात्वैवाशयमपरगान्धावमानान्प्रलापैः ।
अव्युत्पन्नान्किमिह कथये वायुमार्गाश्रितत्वाद्
व्युत्पन्नान् वाद्यतनसुधयः पक्षमात्रावलम्बान् ॥२३॥

संविभ्रतोजाततयोश्च भृङ्गं
सुधारसास्वादकृतोऽनुवेलम् ।
वृषानुकूलस्थितिमादधाना-
न्नमन्यते को विबुधान् मादृक् ॥२४॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कन्नु प्रौढविलासवासदिविषद्वामाधराधारभू-
माधुर्य्याधरिणी मदीयकविता किं वर्णनीया मया।
द्राक्षाङ्गत्वरमाधुरीन्न हि पदे लाक्षापदे न्यस्यते
पीयूषं विषसोदरन्दरमियन्नैवादरान्मन्यते ॥२५॥

कविते भवितेह को नु मे
सरसोक्तेरनुरागभाजनम्।
इति मास्म तपस्तपोबलात्-
सुकृतेः कोऽपि जनिष्यते तथा ॥२६॥

अथवास्ति सुतो बृहस्पतिः
परिचर्य्याकुशलस्तवाधुना।
भविता शिशुपद्मनाभको-
ऽवरपुत्रोऽपि कियद्दिनैरलम् ॥२७॥

पुत्रस्यास्य कनीयसो मम पुनः काव्याभिधानस्य च
जेष्ठाभ्यां मयि तारिणीपदगते दायः प्रदेयो ध्रुवम्।
नित्यावेक्षणदुष्टतानिरसनाविघ्नप्रचारादिको
भूयाद्वां कुशलं सदाप्यविकलं सौभ्रात्रभाजोरिति ॥२८॥

इतस्ततो सतस्सतः प्रणम्य चार्थये मुहुः।
विलोक्य सम्यगेनकद्विदूष्यतां विभूष्यताम् ॥२९॥

यत्रानेकगुणा वसन्ति कुरुते किन्तत्र दोषोऽल्पको
दारिद्र्यं विदुषीव यत्र बहवो दोषास्तनीयान् गुणः।
किन्तत्साधुशठे प्रियं वच इवान्तर्वाणयस्तन्मम
काव्यं भूषयताथ दूषयत वा सम्प्रेक्ष्य रीत्यामुया ॥३०॥

पशरामरतापि पूरयोध्या
विवशाश क्षणभङ्गुरं वपुः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्थितिशालि कियद्दिनन्नराणा-
न्न मुधा मत्सरिणो बुधास्ततः ।।३१।।

श्रीकालिदासभवभूतिमुरारिमाघ-
श्रीहर्षभारविमुखाः कवयोऽधुनापि ।
तिष्ठन्ति कीर्तिवपुषेति ममैष यत्नः
तिष्ठामि कल्पममुना वपुषेह विज्ञाः ।।३२।।

ब्रह्मोपेन्द्रगिरीशमुख्यविबुधैराराधिताङ्घ्रिद्वये
तारे शुद्धसुवर्णनिर्मितमिदं रीत्यादिसङ्गस्थितम् ।
उन्मीलन्मधुरध्वनिप्रतिपदं स्यूतं गुणौघैरलं
काव्यन्ते चरणेऽर्पयामि तदिदन्मञ्जीरवद्राजताम् ।।३३।।

संवेक्षितकुम्भिकुञ्जशकलश्यामभ्रमोक्तिर्यथा
त्वद्रूपाध्यसितोऽत्र दोषगुणगाचर्या मुधा यद्यपि ।
पौरो[1]भाग्यमभाग्यतो बहुबुधः कश्चित्तथाप्याचरेत्
जागर्त्वाजजननि ! त्वदीयकरुणापाङ्गोऽत्र दोषच्छिदे ।।

नागेन्द्रनेत्रनवभूमितविक्रमाब्दे
वैशाखमासि सितपक्षतृतीयतिथ्याम् ।
श्रीकार्तवीर्य्यचरितोदितकाव्यमेतत्
श्रीतारिणीकरुणया परिपूर्णमासीत् (?) ।।३५।।

चिरञ्जयतु रञ्जयत्वलमिदं सुकाव्यं बुधान्
मुदेव वसुधातले भवतु मिष्टमिष्टन्नृणाम् ।
मयीव परिशीलनश्रमयुतेऽस्य मर्त्यान्तरे
पतन्तु करुणादृशो भुवनतारिकायाद्भुतम् (?) ।।३६।।

---

1. पौरोभाग्यं नाम निन्दार्थं प्रयुक्तं दृश्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आसीच्छ्रीकृतवीर्यभूपतिवरो माहिष्मतीपत्तने
लेभे सोऽर्जुनसञ्ज्ञकञ्च तनयं दत्तोपदेशाद्धरिम् ।
तस्मान्नेऽथ विदर्भभूपतिसुता तौ दम्पती सप्तसु
द्वीपेष्वविधषु स्वे'च्छया व्यहरतां वृत्तान्तमेनच्छिवम् ।।

इति श्रीसुकृतिदत्तविरचिते कार्तवीर्योदयमहाकाव्ये
वंशवर्णनन्नाम सप्तदशः सर्गः[२] ।।

१. क. मा. 'चे' इति पाठः ।

२. इति श्रीकिरातक्षत्रियकुलोत्पन्नस्य मेच्यञ्चलपाँचथरलालीखर्क-वरडाँड।ग्रामवास्तव्यदोवालीछाचामलिङराईकुलोद्भूतस्य डा. स्वामिप्रपन्नाचार्यस्य कार्तवीर्योदयसम्पादने सप्तदशसर्गस्य टिप्पणीपाठभेदादिकं समाप्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परिशिष्ट

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीगणेशाय नमः ॥ कृपापारावारो ऽखिलसदसदर्थप्रकटनसमर्थः लघु सगाम्भु गुर्वगं स्तोकार्थं नापराकृतं मे कविकुलम् । हरस्य
दीनं प्रणिदिनमलं काङ्क्षितनतः कृताक्षाक्षारिणा मम विदधतां विघ्नशमनम् १ इन्दीवरच्छन्दकमुन्दराङ्गं दोर्भिश्च
तुर्भिरभिराजितमक्षभीति नाराधिधानममलं हृदये मम स्तु श्रेयो ऽस्य तापशमने प्रथितं महस्तत् २ यन्नामनामगु
णाहमस्तु रामकीर्त्तिरद्यापि भूमिवलयं विमलीकरोति तस्यानुजन्मचरितं महितं यथाश्रि संकीर्त्तयामि निजबुद्धिविशो
धनाय ३ यच्चिन्तनं हरति चेतसि जातमात्रं दुःखं मम भुवि तरन्त्यपि विश्वमुद्धिम् संशोधये ऽहं गिरं निजकीर्त्तनोक्ते
नच्छामयो हस हरिः कृतवीर्यजन्मा ४ यस्यावदानगुणगाराशिनिवास हे मोर्द्धलाग्गु हन्दमपि संकटमेव गोहम् कि
मात्परो कृतिकृतेऽत्रनिपानमध्ये क्षीरोदधिप्रमथनात्खलवस्तु सूक्ष्मे ५ किं चिन्तयापदमुपाहरिकीर्त्तिनेक: सामान्य
तोगुणगणं किवरीनु मीशः: आसंविदां यदिगतांनि समे विधीरावतांमयापरिकरान्ततदीयरोत्या ६ भगीरथेनेवस
याप्रणीतादिवोध्वर्वविश्रुपदप्रसंगा प्राप्तकथानिर्झरिणीविभुध्यं मम स्तु पूर्वैः सहचापरेषाम् ७ सन्तः सदैवक

रामः
१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उदन्तनिहृन्नविन्नाविन्नागुरोस्तु निष्ठरोरतिवृद्धिमन्त्रः तेषस्सगामम मर्वन्नुभवं नु येषां कारूण्यतो वृजति सर्व कलाक
लापः ८ अस्ति प्रशस्तैर्विभवैस्समस्तैस्समस्तभूमंडलमण्डनं सा वल्मीकसार्धकशारशासा माहिष्मतीनाम पुरी पुरी
तिः।। ९ : यत्र स्थितानां नृपाणिगणानां मणिप्रवालादि युतापणानाम् विलोक्य लाभ्यमवैमि नामतडत्वगर्भतिव
सुंधरायाः ।। १० स्फारः स्फुरंज्जकृतुतां समीक्ष्य सर्वं बसर्वं प्रति याव शोन ठन्नंगआधाय मुदाव हन्तरेवानदीय न्य
रिरेव भाति ।। ११ ।। विलोल कल्लोल समुत्थितेन प्रफुल्ल पद्मामलगंधभाजा समीरणेन व्यजनं चरन्ती रेवा स्तिसेवा पु
वधूवयस्याः ।। १२ ।। नृत्यन्तरंगा गुभुजा विसर्पत्याकोशपद्मानि निनादगीता उद्वेल धीरध्वनि चारुवाद्या तौर्यत्रिकं
यत्र तनोति रेवा १३ ।। सुशीलला मूर्च्छितभ्रंभ्रमासर्पं सभाजयंतीकलहंस यावैः। स्फुटोत्पलाक्षी परमादरेण सरस्वतीव यं श्रि
यन्तितोमपुनी १४ यत्रांगनाधौ धवलाव लिम्बुरंगनेत्राआहूयनाभि कुच द्वयित्वं स्वकीयाम्। भावर्ति यत्र फुगलोर्मि पु
शोभमासु पद्मभिमेकल भुवः सरितो विदूरे ।। १५ ।। यत्र स्थितानाम खिलप्रजानां स्नानेक्षणस्पर्शनपानकार्यैः।। पुण्यूलयं

वस्तुधाप्रहाराद्दिग्लनमानः कविराजमानः॥ २१ ॥ सकलस्वकमलम्। समासमानध्वसमासमानः समासमानध्वसमास
मानः॥ समासमानासमासमानः समासमानध्वसमासमानः॥ २२ ॥ महायमकम्। दीर्घ क्षिप्तारहकरकवक्त्रापराः
श्रुत्वा सभाजनं सुन्दरोदारगः॥ कीर्तिमान्मल्पवाक्शास्त्र विचक्षण हृडू मन्त्रगोमनिराकार्य कृत्वा मनः॥ २३ ॥ मानिनी
मूर्तिमेते सुन्दनो मिळितिमैदैन्य हार्ल्लिगः प्रीपमेसुल्पमः॥ सत्व मौभूनल्लेरश्लिंमत्स्तं तः कामदो मानदो भूपितस्य विष्णु
याम् २४ ॥ गुच्छम्॥ श्लोकांस्य गुप्तवन्धः॥ तानः सुन्दरकाक्षत्वीरत्वारितं भव्यप्रवादप्रियनन्दहृदा कन्यचिन्तानम्भावनसांनवात्
कान्तप्रियम्॥ वशीति समल कारुण्यपीडुच लिलश्रोराशीयर्हन्तमुदा दानस्य सिनांयशास्तवपरं हप्रेकतांतसदा॥ २५ ॥



॥ ग्रस्यः ५ ॥ ३९ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection



खड्गबन्धः



त्रिशूलबन्धः



धनुर्बन्धः



षोडशदलपद्मबन्धः



हारबन्धः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ चक्रबन्धः॥



पुरः [illegible]
[illegible]



…दल पद्मबंधः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संभ्रमान् भानुभासो नरवरशिरसां वृष्टिनो दिव्यदिव्योऽस्मनोन्नानोननोनो ॥ कृतमुनहितकृच्छ्रोकश्लोकपुंकर्मा ॥ धातापाता प्रता
पीक्षितिपतिरतिमुत्सेमधाम्नभुवग्र: संसारासारसाशीविकल्पकजकरामानतानवतनन्दन् ॥ ८८ ॥ हारस्थ: श्रीमत्कूर्मो
दिपूर्वाईम् र्व वना [illegible] तेसर्गो गमत्तपन्नम [illegible] संयुक्तने ॥ कृतौ कृति मनैष्विवैराचामर: ॥ ८९
॥ श्री ॥ इति श्री [illegible] दये महा [illegible] मंगल [illegible] रचदर्शनन्नाम
[illegible] ७ ॥ आधि [illegible] जुनाशिपा: करूणापाङ्गसन्तति: ॥ या वरीकार्तिवैधेयान्माह शानपि सत्कवीन् ॥ १ ॥ राज्याभि
षेकपदसंभृतिमारक्ष्य पुत्रं विधिवत्तु रवनीतलसार्व भौमम् [illegible] दाहितकार्यं दर्पिर्दत्तं गुरूं गुरु मिवा मरलोक
राज: ॥ २ ॥ उपयाकं भार: [illegible] निर्वास [illegible] तिमनो ममते [illegible] वान्निम दशा नगं त: प्रकाशम् ॥ कार्य्यं निधायतने
येल घुभास्वती हृत्प्रान्त: प्रदीपगतरोचिरिवाचिरेण ॥ ३ ॥ पश्चात्पदमा धुर्ये निधाय धुरमत्र विरा [illegible] विधा मिवाग म
गम्यानि तमार्गगतिव: [illegible] सदक्षत नयेन नयेन [illegible] निमधुनाभवत: प्रसादात् ॥ ४ ॥ श्री नीपुराणि: पुरा.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्यक्षितिपस्य वर्याकुशलस्नवाधुना। भविनाशिभ्रपभना मकोऽवरपुत्रोपि किम द्विनैरलभ्।।२७।।पुत्रस्यास्यकनीयसोममपु
न: कृताभिधानस्यवत्सेषा भांमयिला रितिपदगानेशयः पुदेशोध्रुवम्। निमावेक्षणात्तुस्वनानिरसनाविघ्रप्रचाराद्विकोभूया
त्साङ्गुशलंसपाणिक्षिकलंसौधात्रमात्रोरितिं ॥२८॥ इनस्तलोसलः सत: श्रुतांप्यवार्थयेषुरुः क्लिष्टेकसमागेन कदिदृष्यना
द्विषूष्पनाम्।।२९।। यज्ञानेकगुणास्यसंक्षिकुरुतेकिंनत्रदोषोत्स्वको पाद्विस्त्रे विद्वीक्षयत्रवहवोदो पास्तनीयानयुणाः किंन
नसायुक्तठोप्रुयंदवरवानवीणायनतमस कायंभूमयनाथदूषयनमांसत्रेष्यरीत्यागुणा ३०॥ अनशामरनापिपूरयोध्यावेन
माथाक्षणसंगुरंवपुः। क्षितिशालिनिकिमहिंनसशालांनगुधामनस्तत्रिभेद्युधाः स्तनन्।।३१।।श्रीकालिदासमवभूतिपुरारि माघ
भीहर्षभारविमुखाः कवयोनुमापि।। नित्वंतिकार्याविमृत्युवेतिमस्मैयनतलियामिकल्पनमुनान्वयुषेहविता।।३२।।कुलोपं
ऽमीशायुक्तविदुधैराराधितनीपुत्रयेनारेपुजनुवर्णाविर्भ्यनीदंशीत्यादिसंगाक्षितमा उन्नीलन्मधुरधनिप्रतिपदंस्
नंगुतौघैरलंकाव्यंनेवरणोर्ध्वयामितादिदंमंजरीरवशृजनाम् ३३॥ समेवैषितंकुभिकुंजराकलसणामभुमोक्ष्यपातड्

पाध्यक्षितेन दोषगुणागाचर्यं सुधायशापि। पीरो भाग्यम भाग्यपतोव क्रबुधः कश्चिन्नथाप्याचरेन्नागर्यान्तनतनितदीपकस्त
शतापां गोत्रदोषच्छिदे। ३४ ।। नागेन्दुनेत्रनवभूमितविक्रमाद्वे वैशाखमासक्षितपक्षतनौ यतिथ्याम्। श्रीकार्त्तवीर्यचरितो
दितकाव्यमेनं स्त्रीताशिशाकहृगाथापरिपूर्णमासीत्। ३५। श्रियं श्रयन्तुरंनयन्तलमिदं सुकाव्यं बुधान्सुदेववसुधातले
भवगुणिषु मिषं म णाम्। मधीवपरिशीलनश्रमयुतेस्य मर्मान्तरेप न मुकहृगाद्दक्षो भुवननाकिकायाजुनम्। ३६। आ
सा च्छीहल्लवीर्यभूपतिवरोमाहिमतीपत्तनेदोभेसोर्जुनसंतर्कं चतन्नयं दत्तोपदेशाध्वरिम्। तम्बद्रेथाविदर्भभूपालसुता
तो दम्पतीसप्रसुधापेस्व श्विपुवे चव्यमयं रनं सन्नान्नमेनाश्चितम्।। ३७।।

सुकवि ... विरचिते महाकाव्ये ... समाप्तम्।

सम्पूर्णमिदम्

परिशिष्ट १

कार्तवीर्योदय महाकाव्यमा प्रयुक्त गुण, लक्षण तथा व्यञ्जना

	सर्गः	श्लोकाः		सर्गः	श्लोकाः
अभिधा	३	४७	माधुर्यगुणः	८	९७
ओजोगुणः	८	१०१	माधुर्यगुणः	१२	१५
गौणभक्तिः	३	४४	योगरूढिः	५	८२
प्रसादगुणः	८	८८	योगशक्तिः	३	४८
पाञ्चाली रीतिः	१	४२	रूढिः	५	८२
भक्तिः	३	४४	व्यञ्जना	३	४७
भक्तिमार्गः	३	४७	सुनिरूढा लक्षणा	३	४६

परिशिष्ट २

कार्तवीर्योदय महाकाव्यमा प्रयुक्त दार्शनिकवाद

	सर्गः	श्लोकाः		सर्गः	श्लोकाः
आत्मावगाही	१	३०	विवर्तवादः	१६	८९
परमाणुवादः	१६	८६	वैनाशिकः	१६	८७
पिलुपाकवादः	१६	८५	शक्तिरेव कारणम्	१६	७९
प्रधानकार्यवादः	१	३०	सत्कार्यवादः	१६	७८
योगः	१	३१	साङ्ख्यविचारः	१	३०
विकल्पवादः	१	३१			

परिशिष्ट ३

कार्तवीर्योदय महाकाव्यमा प्रयुक्त, कर्मकाण्डसम्बन्धी शब्दसुची

	सर्गः	श्लोकाः		सर्गः	श्लोकाः
अर्थवादः	१६	४३	अश्वमेधः	१६	४४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

	सर्गः	श्लोकाः		सर्गः	श्लोकाः
औदुम्बरी	१६	४१	विश्वजित्	१६	४६
पौर्णमासः	१६	४४	सोमः	१६	४४
वाजपेयः	१६	४५			

परिशिष्ट ४

कार्तवीर्योदय महाकाव्यमा प्रयुक्त ग्रन्थसूची

	सर्गः	श्लोकाः		सर्गः	श्लोकाः
आन्विक्षिकी	१	२५	श्रौतकर्म	१६	५४
ऋग्गणः	५	७१	मीमांसा	१६	४१
खण्डनम्	१	३५	शब्दस्मृतिः	१६	४०
घनः	५	६५	कल्पः	१६	४०
जटा	५	६५	पाञ्चरात्रम्	३	५१
त्रयी	५	६५	भारतः	१	४२
बृहत्कथा	१	४०	यजुः	४	४७
शिखा	५	६५	वेदमाता	५	६०
शब्दस्मृतिः	१	२७	शतपथम्	४	४७

परिशिष्ट ५

कार्तवीर्योदय महाकाव्यमा प्रयुक्त छन्दसूची

	सर्गः	श्लोकाः		सर्गः	श्लोकाः
पंक्तिः	१	३२	वसन्ततिलका	१	३२
पृथ्वी	१२	१५६	वसन्ततिलका	१२	७०
मन्दाक्रान्ता	१६	११७	शार्दूलविक्रीडितम्	८	११२
मन्दाक्रान्ता	१३	२१	शार्दूलविक्रीडितम्	१२	१५५
मालिनी	१२	१५७	शालिनी	१	३२
मालिनी	१	३२	शिखरिणी	१२	१५४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

	सर्गः	श्लोकाः		सर्गः	श्लोकाः
शिखरिणी	१	३२	स्रग्धरा	८	१११
सुन्दरी	१	३२			

परिशिष्ट ६

कार्तवीर्योदयमा उपलब्ध ग्रन्थसूची

१. ★ अलङ्कारचूडामणिः
२. ★ कार्तवीर्योदयमहाकाव्यम्
३. ★ गङ्गाप्रसादः
४. गादाधरीटीका
५. ★ छन्दप्रबन्धः
६. नैषधीयक्रोडपत्रम्
७. परिभाषेन्दुशेखरक्रोडपत्रम्
८. मकरन्दस्तुति टीका
९. ★ मन्दारमाला
१०. ★ रत्नावली
११. रसमाला
१२. रसिकरञ्जनी
१३. शक्तिवादक्रोडपत्र
१४. शब्दशक्तिप्रकाशिका टीका
१५. शब्देन्दुशेखरक्रोडपत्रम्
१६. व्युत्पत्तिवादटिप्पणी
१७. व्रीह्यादिसूत्राष्टकवृत्तिः
१८. ★ स्फोटवादः
१९. ★ सिद्धान्तवादः

परिशिष्ट ७

कार्तवीर्योदय महाकाव्यमा सन्निवेशित आचार्यहरूको नामसूची

	सर्गः	श्लोकाः		सर्गः	श्लोकाः
अक्षिपाद	५	८१	अर्जुनः	१	४१
अग्निमित्र	१	३६	अर्जुनः	१	३७

★ ताराको चिह्न भएका ग्रन्थका नाम कार्तवीर्योदय महाकाव्यका पुष्पिकाहरूमा स्वयं महाकविले उल्लेख गरेका छन् । शेष ग्रन्थहरूमा धेरै जसोका उल्लेख नैषधक्रोडपत्रमा भएको छ । केही नेपाल राष्ट्रिय अभिलेखालयमा छन् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

:	सर्गः	श्लोकाः		सर्गः	श्लोकाः
अश्विनीकुमारः	२	८	भारविः	१	३७
अत्रिः	३	४	मनुः	२	२
अत्रिभूः	३	५	मनुः	१६	२
अनुसूया	३	३	महर्षिदत्तः	२	५७
आत्रेयः	१६	३६	माघः	१	३८
ऋषभः	८	१७	यास्कः	५	७४
उत्तरतन्त्रविज्ञः	१	२९	रामः	१	४४
कणभक्षः	५	८१	रावणः	५	६६
कश्यपः	३	१७	लक्ष्मणः	१	४४
कालिदासः	१	३६	वामनाचार्यः	३	४६
कार्तवीर्यः– कवीश्वरः	१६	५१	वामनः	३	४६
कृतवीर्यः	१	१	वाल्मीकिः	१	४४
कृष्णः	१	४१	वैश्रवणः	१६	५२
कौशिकः	३	१६	व्यासः	५	८०
गाङ्गेयः	१	४२	शक्रः	२	११
चित्रभानुः	१	३९	शतानीकः	१	४०
धर्मराजः	१	४३	शिवः	२	११
धार्तराष्ट्रः	१	४२	शूद्रकक्षितिपः	१	३९
पाञ्चालिका	१	४२	श्रीहर्षः	१	३४
पुण्यजनः	१	४०	श्रीपतिः	३	३०
पूर्वतन्त्रविज्ञः	१	२९	हरिः	१	३४
भरतः	१	४२			

परिशिष्ट ८

कार्तवीर्योदयका केही व्यायामद्योतक क्रियापदका नमूना

	सर्गः	श्लोकाः		सर्गः	श्लोकाः
अकरः	१६	२	अचीलूयन्	१०	५२
अगुः	६	१०	आदिका	६	३१
अचिक्षिपुः	१४	५०	आप	५	२९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

	सर्गः	श्लोकाः		सर्गः	श्लोकाः
आप	१३	११	गातेस्म	६	६१
आपत्	१४	८	अगात्	५	२२
अयष्ट	१६	४६	आगात्	४	६०
आस	५	३४	चुकुवे	६	३५
आस्त	१३	२५	चेलचे	६	८८
अवताम्	१०	७०	धत्ताम्	१२	८५
अवाप	४	९	पिधत्त	१०	१०४
अविता	३	३२	प्रत्येषि	१२	५९
अवैत्	१०	५०	प्रैक्षिष्ट	१४	८४
वाटः	१६	३२	निन्ये	१२	११४
व्यधित	१०	९०	न्यगादि	१२	१२५
व्यमिद्धे	१४	७७	मनुमः	१२	६०
विसस्मरुः	२	१०	ममौ	३	४
वीयुः	१०	१०६	रिरमयिषुः	११	९
व्यसजत	३	६०	समूचे	१०	२५
ववौ	२	४४	स्मृस्थ	१६	५४
ईष्टे	१६	७३	सस्नौ	१६	५२
गमे	१०	९८			

परिशिष्ट ९

कार्तवीर्योदय महाकाव्यको श्लोक अनुक्रमणिका

	सर्गः	श्लोकाः		सर्गः	श्लोकाः
अंशा यथैवापतितम्	७	१५	अङ्कसङ्क्रमितपाद	५	२७
अकृतिमाभेषु च	१४	५	अङ्गप्रोत्तुङ्गभासा	१३	१७
अकृत्रिमा वपुश्शोभा	१५	२१२	अङ्गुष्ठमादाय	१४	८५
अक्षराणि स पठन्	५	५१	अङ्गुष्ठमूलपरिनिर्मित-	४	९
अक्षवन्तमभितः	१	२२	अचलीभूतकनकप्रभा	१५	१९१
अङ्कमेनमधिरोप्य	५	२८	अचेतनं कर्म तथा	१६	७१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

	सर्गः	श्लोकाः
अचेतनन्तद्यदि वितथ	१६	७०
अजन्मनाशोऽस्ति	१६	७३
अजातप्राप्याप्यलिना	१५	९८
अजा रजो वो विषये	१४	४१
अजरामरतापि पू-	१७	३१
अज्ञानध्वान्तपटली	१५	२२३
अञ्जनानन्दनस्तत्र	१५	२३०
अतरुणतरुणौ	४	६०
अतिकाशिशिरोरुहो-	९	१४
अतिकृशोदरसङ्कुट-	६	७८
अतितपोबलसम्मि-	६	७६
अतितुङ्गतुरङ्गसङ्गवान्	२	१८
अतिदक्षविपक्षवक्षसाम्	२	२६
अतिपटुवटुभिः	११	४५
अतिबन्धुरसिन्धुरक्षरन्	९	३१
अतिबालमृणालनालया	९	७४
अतिविकासपलाश-	६	६०
अतिवेलनिपीतसोमजा-	२	७
अतिशेते स्म	७	७५
अत्रत्ययोषितामन्ते	१५	२१३
अत्रान्तरे मातृमदा	१४	५१
अत्रान्तरे सर्वदिगी-	१४	१०६
अत्रिजातशिशिरामल-	३	४
अत्रिभूः सुविनयाम्	३	५
अथ कनकतनूजोत्पश्य	८	९७
अथ चैत्ररथारूढौ	१५	२४९
अथ जीवगता कृति-	१६	८४
अथ तत्र भवांस्तत्र	१५	२५९
अथ तत्र समस्तवस्तुभि-	२	१
अथ तस्य नरेन्द्रस्य	१५	२
अथ तस्य समस्त-	२	४३
अथ तातनिदेशभाविताम्	९	२
अथ तासां वचो	१५	१०७
अथ दिनमुखकृत्यम्	११	६७
अथ नरेन्द्रसुतः	६	१
अथ निखिलजनानाम्	४	७४
अथ प्रतस्थे भूशक्रः	१५	२४०
अथ प्रशस्तेऽभ्युदिते	१४	६२
अथ मधुस्सहकार-	६	५३
अथ मुनिरपि भूपम्	३	६०
अथवास्ति सुतो	१७	२७
अथ वितततताक्ता-	४	६९
अथ रत्नविचित्र-	११	७८
